शास्त्रसंदेश-३८

# स्तोत्रसंदेशमाला

## श्रीमहावीरस्वामिजिनस्तोत्राणि

१२



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-३८

# स्तोत्र संदेशमाला-१२

## श्रीमहावीरस्वामिजिनस्तोत्राणि

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.


પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૧૨

## શ્રીમહાવીરસ્વામિજિનસ્તોત્રાણિ

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૪ + ૨૫૨ + ૪

સ્તોત્ર : ૧૦૭ શ્લોક : ૧૬૨૪

: પ્રમાર્જના :

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

: છંદ-સંયોજના :

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.

વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!  અનુમોદનીય...!  અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૧૧-૧૨ ના
## દ્રવ્ય લાભાર્થી



## શ્રી શ્વેતામ્બર મૂર્તિપૂજક તપગચ્છ ગુજરાતી
## જૈન સંઘ માલેગાંવ (મહારાષ્ટ્ર)

*આપશ્રીએ જ્ઞાનદ્રવ્યથી કરેલી શ્રુતભક્તિની*
*અમો હાર્દિક અનુમોદના કરીએ છીએ.*
*ટ્રસ્ટીગણ ના અમો*
*આભારી છીએ.*

*શાસ્ત્રસંદેશ, સુરત*





**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.**

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | सदा योगसात्म्यात्समुद्- | पू.आ.श्री सिद्धसेनदिवाकर | १ |
| २ | अकम्पसम्पल्लवलीवसन्तं, | पू.आ. श्री जयशेखरसूरि | ७ |
| ३ | मङ्गलानि स ददातु भाविनां- | पू.आ.श्री मुनिसुन्दरसूरि | १० |
| ४ | जयश्रीमन्दिरे सिद्धपुरे | पू.आ. श्री मुनिसुन्दरसूरि | १२ |
| ५ | जयश्रीविलासालयं सर्व- | पू.आ. श्री मुनिसुन्दरसूरि | १६ |
| ६ | जयश्रियं यः सकलान्त- | पू.आ. श्री मुनिसुन्दरसूरि | २० |
| ७ | जयश्रीनिलयं यस्य पदा- | पू.आ. श्री मुनिसुन्दरसूरि | २६ |
| ८ | श्रीसिद्धार्थनरेशवंशकमला- | पू.आ.श्री जिनप्रभसूरि | ३० |
| ९ | असमशमनिवासं वास- | पू.आ.श्री जिनप्रभसूरि | ३२ |
| १० | स्वः श्रेयससरसीरुह, सूरं | पू.आ.श्री जिनप्रभसूरि | ३६ |
| ११ | श्रीवर्द्धमानः सुखवृद्धयेऽ- | पू. आ.श्री जिनप्रभसूरि | ३९ |
| १२ | श्रीवर्द्धमान परिपूरितनम्र- | पू.आ.श्री जिनप्रभसूरि | ४० |
| १३ | निस्तीर्णविस्तीर्णभवार्णवं | पू.आ.श्री जिनप्रभसूरि | ४१ |
| १४ | पराक्रमेणेव पराजितोऽयं | पू.आ.श्री जिनप्रभसूरि | ४४ |
| १५ | कंसारिक्रमनिर्यदापगाधारा- | पू.आ. श्री जिनप्रभसूरि | ४९ |
| १६ | चित्रैः स्तोष्ये जिनं वीरं | पू.आ. श्री जिनप्रभसूरि | ५३ |
| १७ | जय श्रीसर्वसिद्धार्थ ! | पू.आ.श्री धर्मघोषसूरि | ५६ |
| १८ | भावारिवारणनिवारणदारुणोरु- | पू.आ.श्री जिनवल्लभसूरि | ५७ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १९ | वन्दे महोदयरमारमणीललामं, | पू. उपाध्याय श्री पद्मराजगणि | ६३ |
| २० | तुभ्यं नमः समयधर्म्मनिवेद- | पू.आ.श्री कल्याणसागरसूरि | ६९ |
| २१ | त्वमसि सद्गुणनन्दनमन्दर- | पू.आ.श्री कल्याणसमारसूरि | ७० |
| २२ | विश्वश्रीद्ध ! रजश्छिदे गरि- | पू.आ.श्री कुलमण्डनसूरि | ७३ |
| २३ | उद्गिरन्निव भावस्थं, तमे- | पू.आ.श्री हेमचन्द्रसूरि | ७६ |
| २४ | जगद्बन्धुः कृपासिन्धु, | पू.आ.श्री लक्ष्मीसूरि | ७७ |
| २५ | वीतराग ! तव दर्शनमुक्तौ, | पू.आ. श्री लक्ष्मीसूरि | ७८ |
| २६ | छत्रत्रयालङ्कृतमौलिमण्डनम् | पू.आ.श्री सोमसुन्दरसूरि | ७९ |
| २७ | श्रेयो यो नारनाथः कलिमल- | पू.आ.श्री प्रद्युम्नसूरि | ८१ |
| २८ | जगत्कल्पना कल्पवृक्षोपमानं | पू.आ.श्री पार्श्वेन्दुसूरि | ८१ |
| २९ | अनवरतममरनरवरशतनतपद- | पू.आ.श्री भावदेवसूरि | ८२ |
| ३० | भक्त्या नमस्कृत्य गुरुं गुरुं | पू. आ. श्री हीरविजयसूरि | ८३ |
| ३१ | सन्नमत्त्रिदशवन्द्यपदं श्रीवर्ध- | पू.उपा.श्री उदयधर्म | ८५ |
| ३२ | ऐन्द्रं ज्योतिः किमपि कुनय- | पू. उपा. श्री यशोविजयजी | ८७ |
| ३३ | श्रीमत्स्वर्गिजनार्च्चितक्रमयुगं | महो. - श्री धर्मसागरगणि | ८९ |
| ३४ | श्रीगुरुपदकमलं निजे, मानस- | महो. - श्री सोमविजयगणि | ९५ |
| ३५ | त्रिशलासुत ! रे वाञ्छितफल- | महो. - श्री सोमविजयगणि | ९६ |
| ३६ | श्रीगुरुचरणमुदारं, स्मारं स्मारं | महो. - श्री सोमविजयगणि | ९८ |
| ३७ | स्वस्ति श्रीदातारं, ज्ञातारं | महो. - श्री सोमविजयगणि | ९९ |
| ३८ | श्री वीर ! विहितपरहित ! | महो. - श्री उदयसिंहसूरि | १०० |
| ३९ | स्वस्ति श्रीपरिषेव्यमाणचरण- | पण्डितश्री विजयसागरगणि | १०२ |
| ४० | स्वः श्रीसुखाऽऽसिजननन्दमि- | पू.पं.श्री जीवविजयगणि | १०७ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ४१ | चन्द्रादित्यमरालदन्तिपवनैः | पू.मु.श्री गुणविजयगणि | १०९ |
| ४२ | आनन्दमेदुरमहोदयबद्धलीलं, | पण्डितश्री कल्याणकुशलगणि | १११ |
| ४३ | यस्तीर्थराजस्त्रिशलात्मजातः | पू.मु.श्री धर्मवर्द्धनगणि | ११७ |
| ४४ | श्रीमद्वीर तथा प्रसीद सततं मे | पू.मू.श्री. धर्मवर्द्धनगणि | १२० |
| ४५ | सिद्धं सिद्धार्थसुतं, | पू.श्री चन्द्रमहर्षि | १२२ |
| ४६ | जयति वीरजिनो जगताङ्गज, | पू.मु.श्री समयसुन्दर वि. | १२३ |
| ४७ | कम्रानम्रसुरासुरेश्वरशिरः | मुनिप्रवरश्री धर्महंसगणि | १२४ |
| ४८ | जयसि साकर मोदक हे शमी | पू.उपा. श्री नेमिसागरगणि | १२७ |
| ४९ | कल्याणधामकरणं घन- | पू.आ.श्री मानतुङ्गसूरि | १२९ |
| ५० | विनम्रदेवासुरमौलिमाला- | पू.आ. श्री रत्नाकरसूरिशिष्य | १३२ |
| ५१ | तुभ्यं नमः शुभसुजैत्रपुरावतार | पू.मु.श्री रत्नसिंहवि. | १३६ |
| ५२ | कल्याणमालामणिसन्निधानं, | पू.मु.श्री पार्श्वचन्द्रगणि | १३७ |
| ५३ | ऐन्द्रशिरोमणिचुम्बितचरणं, | पू.मु.श्री कमलविजय | १३९ |
| ५४ | धीरं जगत्त्रयीहीरं, गभीरं च | पू.मु.श्री मणिविजय | १४० |
| ५५ | सरभसनृत्यत्सुरयुवतिकुचतट- | महाकविश्री धनपाल | १४० |
| ५६ | चरमजिन ! तं कल्याणानि | | १४२ |
| ५७ | महानन्ददुग्धोदधौ वर्त्तमानं | | १४५ |
| ५८ | यदोये चैतन्ये मुकुर इव | | १४६ |
| ५९ | परम्परपरम्पारपूरपारपरंपरम् । | | १४८ |
| ६० | महानन्दशुद्धाश्रितं देवदेवं | पू.मु.श्री बालचन्द्र | १५३ |
| ६१ | श्रीसिद्धार्थनरेन्द्रवंशकमला- | पू.आ.श्री सोमतिलकसूरि | १५४ |
| ६२ | श्रीवर्धमान ! गुणपुङ्गव- | | १५६ |
| ६३ | श्रेयःशालः सहःशाली, | | १५७ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ६४ | सिद्धार्थवंशोद्भव भूरि शोभं, | | १५८ |
| ६५ | त्रिशलासुतसौख्यदवीरजिनं, | | १५९ |
| ६६ | पूर्वं त्वं नयसारभूपति १ रभूः | | १६० |
| ६७ | त्वया जितान्यदेवर्द्धिधर्वर्ध- | | १६१ |
| ६८ | सिद्धार्थपुत्रं त्रिशलोद्भवं च, | | १६१ |
| ६९ | ॐ अर्हं ह्रीँ महावीर ! | | १६२ |
| ७० | श्रीवर्द्धमानं करुणानिधानं, | | १६३ |
| ७१ | सुरासुरश्रीसुविशाललीलावासं | | १६४ |
| ७२ | विबुधपतिखगपवरपतिधन- | | १६५ |
| ७३ | सकल-शक्र-समाज-सुपूजितं, | | १६७ |
| ७४ | प्रणम्य सम्यक् चरणारविन्दं | | १६८ |
| ७५ | सिद्धार्थभूपालकुलावतंसं गत्या | | १७२ |
| ७६ | जइज्जा समणो भयवं महावीरे | पू.आ. श्री अभयदेवसूरि | १७३ |
| ७७ | जय सिरिजिणवर ! तिहुअण- | पू.आ.श्री मुनिसुन्दरसूरि | १७५ |
| ७८ | वीरं दमिंदं जगजीवणाहं, | पू.आ.श्री हरिभद्रसूरि | १७६ |
| ७९ | जय भववणनिक्कंदण ! सिद्ध- | पू. आ. श्री जिनवल्लभसूरि | १७६ |
| ८० | दुरियरयसमीरं मोहपंकोहनीरं, | पू. आ. श्री जिनवल्लभसूरि | १७८ |
| ८१ | सुरनरवइकयवंदण !, भवदुह- | पू.आ.श्री जिनवल्लभसूरि | १८२ |
| ८२ | तिसल्लासिद्धत्थसुअं सीहंकं | पू.आ.श्री धर्मघोषसूरि | १८४ |
| ८३ | पयडियसमत्थपरमत्थवित्थरं | पू.आ.श्री गुणचन्द्रसूरि | १८५ |
| ८४ | जयई नवनलिणकुवलय- | पू.आ. श्री पादलिप्तसूरि | १८५ |
| ८५ | तिहुयणसिरिकुलनिलयं पया- | सिरिजसोभद्दसूरि | १८६ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ८६ | साहयसुहोवएसो, असेस- | पू.आ. श्री उदयसिंहसूरि | १८८ |
| ८७ | जेण परूवियमेयं दिसाणु- | पू. श्री समयसुन्दरगणि | १८९ |
| ८८ | सिरिमंदिरसुंदरकायजाय, | पण्डि.पू.पं.श्री धर्मशेखरगणि | १९० |
| ८९ | पणमित्तु पवित्तजिणक्कमणं, | महो.-श्रीमद् धर्मसागरगणि | १९२ |
| ९० | जम्मणसमयाणंतरसुमेरु- | पू.मु.श्री धनेश्वरविजयजी | १९५ |
| ९१ | निम्मलनहे वि अणहे जिणाण | महाकविश्री धनपाल | १९६ |
| ९२ | गयकलहं गयकलहं गयकलहं | | १९९ |
| ९३ | सिरिवद्धमाण सिरिवद्धमाण | | २०० |
| ९४ | नमिऊण जिणं जगजीव- | | २०० |
| ९५ | नमिऊण संखसत्थियचक्कं | | २०४ |
| ९६ | सुरविहियसमोसरणं महि- | | २०६ |
| ९७ | ओहिनाण मुणिय तित्थेसर | | २०८ |
| ९८ | जय जय जिण ! जु ( दु)- | पू.श्री शीलाचार्य | २१० |
| ९९ | परमेसरु पच्छिम-जिणवरिन्दु | | २११ |
| १०० | वीर-जिणेसर-वर-चरिउ | पू.आ.श्री अभयदेवसूरि | २१२ |
| १०१ | तागुज्जर नारिहि इह संसारिहि | पू.आ.श्री जिनेश्वरसूरि | २२७ |
| १०२ | यस्तेजोऽस्तरवी रेखपवी | पू.आ.श्री धर्मघोषसूरि | २२८ |
| १०३ | सामिय सोहगसार | पू.उपा. श्री जयसागरजी | २३३ |
| १०४ | जम्ममज्जणि जिणह वीरस्स | श्री नन्निग | २३८ |
| १०५ | जिणव जेण दट्ठट्ठ कम्म | महाकवि श्री धनपाल | २४० |
| १०६ | नमिर-सुरवर-पवर-सिर- | | २४३ |
| १०७ | भत्तिभरनमिरनरखयरतिय- | | २४६ |

पू.आ.श्री सिद्धसेनदिवाकरविरचिता

# १. ॥ श्रीवर्द्धमानद्वात्रिंशिका ॥

(भुजङ्गप्रयात)

सदा योगसात्म्यात्समुद्भूतसाम्यः
प्रभोत्पादितप्राणिपुण्यप्रकाशः ।
त्रिलोकीशवन्द्यस्त्रिकालज्ञनेता
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ १

शिवोऽथादिसङ्ख्योऽथ बुद्धः पुराणः
पुमानप्यलक्ष्योऽप्यनेकोऽप्यथैकः ।
प्रकृत्यात्मवृत्याप्युपाधिस्वभावः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २

जुगुप्साभयाज्ञान निद्राविरत्य-
ङ्गभूहास्यशुग्द्वेषमिथ्यात्वरागैः ।
न यो रत्यरत्यन्तरायैः सिषेवे,
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ३

न यो बाह्यसत्त्वेन मैत्रीं प्रपन्न-
स्तमोभिर्न नो वा रजोभिः प्रणुन्नः ।
त्रिलोकीपरित्राणनिस्तन्द्रमुद्रः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ४

हृषीकेश ! विष्णो ! जगन्नाथ ! जिष्णो !
मुकुन्दाच्युत ! श्रीपते ! विश्वरूप ! ।
अनन्तेति सम्बोधितो यो निराशैः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ५

पुरानङ्गकालारिराकाशकेशः
कपाली महेशो महाव्रत्युमेशः ।
मतो योऽष्टमूर्त्तिः शिवो भूतनाथः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ६

विधिब्रह्मलोकेशशम्भु-स्वयम्भू-
चतुर्वक्त्रमुख्याभिधानां विधानम् ।
ध्रुवोऽथो य ऊचे जगत्सर्गहेतुः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ७

न शूलं न चापं न चक्रादि हस्ते
'न हास्यं न लास्यं न गीतादि यस्य ।
न नेत्रे न गात्रे न वक्त्रे विकारः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ८

न पक्षी न सिंहो वृषो नापि चापं
न रोषप्रसादादिजन्मा विडम्बः ।
न निन्द्यैश्चरित्रैर्जने यस्य कम्पः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ९

न गौरी न गङ्गा न लक्ष्मीर्यदीयं
वपुर्वा शिरो वाप्युरो वा जगाहे ।
यमिच्छाविमुक्तं शिवश्रीस्तु भेजे
स एकः परमात्मा गतिर्मे जिनेन्द्रः ॥ १०

जगत्सम्भवस्थेमविध्वंसरूपै-
रलीकेन्द्रजालैर्न यो जीवलोकम् ।
महामोहकूपे निचिक्षेप नाथः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ११

समुत्पत्तिविध्वंसनित्यस्वरूपा
यदुत्था त्रिपद्येव लोके विधित्वम् ।
हरत्वं हरित्वं प्रपेदे स्वभावैः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ १२

त्रिकालत्रिलोकत्रिशक्तित्रिसन्ध्य
त्रिवर्गत्रिदेवत्रिरत्नादिभावैः ।
यदुक्ता त्रिपद्येव विश्वानि वव्रे
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ १३

यदाज्ञा त्रिपद्येव मान्या ततोऽसौ
तदस्त्येव नो वस्तु यन्नाधितष्ठौ ।
अतो ब्रूमहे वस्तु यत्तद्यदीयं
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ १४

न शब्दो न रूपं रसो नापि गन्धो
न वा स्पर्शलेशो न वर्णो न लिङ्गम् ।
न पूर्वापरत्वं न यस्यास्ति सञ्ज्ञा
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ १५

छिदा नो भिदा नो न क्लेदो न खेदो
न शोषो न दाहो न तापादिरापत् ।
न सौख्यं न दुःखं न यस्यास्ति वाञ्छा
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ १६

न योगा न रोगा न चोद्वेगवेगाः
स्थितिर्नो गतिर्नो न मृत्युर्न जन्म ।

न पुण्यं न पापं न यस्यास्ति बन्धः
स एकः परात्मा गतिर्मे जिनेन्द्र ॥ १७

तपः संयमः सूनृतं ब्रह्म शौचं
मृदुत्वार्जवाकिञ्चनत्वानि मुक्तिः ।
क्षमैवं यदुक्तो जयत्येव धर्मः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ १८

अहो विष्टपाधारभूता धरित्री
निरालम्बनाधारमुक्ता यदास्ते ।
अचिन्त्यैव यद्धर्मशक्तिः परा सा
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ १९

न चाम्भोधिराप्लावयेत् भूतधात्रीं
समाश्वासयत्येव कालेऽम्बुवाहः ।
यदुद्भूतसद्धर्मसाम्राज्यवश्यः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २०

न तिर्यग् ज्वलत्येव यत् ज्वालजिह्वो
यदूर्ध्वं न वाति प्रचण्डो नभस्वान् ।
स जागर्ति यद्धर्मराजप्रतापः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २१

इमौ पुष्पदन्तौ जगत्यत्र विश्वो-
पकाराय दिष्ट्योदयेते वहन्तौ ।
उरीकृत्य यत्तुर्यलोकोत्तमाज्ञां
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २२

अवत्येव पातालजम्बालपातात्
विधायापि सर्वज्ञलक्ष्मी निवासान् ।
यदाज्ञा विधित्साश्रितानङ्गभाजः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २३

सुपर्वद्रुचिन्तामणिकामधेनु-
प्रभावा नृणां नैव दूरे भवन्ति ।
चतुर्थे यदुत्थे शिवे भक्तिभाजां
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २४

कलिव्यालवह्निग्रहव्याधिचौर-
व्यथावारणव्याघ्रवीथ्यादिविघ्नाः ।
यदाज्ञाजुषां युग्मिनां जातु न स्युः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २५

अबन्धस्तथैकः स्थितो वाक्षयी वा-
प्यऽसद्वा मतो यैर्जडैः सर्वथात्मा ।
न तेषां विमूढात्मनां गोचरो यः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २६

न वा दुःखगर्भे न वामोहगर्भे
स्थिता ज्ञानगर्भे तु वैराग्यतत्त्वे ।
यदाज्ञा निलीना ययुर्जन्मपारं
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २७

विहायाश्रवं संवरं संश्रयैव
यदाज्ञापराभाजि यैर्निर्विशेषैः ।

स्वकस्तैरकार्येव मोक्षो भवो वा
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २८

शुभध्याननीरैरुरीकृत्य शौचं
सदाचार दिव्यांशुकैर्भूषिताङ्गाः ।
बुधाः केचिदर्हन्ति यं देहगेहे
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २९

दयासुनृतास्तेय निःसङ्गमुद्रा
तपोज्ञानशीलैर्गुरूपास्तिमुख्यैः ।
सुमैरष्टभिर्योऽर्च्यते धाम्नि धन्यैः
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ३०

महार्चिर्धनेशो महाज्ञा महेन्द्रो
महाशान्तिभर्ता महासिद्धसेनः ।
महाज्ञानवान् पावनीमूर्तिरर्हन्
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ३१

महाब्रह्मयोनिर्महासत्त्वमूर्त्ति
र्महाहंसराजो महादेवदेवः ।
महामोहजेता महावीरनेता
स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ३२

## प्रशस्तिः

इत्थं ये परमात्मरूपमनिशं श्रीवर्द्धमानं जिनम्
वन्दन्ते परमार्हतास्त्रिभुवने शान्तं परं दैवतम् ।
तेषां सप्त भियः क्व सन्ति दलितं दुःखं चतुर्धापि तै-
र्मुक्तैर्यत्सुगुणानुपेत्य वृणते ताश्चक्रिशक्रश्रियः ॥ (शा.वि.) १

पू.आ. श्री जयशेखरसूरिविरचिता

# २. ॥ श्रीमहावीरजिनस्तुति-द्वात्रिंशिका ॥

(उपजाति)

अकम्पसम्पल्लवलीवसन्तं, निरीहचित्ते विमले वसन्तम् ।
कामं निकामं विरसं हसन्तं, नुवामि वीरं महसोल्लसन्तम् ॥ १

आमूलविच्छिन्नभवावगाह !, संवित्तिवल्लीवरवारिवाह ! ।
जयामयातङ्ककलङ्कपङ्क-निरासनीराऽसमवीर वीर ! ॥ २

अपारसंसारविहारखिन्न-च्छायातरुच्छायममोघसेवम् ।
सेवामहे सिद्धिसमागमाय, तवागमं जीवनिकायबन्धो ! ॥ ३

महोदयं मोहतमीसमुत्थं, तमोभरं भूरितमं निहन्तुम् ।
निरन्तरायं तरणिं भवन्तं, के केऽभिसन्धि न धरन्ति नन्तुम् ॥४

महारसा देवगणात्तसेवा, तच्चित्तकामं परिपूरयन्ती ।
अङ्गावलिं चारुरुचिं वहन्ती,
वाणी विभो ! कामगवी तवेह ॥ ५

अंहोनिरासं करुणानिवासं, ससंवरं साररमाविलासम् ।
आयासदूरं महिमोरुपूरं, सन्देहमन्देहसमूहसूरम् ॥ ६

असम्परायं नवहेमकायं, विभिन्नभावारिबलं विमायम् ।
महोमहोल्लासभवं भवन्तं, सन्तो नमन्तो मुदमावहन्ति ॥(यु.)७

आभीलतालूरधरे दुरीहा-वेलाविलासे जलमन्दिरे च ।
असारनारीजलचारिजीव-समाकुले रागतरङ्गसङ्गे ॥ ८

तारं गभीरे कलिकालचण्ड-समीरसङ्घट्टसमुद्धरे च ।
निस्सीमभीमे भवसागरेऽहं, तरीसमं ते चरणं वरामि ॥(यु.)९

वाणीरसं सारतरं रसन्तो, हे वीर ! धाराधरबन्धुरं ते ।
संसारिसारङ्गविहङ्गपूगा, अखण्डमानन्दभरं धरन्ति ॥ १०

कल्लोललोला कमला सुवामा, वामावहा वाहचलं बलं च ।
चिन्तानिमित्तं परिवारमेलो, देहं दुरन्तामयगेहमेव ॥ ११

भुजङ्गभोगा नरदेवभोगा, भारो भरेणाऽऽभरणावलीयम् ।
सारा परं ते चरणारविन्द-सानन्दसेवा भुवि देवदेव ! ॥(यु.)१२

रे दम्भ ! संरम्भमिमं विमुञ्चा-खिलं बलं संहर सम्बरारे ! ।
हे मोह ! ते को महिमा समिद्धो,
देवो ममायं किल वीरनामा ॥ १३

सलीलहासालयहावभाव-विलासहेलारसमन्थरासु ।
अकुण्ठवाणीकलकण्ठकण्ठ-रोलम्बजायाजयलालसासु ॥१४

अमन्दमन्दारमरन्दबिन्दु-मत्तालिझङ्कारखाकुलासु ।
आपीडताडङ्कललाममञ्जु-मञ्जीरहारावलिभासुरासु ॥ १५

रम्भोरुदण्डासुसरोजनाल-सोमालबाहाचलकङ्कणासु ।
बिम्बीफलाभाधरपल्लवासु, कपोलपालीकलकुण्डलासु ॥ १६

विभावरीवल्लभभित्तिभाल-विलोलकालच्छविकुन्तलासु ।
अभङ्गुराडम्बरपञ्चबाण-तूणीरधम्मिल्लमनोरमासु ॥ १७

सम्पन्नराढाभरमारदारा-हङ्कारसंहारपरायणासु ।
आसीरहो सङ्गमदेवमाया-सिद्धासु रामासु विभो ! न रागी ॥१८
(कुलकम्)

नरा महासाहसबद्धसन्धा, विधाय बाढं रणमन्तरङ्गम् ।
इमं च देवं सबलं सहायं, पराजयन्ते सहसाऽरिवृन्दम् ॥ १९

विसारिवासे सुगुणे विपङ्के, पङ्केरुहाभे चरणे चिरं ते ।
वन्दारुदेवासुरभूमिपाला, मरालमालाकरणीभवन्ति ॥ २०

रङ्गत्तुरङ्गे करवालकुन्त-च्छुरीकराले बहलेभमाले ।
सन्नद्धवीरे बलिबद्धबाणा-सारेण सारे समरे समारे ॥ २१

दावे च कीलाभय भीरुभूरि-कुरङ्गबाले बहुदत्तदाहे ।
धूमोदयच्छन्नभोविभागे, संहारकालानलसन्निकासे ॥ २२

अवारपारे च सुदूरकूले, कूजन्तुखेलाऽचलवारिपूरे ।
वेलाचलाच्छिन्नतरङ्गरङ्गे, निरन्तराले बहुसिन्धुसङ्गे ॥ २३

सफालसिंहोरगरोगनाग-कुकालवेतालदरे च गाढे ।
धीरा धरन्तो विभुवीरनाम, भवे न पीडाभिभवं लभन्ते ॥२४

(कलापकम्)

विहाय वीरं गिरिमेरुधीरं, न मे परे देवगणे समीहा ।
विना रसालं गुरुसालसालं, नालं निकुञ्जं पिकचित्तहारि ॥२५

अञ्चन्ति बुद्धा अमुमेव देवं, भावारिभीवारनिवारणाय ।
को नाम भूधामतमोविकार-धिक्कारकारी रविमन्तरेण ! ॥२६

अहो न होमो न सुरापगा वा, पञ्चानली दण्डकमण्डलू वा ।
अलं परं सिद्धिपुरं तु दातुं, नीरागवीरागमसङ्गमोऽयम् ॥ २७

हहा निरालम्बमपारमोह-जम्बालजाले बहुले दयालो ! ।
इमं निजं किङ्करमेव देव !,
मज्जन्तमुद्धेहि विलम्बसे किम् ? ॥ २८

हे वीरकण्ठीरव ! मोहमत्त-करेणुमल्लं घनघोररावम् ।
उद्दाममुत्तुङ्गमुदारमङ्गि-भयावहं संहर मे सहेलम् ॥ २९

नीरोग ! नीरङ्ग ! निरन्तरङ्गा-रिभङ्ग ! निस्सङ्ग ! गुणालिचङ्ग !।
सदा सदाचारधुराधुरीण ! संवेगबुद्धिं मम देव ! देहि ॥ ३०

कामो न कामे न चिरं रिरंसा, महे महेलासु ममावहेला ।
विहङ्गमोहं समयद्रुमे ते, भवामि मे केवलमेवमीहा ॥ ३१

इत्येवं समसंस्कृतस्तवमहं निर्माय निर्मायया,
भक्त्या श्रीजयशेखरस्तव विभो ! यत्पुण्यमासादयम् ।
तेन त्वच्चरणारविन्दयुगले लीनं मनो-मामकं,
भूयाज्जन्मनि जन्मनि भ्रमरवत्पात्रं प्रमोदश्रियः ॥(शा.वि.)३२

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितम्

## ३. ॥ श्रीवर्द्धमानजिनस्तोत्ररत्नम् ॥

मङ्गलानि स ददातु भाविनां, वीरतीर्थपतिरुल्लसन्महाः ।
यस्य धर्ममधुनापि बिभ्रतः,प्राप्नुवन्त्यरिजयश्रियं बुधाः ॥ १
(रथोद्धता)

उपेयुषो यस्य शिवं तदागमोद्-
भवां बुधा वीक्ष्य पदावलीं स्फुटाम् ।
श्रयेयुरद्यापि तदध्वनीनतां,
स वीर ! सार्थप्रभुरस्तु मे मुदे ॥ (वंशस्थ) २

श्रीधर्मकल्पद्रुरयं यदुप्तः, प्रवृद्धशाखो भरतावनीतले ।
फलत्यभीष्टैरधुनापि सौख्य-
फलैर्भजे तं त्रिशलातनूजम् ॥ (उपजाति) ३

सुखं स तन्यान् मम वर्द्धमानो, जगत्प्रभुर्निर्वृतिलक्ष्मिनाथः ।
शिवं यदाज्ञानुगमाल्लभन्तेऽ-
न्यथा तु जीवा भवदुःखदण्डम् ॥ (उपेन्द्रवज्रा) ४

रागादिदोषगदनिर्दलनाय येषां,
सिद्धौषधन्ति वचनानि शरीरिवर्गे ।
अद्यापि भान्ति सरसानि शिवङ्कराणि,
वीरो महाभिषगयं जगतां मुदेऽस्तु ॥ (वसन्ततिलका) ५

वितरतु स सुखानि वर्द्धमानः,
प्रणतिमतां भगवानभङ्गुराणि ।
कलिघनतमदुर्दिनेऽधुनापि,
स्फुटयति तत्त्वमणीन् यदागमार्क्कः ॥ (औपच्छन्दसिकम्) ६

दानाद्यंह्रिबलः कुतर्कमृगभुक् स्याद्वादवादस्फुरत्-
क्ष्वेडस्तीर्थमतङ्गजान् विमर्दयन् स्फूर्ज्जत्प्रभावालधिः ।
रक्षन् शासनकाननं विजयते यद्धर्मपञ्चानन-
स्त्रैलोक्याप्रतिमाप्रधर्ष्यमहिमा वीरप्रभुं तं श्रये ॥(शा. वि.) ७

जिनः श्रीमान् वीरस्त्रिभुवनहितो धर्मचक्री परं मे,
वितन्याद् भद्रौघं सुरनरपतिश्रेणिसेव्यांह्रिपद्मः ।
श्रियोऽनन्ता दत्ते सकलजगतामप्यभीष्टाः सदोद्यत्-
परानन्दा धर्माक्षयनिधिरयं सेव्यमानो यदीयः ॥ ८
(मेघविस्फूर्जिता)

स्तुतिमिति तनुते जिनेन्द्र ! यस्ते,
मघवमहामुनिसुन्दरस्तुतांह्रेः ।
स भवति गुणसम्पदा समस्ते,
फलमिति तद्वितराऽचिरान् ममापि ॥ (औपच्छन्दसिकम्) ९

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

सिद्धपुरस्थश्रीराजविहारमण्डन-

# ४. ॥ श्रीवर्द्धमानस्वामिस्तोत्रम् ॥

जयश्रीमन्दिरे सिद्धपुरे श्रीज्ञातनन्दनम् ।
चतूरूपं जिनं राजविहारालङ्कृतिं स्तुवे ॥ (अनुष्टुप्) १

जाने स्वरूपं न तव स्पृशन्ति
गिरः स्तुतिस्तेन कथं गुणानाम् ।
तथापि यत्नोऽत्र न मादृशोऽपि-
विरुध्यते सोऽपि यतः फलाय ॥ (उपेन्द्रवज्रा) २

(वंशस्थ)

अयं च भावः सम एव योगिना-
मपि प्रवृत्ताश्च न तेऽपि चात्र न ।
गतां महद्भिः पदवीं भजन् फलं
जिनैष कोऽप्याप्स्यति तद्वदेव तत् ? ॥ ३

अनुग्रहं वा कुरुतेऽपि मादृशस्-
तवैकभक्तिप्रविलोकनग्रहः ।
स्तुतौ यदि स्याद् गुणदोषदृग् भवान्
कुतस्तदाऽऽशाऽपि फलस्य सम्भवेत् ? ॥ ४

सुखार्थिनः सर्वजनाः सुखं पुन-
र्न वै विशुद्धं व्यतिरिच्य निर्वृतिम् ।
विनाऽवसानौपयिकान्यथैष्विदं
परं सुसाधं च तदत्र यत्यते ॥ ५

द्विषन्नपि त्वां स्पृहयन् पदं परं
स्तवीति देवान्तरमीश ! यः कविः ।
तदस्य दूरे न विशीर्यते त्वयं
यदाशु देवास्तदहो ! प्रमादिनः ॥ ६

शिवश्रियो याः परमा भजन्ति ता-
स्त्वदंह्रिभक्तेर्जिन ! किङ्करीपदम् ।
नरामरेन्द्रादिरमास्तु तद्वशाः
श्रयन्ति तस्याः किमिवेति वेद कः ? ॥ ७

दधासि तोषं न न रोषविप्लवं
करोषि चिन्तामपि नैव कस्यचित् ।
बिभर्षि चाऽऽत्मैकगुणांस्तथापि ते
कथं प्रसादं स्पृहयन्ति पण्डिताः ॥ ८

त्रसन्ति युक्तं भवतः कुतीर्थिका-
हरादिकानां खलु ते हि सेवकाः ।
इमेऽपि मोहस्य जगद्विडम्बना-
पटीयसः सोऽपि यतस्त्वदत्रसत् ॥ ९

वपुर्द्धनायुःस्वजनाङ्गनादिकान्
भवे पदार्थानखिलान् प्रदर्शयेत् ।
असारभूतानपि सारताजुषः
स्वसेवकान् योऽद्धुतशौचशक्तितः ॥ १०

उपासितारोऽस्य विमोहमायिनो
ध्रुवं त्वदन्ये तदधीतशक्तयः ।

अतत्त्वरूपानपि तात्त्विकानिव
प्रदर्शयन्तेऽर्थगणान्निजाश्रवैः ॥ (यु.) ११

भजेत यद्येन जिनास्वतन्त्रतां
तदीशता तद्विजयानुयायिनी ।
स्फुटे तवान्यस्य च मोहराड्जया-
जयार्पिते तज्जगदीशतेतरे ॥ १२

सुता विनेया अपि वीरसम्भवा
भवन्ति वीरा इति सर्वसम्मतम् ।
गिरोऽपि वीरस्य नु तेऽतिवीरतां
भजन्ति विश्वाजितमोहनिर्जयात् ॥ १३

निरायुधः प्रोज्झितविग्रहः सभी-
र्भवद्विषो युक्तमगाः शिवं पदम् ।
जयं तु मोहस्य जगत्त्रयीजित-
स्त्वया कृतं वक्ति तवोक्तिरेव चेत् ॥ १४

सुधां त्वदीया व्यतियाय सूक्तयः
स्थिता रसैरत्र न कस्य सम्मतिः ।
निपीय ता यद्विबुधाः सुधाशनां
दिवं न वाञ्छन्ति शिवैकचेतसः ॥ १५

श्रुतोऽपि धर्मः कुरुते धृतिं सतां
त्वयेरितोऽन्यैस्तु भयातुरां धियम् ।
किमीक्षितोऽप्यातनुते जलाशयो
न शीतिमानं ज्वलनश्च सञ्ज्वरम् ॥ १६

त्वयैव सत्तत्त्वरमा वशीकृता:
परैर्यदृच्छाग्रहिलैर्विडम्बिता: ! ।
वसस्यतो यत्र हृदि त्वमेव ता
वसन्ति तत्रैव विभो ! किमद्भुतम् ? ॥ १७

सतां भवक्लेशरुजां क्षयात् परं
न वै शुभानुष्ठितिषु प्रयोजनम् ।
रसायनं तत्र तवैव चागम-
स्तदाऽऽभवं मेऽस्तु स एव सङ्गत: ॥ १८

स्तुवे मन: स्वं तदधीतनैपुणं
गुरोर्लवादप्यतुलागमस्य ते ।
भवासुहृद्भीतिनिपातकातरं
भवन्तमेवोपजगाम यत्प्रभुम् ॥ १९

इदं चर्तुद्वारविशालमण्डपं
निरीक्ष्य चैत्यं तव भारतोत्तमम् ।
इमानि नन्दीश्वरकुण्डलादिगा-
न्यपीक्षितानीव विभावयेद् बुध: ॥ २०

चतुष्पुमर्थाद्भुतशर्म्मसाधनं
स्तुतं चतुर्ज्ञानसमृद्धिबन्धुरै: ।
चतुर्गतिक्लेशविनाशहेतवे
चतुर्मुखं त्वां भगवन् ! प्रभुं भजे ॥ २१

भवान् यया पश्यति संविदा जगद्-
भवत्स्वरूपं हि तयैव गम्यते ।

तया समृद्धो भवतश्च नो पृथक्
ततो भवानेव भवद्गुणानवैत् ॥ २२

कथं तदज्ञस्य भवद्गुणा गिरां
स्तवात्मिकानां विषयीभवन्तु मे ? ।
तथाऽपि वाञ्छन् मणिमेव तत्प्रभा-
स्वपि प्रवृत्तः फलभाग् यथा भवेत् ॥ २३

अयं तथाऽर्थेषु गुणानुयायिषु
प्रवृत्तिमान् केष्वपि ते स्तुतिं सृजन् ।
यथावदाप्ताऽपि गुणान् परं स्तुते-
स्तदा न कर्तेत्ययतेऽधुनाऽत्र तत् ॥ (यु.) २४

एवं सिद्धपुरप्रसिद्धनगरालङ्कार ! वीर ! प्रभो !
भक्त्योद्यन्मुनिसुन्दरस्तवगणं स्तुत्वा स्वशक्त्या जिनम् ।
याचे त्वां जगदिष्टसाधनपटो ! त्यक्तं भयैः सप्तभिः
श्रेयः शर्ममयं भवारिविजयश्रीसङ्गमान्मां कुरु ॥(शा.वि.) २५

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

## ५. ॥ श्रीमहावीरमङ्गलशब्दार्थस्तोत्रम् ॥

जयश्रीविलासालयं सर्वदेवा-
सुराधीशसंसेव्यपादारविन्दम् ।
जगन्नायकं दायकं ब्रह्मलक्ष्म्याः
स्तुवे श्रीजिनं वर्द्धमानाभिधानम् ॥ (भुजङ्गप्रयात) १

प्रभो ! मङ्गलं शाश्वतं संस्तवस्ते
समाकर्षणं सम्पदां सर्वतोऽर्हन् ! ।
धृतिः कान्ति-कीर्त्ती महत्त्वं प्रतिष्ठा
सुखं चेति तस्मिन् प्रयत्नं विदध्याम् ॥ (भुजङ्गप्रयात) २

युगेऽस्मिन्निशीथेऽपि मोहापनोदात्
प्रकाशाय मोक्षाध्वनोऽदीदिपद्यः ।
स्थिरं विश्वविद्योतिसिद्धान्तदीपं
नमो वर्द्धमानाय तस्मै जिनाय ॥ (भुजङ्गप्रयात) ३

अभीष्टं त्वदीयागमार्थेक्षणाना-
मुपेयं परानन्दशर्मैव नेतः ! ।
उपायस्तु तस्य त्वदाज्ञैव सम्यक्
प्रदेहीति तामेव शुद्धां ममार्हन् ! ॥ (भुजङ्गप्रयात) ४

ध्यायन्ति ये नाथ ! पदद्वयं ते पदद्वयं ते सुधियो लभन्ते ।
महोदयं वा सुमनोमनो वा सदेव दाता हि पदं ददाति ॥ ५
(उपजाति)

जगत्त्रयत्राणचणे प्रभौ मे त्वयि प्रपन्ने न भयं कुतोऽपि ।
विश्वप्रकाशप्रवणे रवौ यन्न सेव्यमाने तमसोऽवकाशः ॥ ६
(उपजाति)

अतिशीतिसमृद्धिरद्भुता तव संविद्विभवश्च सर्वगः ।
भुवनोपकृतौ प्रगल्भसे कृतकृत्यः स्वयमीश ! तत्सुखम् ॥ ७
(ललिता)

न च रुष्यसि नापि तुष्यसि प्रभुता काऽपि तथाऽपि तेऽद्भुता ।
अपि सर्वसुरासुरेश्वरा न यदाज्ञां तव लङ्घयन्त्यहो ! ॥ ८
(ललिता)

त्रिजगन्निजजन्मनाऽप्यहो युगपत्त्वं यदलम्भयः सुखम् ।
अतिभक्तिभृतेऽपि तोषितैर्ददितुं तन्न परैः प्रगल्भ्यते ॥ ९
(ललिता)

यदनन्तमुपाधिमुक् परं भवतो ब्रह्म न तत्र साक्षिणः ।
यदिह त्वयि लीनचेतसामनुभूतौ तदपि त्रिलोकजित् ॥ १०
(ललिता)

जिनेश ! यैश्वर्यरमा हरादिषु
प्रकल्पिता सा मघवादिषु त्वणुः ।
पतिस्त्रिलोक्याश्च परो न वर्त्तते
तया तवैवेत्युपमोपमेयता ॥ (वंशस्थ) ११

त्वया परब्रह्मरसः प्रदर्शितः
स कोऽपि सिद्धान्तसरोवरे प्रभो ! ।
मनोझषाणां सुधियां यमश्नतां
सुखं भ्रमो भाति सुधाभुजामपि ॥ (वंशस्थ) १२

कृतापराधेष्वपि यास्तवाऽभवन्
विभोऽनुकम्पारससम्भृता दृशः ।
प्रयच्छ ता एव मयीयतैव यत्
करस्थितां वेद्मि जगत्त्रयेशताम् ॥ (वंशस्थ) १३

कुबोध–दुष्कर्म्म–विपद्वियोजनात्
समाहिताशेषसमृद्धियोजनात् ।
जगत्प्रभो ! धर्मसुरद्रुरोपणात्
त्वया कलावप्यनुकम्पितं जगत् ॥ (वंशस्थ) १४

तावकं पावकं यस्य पादाम्बुजं
वा समासादयत्यङ्गभाजो हृदि ।
तस्य सौरभ्यलुभ्यद्द्विरेफा इव
श्रीभरास्तं जहत्येव नो कर्हिचित् ॥ (स्रग्विणी) १५

त्वां त्रिलोकीजनत्राणदीक्षागुरुं
शाश्वतश्रीप्रदं ये भजन्ते विभो ! ।
तानुपद्रोतुमीशा द्विधा नारयः
पद्ममंशोः करस्थं तुषारा इव ॥ (स्रग्विणी) १६

स्तूयमानास्त्वदन्ये गुणैः कल्पितै-
र्नैव दातुं क्षमन्ते शिवं प्राणिनाम् ।
दुह्यमानाः प्रयत्नेन किं धेनवो
लेप्यमय्यः प्रयच्छन्ति दुग्धं प्रभो !? ॥ (स्रग्विणी) १७

ध्यातमात्रोऽपि विश्राणयस्येव तु
त्वं फलं वाञ्छितं मोक्षसौख्यावधि ।
याचितः कल्पवृक्षोऽपि दत्ते न य-
द्वस्तु विश्वे तदप्यस्ति किं किञ्चन ? ॥ (स्रग्विणी) १८

अस्ति ते सुखसमृद्धिरनन्ता
तां च सेवकगणाय ददासि ।
त्वामजस्रमिति सेवितुमीहे
रोधकं तु हर मेऽत्र कुकर्म्म ॥ (स्वागता) १९

यस्य जन्मनि जगत्त्रितयस्या-
प्युत्सवाद्वयमयं दिनमासीत् ।
सारमायुषि तदेव समग्रे
त्वं स पाहि भगवन् ! भवतो माम् ॥ (स्वागता) २०

चेत्कषायकलुषे मम चित्ते
त्वं करोषि विमलो न हि वासम् ।
तत्करोतु तदिमं त्वयि नित्यं
सिद्धमिष्टमियताऽपि ममेश ! ॥ (स्वागता) २१

सन्ति नाथ ! बहवोऽपि मदाद्या
नाम येऽत्र दधतेऽन्वयशून्यम् ।
वर्द्धमान ! भव सान्वयनामा
देहि मे त्वदनुरूपसुखानि ॥ (स्वागता) २२

त्वत्समोऽस्ति न परोऽत्र कृपालु-
र्मत्समश्च न कृपाऽऽस्पदमन्यः ।
द्वाविमौ च मिलितौ मम पुण्यै-
रग्रतो यदुचितं तदवेहि ॥ (स्वागता) २३

एवं मया स्तुत ! जगत्प्रमदार्णवैक !
श्रीसोमसुन्दरतमर्द्धिद ! वर्द्धमान ! ।
देयाः पदं नतमहामुनिसुन्दरं मे-
ऽनन्तैः सुखैर्ज्जिन ! भवारिजयश्रियाऽऽप्यम् ॥ (व.ति.) २४

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

## ६. ॥ केवलाक्षरपदं स्तोत्रम् ॥

जयश्रियं यः सकलान्तरारि-
जयैषिणां भावभृतां तनोति ।
नवीमि तं वीरजिनं मुदाऽहं
महोदयानन्तसुखैककहेतुम् ॥ (उपेन्द्रवज्रा) १

समीहिताशेषसुखौघकारी
करोषि वासं हृदि मे यदीश ! ।
अहो ! तदेषोऽपि जनो दधाति
वीराधिकारं विनुतौ तवाऽपि ॥ (उपजाति) २

बिभेति यो घोरभवाम्बुराशितः
समीहते वा शिवसातसम्पदः ।
लभेत नोपायमयं परं यतो
भवन्तमेवेति निषेवते सुधीः ॥ (वंशस्थ) ३

लसन्ति पुंसां सुखसम्पदोऽखिला
भजन्ति नाशं सकला भियः पुनः ।
तवैव पादाम्बुजवन्दने रतः
को नेहते तानि कृती कलावपि ॥ (उपजाति) ४

हितानि वाञ्छन्ति तदेककारणं
भवन्तमीशं न भजन्ति चादृताः ।
उपायहीनाः सदुपेयरागिणो
वृषा विषीदन्ति जडा हहा ! परे ॥ (वंशस्थ) ५

तपांसि तेषां खलु देहदण्डनं
वृथैव योगागमसङ्गमादराः ।
शुभाय नैवापि कुदेवसेवना
भवन्तमीशं किल ये न जानते ॥ (वंशस्थ) ६

भवन्ति वै तावदमी भवामया
महालया देव ! भयाय देहिनाम् ।
रसायनाभानि वचांसि ते मुने !
भजन्ति नो यावदिमे कृतादराः ॥ (वंशस्थ) ७

अपारयन्तो भवदागमोदितं
विधिं विधातुं विषयाभिलाषिणः ।
मनोऽनुकूलं कुमतानि ये गिरा
परे भजन्ते कुधियां शिवाशया ॥ (वंशस्थ) ८

विरागभाजी भिषजोदिते कटौ
महौषधौघे मधुरैकरागिणः ।
ते लान्ति किम्पाकफलानि मोहिता
रिपूपदेशेन निरामतेहया ॥ (उपजाति) ९

मनोहरानन्तसुखौघसम्पदां
तवैव सेवा दधते निदानताम् ।
परेऽपि जानन्ति विचारणादिदं
तदेव तेषां हरते तु मूढता ॥ (वंशस्थ) १०

तनोति नो भाविशिवेन्दिराणां
विना भवन्तं किल कोऽपि मोदम् ।
ऋते दिनेशं कमलाकराणां
विबोधमाधातुमलं नु को वा ? ॥ (उपेन्द्रवज्रा) ११

वाणी नृणां वीर ! विभो ! तवैव
मोहान्धकारं नयते विनाशम् ।
न जाङ्गुलीजापमृते महाहि-
गरो विलीयेत जनाङ्गसङ्गी ॥ (उपजाति) १२

तमो यदन्तं न हि नेतुमीशते
विधोः करा नापि दिनेशितू रुचः ।

शरीरभाजां तदपीदमान्तरं
जिनेश ! वाचो लघु नाशयन्ति ते ॥ (वंशस्थ) १३

भजन्ति ते वीर ! विभो ! कथं गिरः
सुधारसेनोपमितिं मनीषिताः ? ।
भवाघतापं मरणं जरां च या
हरन्ति चेतोविषयीकृता अपि ॥ (वंशस्थ) १४

स कोऽपि दीपो भवताऽऽगमाङ्गवा-
नदीपि नैकान्तमतावलम्बनः ।
पतङ्गसङ्घैरिव लङ्घितुं हि यः
परैरहो ! शाशकितो न कैरपि ॥ (वंशस्थ) १५

तवाननेन्दूदितगोततिः सतां
करोति तं कञ्चन शीतिमोदयम् ।
सुरासुराऽवारिततापसम्भवाः
कषायदावा अपि यं हरन्ति न ॥ (वंशस्थ) १६

गोसङ्गभाजा भवता महावृषो
वृषाधिपाजानि सकोऽपि भारते ।
एकोऽपि यो लङ्घयितुं बहूनलं
संसारकान्तारमनन्तमङ्गिनः ॥ (उपजाति) १७

विभो ! नवाऽहो ! तव वीरतेह
गणाधिपानां हृदये निलीनम् ।
जघन्थ सन्देहमहारिजातं
सुवाणिबाणैरपि रूपहीनम् ॥ (उपेन्द्रवज्रा) १८

तवागमालोचनचारिचेतसः
करोति मे वीर ! भयं भवोदधिः ।
तनोति मोहः कुमतिं तथापि तां
यया भजे वाणितरीं न तेऽनिशम् ॥ (वंशस्थ) १९

इमं रिपुं नाशय नाथ ! तेन मे
विबाधकं ही बहुधा कदाशयैः ।
पराभवो यः किल सेवके रिपो-
रयं धुनीते विभुतागुणं विभोः ॥ (वंशस्थ) २०

जडा विषीदन्ति सुरान्तराऽर्चनैः
समीहया भूपतिसम्पदामपि ।
नुतेरनन्तो महिमा स कोऽपि ते-
ऽवहीलना तासु ययापि ते फले ॥ (वंशस्थ) २१

तवागमागाधसुधासरोवरे
निलीयतां मेऽज ! तथा मनोझषः ।
यथा भवापायदवानलोदितं
न विन्दते तापभरं मनागपि ॥ (वंशस्थ) २२

भवन्तु नूनं सुकृतानि तानि मे
सदा मनो हे भुवनैकबान्धव ! ।
इदं निलीनं तव पादपङ्कजे
दृढानुबन्धं चलतां जहाति यैः ॥ (वंशस्थ) २३

समीहमानः शिवमेव कोविदो
यतेत संसारसुखार्णवे न तु ।
परैरनेनैव च वञ्चिता जना
मतो भवानेव गतिः स देहिनः ॥ (वंशस्थ) २४

न दातुमीशा मरुतां महीरुहा
न यां घटा नो मणयो न धेनवः ।
अनन्तसातोदयिनीं ददाति ता-
मपीश ! पुंसां कमलां तवानतिः ॥ (वंशस्थ) २५

अपारसंसारविकारभेदिने
सदा परानन्दचिदेकयोगिने ।
समीहिताऽशेषसुखौघदायिने
नमो नमो वीरजिनाय तायिने ॥ (वंशस्थ) २६

मङ्गलानि विलसन्ति समन्ता-
दानमन्ति रिपवो जिन ! पुंसाम् ।
सम्पदः सममिहापि सुखौघैः
सम्भवन्ति भवतो नुवतो वै ॥ (स्वागता) २७

एवं वीर ! जिनामुनाऽपि मयका मुग्धस्तवेन स्तुतो
दृब्धेनेश ! सुकेवलाक्षरपदैर्भक्त्या कृपावारिधे ! ।
आरोग्योत्तमबोधिबीजविभवं दत्त्वा प्रसद्याशु मे
देयान्निर्मलकेवलाक्षरपदं प्रोद्यज्जयश्रीभरम् ॥ (शा.वि.)२८

एवं वीरजिनं जगत्त्रयपतिं श्रेयोविलासालयं
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो
मोहद्वेषि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥(शा.वि.)२९

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

## ७. ॥ श्रीवर्द्धमानजिनस्तोत्रम् ॥

जयश्रीनिलयं यस्य पदाम्भोजं भजन् भवी ।
भवतेऽभीप्सितं श्रेयः श्रीवीरं तं स्तुवे विभुम् ॥ (अनुष्टुप्) १

(शिखरिणी)

न शब्दव्युत्पत्तौ मम चतुरता नापि कविता-
गुणो नार्थोत्पत्तिः स्फुरति पटुता नो भणितिषु ।
प्रयत्नः स्तोतुं त्वां तदपि यदयं हेतुरिह मे
विभोऽनन्योपाये शिवसुखफले गाढरुचिता ॥ २

न ये पात्रं मैत्र्या न वशकरणा नोद्यच(च्च?)रणा
न शीलाढ्या नो वा दमितमनसो नोग्रतपसः ।
दधानैरेतेष्वप्यतुलकरुणामेष जगदे
शिवस्योपायोऽर्हन् ! मुनिभिरिति ते संस्तुतिरियम् ॥ ३

नयैरेकैकांशग्रहणनिपुणैर्नाथ ! न गुणा-
स्तवाऽनन्ताः शक्याः स्तवयितुमनन्तैरपि युगैः ।
प्रमावाक्यं तत्तान् जिन ! सममनन्तानभिदधत्
स्तुवन्ति स्तोतारस्तव मतविदो वादिन इव ॥ ४

पुनर्जन्माभावोऽखिलजनहितैकार्थकरणं
न वैक्लव्यं कार्ये क्वचिदपि न चौत्सुक्यमपि यत् ।
कदाऽप्यस्वास्थ्यं नेत्यनुपमतयैवाभवपरान्
स्वरूपं ते देवानधरयति मुग्धाशयमुषः ॥ ५

महानन्दप्राप्तौ न भवति रतिः संसृतिसुखे
गतेऽत्यन्ताभावं वपुषि खलु जन्माऽस्ति न पुनः ।
समग्रैश्वर्याप्तौ प्रभवति न मित्रेतरमति-
र्बुधंमन्यैरन्ये कथमनुसृतास्तच्छिवधिया ॥ ६

विमुक्तो रागाद्यैः प्रथयति फलं नो तदुचितं
विनाऽमी नादृष्टं न च तदुदये निर्वृतिसुखम् ।
स्वयं नाप्राप्तस्तत्प्रभवति परेभ्यो वितरितुं
त्वदन्यं सेवन्ते कथमिव परे तेन कुधियः ? ॥ ७

अमेयास्ते बाणा भुवनजयिनः शम्बररिपोः
कषायास्ते योधा हतनर-सुराधीश्वरमदाः ।
अयं मोहस्तेषां प्रभुरपि भटत्वे स्तुतिपदं
विभो ! तावद्यावन्न तव चरितं संस्पृशति हृत् ॥ ८

उपादित्सोपेक्षा प्रभवति जिहासाऽपि च यतः
प्रमाणं तद् ज्ञानं व्यपगतविवादं मम परैः ।
उपागामि ज्ञानं स्वमपि न तथा कैश्चन नु य-
त्कृतोपेक्षं त्वय्यप्यफलमिति नाऽसाधु तदपि ॥ ९

वदन्तो याथात्म्यात्प्रमितिविषयं वस्तु सकलं
त्वयाऽर्हन् ! ये भङ्गा निखिलविदुषा सप्त गदिताः ।
न वादीन्द्राः केचिद्बहुविधकुतर्कोद्धुरगिरो-
प्यतिक्रान्त्यै तेषां दधति जलधीनामिव बलम् ॥ १०

(वंशस्थ)

नया मिथो मत्सररीणगोचरा
यशो लभन्ते गगनाम्बुजस्य ये ।

त एव तत्त्वार्थमया वचस्तव
प्रपद्य मैत्रीं दधतेऽङ्गिसङ्गवत् ॥ ११

निवर्त्तते नैव कुदेवकुग्रहो
विना त्वदुक्तावगमाद्यथायथम् ।
न तन्निवृत्तिं च विना स तत्परे
कथं निरस्यं त्वितरेतराश्रयम् ? ॥ १२

न दृष्टिरागी भजते त्वदागमं
न वेत्ति तत्त्वं भवतश्च तं विना ।
न दृष्टिरागं च जहाति तज्जडो
हताः कुतीर्थ्या न्विति चक्रकेण ही ॥ १३

एकैकधर्मावधिबुद्धयः परे
कथं लभन्तेऽर्थमनन्तधर्मकम् ? ।
एकैककूपोदरदर्शिनः पतिं
सरस्वतीनामिव दर्दुरार्भकाः ॥ (उपजाति) १४

अतो भवानेव समस्तदृग् जगौ
स्वरूपजस्याऽवितथं तथा विदन् ।
परो मरालाल्लभते हि वैधसा-
न्न वै जगत्सर्वजलाश्रयात्मकम् ॥ १५

स्वरूपबोधेऽप्यविदग्धबुद्धयस्-
त्वदीरिते वस्तुनि तीर्थिका मुधा ।
गृणन्ति दोषान् खलु काचकामलो-
पलिप्तनेत्रा इव शुद्धनाटके ॥ १६

जिन ! स्वरूपं तव यन्निरावृति
स्फुटीभवे तादृश एव संविदः ।
उदीर्णमोहप्रतिरोधकेक्षणाः
समीक्षितुं तत् प्रभवः कथं परे ? ॥ १७

गिरा प्रपद्यापि भवन्तमीश्वरं
भवन्ति केचित्कुधियो भवास्पदाः ।
जगज्जिगीषाऽऽतुरविक्रमः परं
न तीर्थिकैस्तुष्यति मोहवैर्ययम् ॥ १८

त्वां प्रत्यजं विप्रतिपन्नचेतसः
कथं न शोच्या भगवन् ! कुतीर्थिकाः ?।
मतास्तथैवाप्रतिपन्नका अपि
ध्रुवं प्रपद्यापि विराधकाश्च यत् ॥ १९

त्वयि प्रपन्नेऽपि विभौ किमङ्ग ! मे
सृजन्ति रागादिरिपुव्रजा व्यथाम् ?।
अहो ! विशुद्धिर्मनसः सकर्मणां
सुदुर्लभाऽमी प्रभवन्ति यां विना ॥ २०

कुज्ञानदर्शनकपाटयुगेऽभविष्यद्
दुर्लक्षता तव विभो ! यदि नार्गलेयम् ।
मोहोच्चदुर्गमतिगत्य सुदर्शनाप्ति-
द्वारेण के शिवपुरं न तदाऽध्ययास्यन् ? ॥ (व. ति.) २१

निर्दोषे ते भुवनविदितेऽप्यद्वितीये चरित्रे
मुह्यन्नर्हन्नपि शिवगमी तीर्थिकैः सङ्गतोऽङ्गी ।
छन्नः काचैरिव वरमणिर्यां विनेष्टार्थभाग्नो
सामग्रीं तामभवफलदां देहि यत्स्यां कृतार्थः ॥(मन्द्राक्रान्ता)२२

दानं चारु न मे न शीलमतुलं नोग्रं तपो नो स्थिरो
भावो नाऽतिदया क्रियासु न रुचिर्नान्योऽपि कश्चिद् गुणः ।
भावि ब्रह्म तथाऽप्यतः स्तवनतः सम्बन्धमात्रेण ते
तुच्छादप्यभवैवमस्मि मुदितश्चिन्ता तवैवाग्रतः ॥(शा.वि.) २३

देवसुन्दर ! मुदैवमनन्तज्ञानसागर ! मयाऽपि नुतोऽर्हन् ! ।
सोमसुन्दरतरां कुरु बोधिं स्याद्यतो मम भवारिजयश्रीः ॥ २४

(स्वागता)

एवं वीरजिनं जगत्त्रयपतिं श्रेयोविलासालयं
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥(शा.वि.)२५

पू.आ.श्री जिनप्रभसूरिविरचितम्

## ८. ॥ श्रीवर्द्धमाननिर्वाणकल्याणकस्तवनम् ॥

श्रीसिद्धार्थनरेशवंशकमलाशृङ्गारचूडामणे-
र्भव्यानां दुरपोहमोहतिमिरप्रोज्ज्वासनेऽहर्मणेः ।
कुर्वे किञ्चन काञ्चनोज्ज्वलरुचेर्निर्वाणकल्याणक-
स्तोत्रं गोत्रभिदर्चनीयचरणाम्भोजस्य वीरप्रभोः ॥ (शा.वि.)१

(रथोद्धता)

प्राप्य देव ! शरदान्द्विसप्ततिं शीतगौ पवनदेवतर्क्षगे ।
तामुपायत रसेन कार्तिकाऽमावसी निशि शिवश्रियं भवान् ॥२

हस्तिपालकनृपालपालिता पूर्न पूरयतु मन्मनः शुचा ।
यत्र दर्श इव चन्द्रमा भवानस्तमाप भवतापहा पुनः ॥ ३

ऊर्जदर्शनिशि दर्शितर्द्धयस्तत्र पुर्यखिलवर्णजाः प्रजाः ।
त्वन्महोदयमही तयाऽधुनाऽप्युत्सवं विदधतेऽनुवत्सरम् ॥ ४

यैर्ध्वनिस्तव पपे श्रवःपुटैः षोडशप्रहरदेशनाविधौ ।
तान्निवेश्य धुरि धन्यताजुषां रेखया न खलु सुप्यतेऽन्यतः ॥५

पुण्यपापफलपाकवर्णनामध्यमध्ययनपङ्क्तियुक्शतं ।
व्याकृथाः स्फुटमस्पृष्ट षट्कृतिव्याकृतीश्च परिषत्पुरस्तदा ॥६

जीवति त्वयि जिनेन्द्रभूतिना त्वत्प्रणामविधिभङ्गभीरुणा ।
नूनमेष्यत न देव ! केवलज्ञानसम्पदनुरागभागपि ॥ ७

यद्विधेयमुपदिश्य गौतमः प्रैषि भक्तिभृदपि त्वयाऽन्यतः ।
रोगिणः कटुकजायुपानवज्ज्यायसेऽस्य चकृ(क्लृ)पे गुणाय तत्॥८

त्वद्दिदृक्ष्ववतरत्सुरावली या न देहमणिभूषणांशुभिः ।
सा कुहूरजनिरस्ततामसा पूर्णिमानिशमुपाहसद् ध्रुवम् ॥ ९

निर्वृते त्वयि विलोक्य विष्टपं ध्वान्तपूरपरिपूरितोदरम् ।
रोदयन्त इव रोदसीं प्रतिश्रुद्ध्वरेण रुरुदुः पुरन्दराः ॥ १०

वह्निवायुजलदेश्वरैः सुरैस्तैलपर्णिककृताङ्गसंस्कृते ।
भूतिमात्रमपि भूतिधाम तेऽप-
स्पृशन् बत न तान् रजोऽस्पृशत् ॥ ११

भक्तितो महितुमीश ! वासवास्तावकीनहनुसङ्ग्रहं व्यधुः ।
नूनमक्षविजयाय तावकानुग्रहेण हनुमत्त्वमिच्छवः ॥ १२

कुग्रहा न तव जातु शासनं वीर ! बाधितुमलम्भविष्णवः ।
एककः स खलु भस्मकग्रहो बाधते भवदुपेक्षितस्तदा ॥ १३

जग्मुषि त्वयि शिवं नराधिपास्तत्क्षणं गृहमणीनबोधयन् ।
ये बभुः कुनयकाननप्लुषस्त्वत्प्रतापशिखिनः कणा इव ॥ १४

यत्र कश्चन मुनिस्त्वया समं युक्तिमेयरितरैर्जनैरिव ।
दुःषमासमयभावलिङ्गिनां व्यञ्जितेन गुरुनिर्व्यपेक्षिता ॥ १५

प्रस्थिते त्वयि शिवाय तत्क्षणं सम्मुमूर्छुरधिपृथ्वि कुन्थवः ।
क्षुद्रजीवबहुलामतः परं सूचयन्त इव भाविनीं महीम् ॥ १६

यत्र यत्र चरणौ त्वयाऽर्पितौ तत्तदास्पदमगादमापताम् ।
एकया पुनरपापया पुरापापयाऽजनि सुरोक्तिनामतः ॥ १७

यत्र मुक्तिमगमः शमीद्रुमावाप पापतुहिनार्कतापवत् ।
प्रीतिमीति तरुकुञ्जभञ्जने नाग नागकरणं करोतु नः ॥ १८

यः पठत्यशठधीस्तव वीरस्तोत्रमेतदवधानसमेतः ।
तत्र भावरिपुराजि रयश्रीभाजि न प्रभवति प्रबलापि ॥ १९
(स्वागता)

पू.आ.श्री जिनप्रभसूरिविरचितम्

## ९. ॥ श्रीमहावीरस्वामिस्तवनम् ॥

असमशमनिवासं वासवाचार्यवाचा-
मविषयमहिमानं ज्ञानसंक्रान्तविश्वम् ।
प्रणमदमरचूडारत्नघृष्टांघ्रिपीठं
जिनवरवरद त्वां नौमि भक्तिप्रयुक्तः ॥ (मालिनी) १

बालस्यापि ममोक्तं तव स्तुतावर्थमेष्यति बुधानाम् ।
कन्याकर्तितसूत्रे न गौरवं मान्त्रिकाः किमु वहेयुः ॥(आर्या) २

यो मिमीतेन्त्यवार्णोघपाथः पलैर्यः परिच्छेत्तुमीष्टे नभःस्वाङ्गुलैः।
योंऽघ्रिवेगेन कल्पान्तवातं जयेत्
त्वद्‌गुणानामियत्तामसौ वेत्ति चेत् ॥ (स्रग्विणी) ३

अभिनुत्य भवन्तमनन्तगुणं स्तुतिकारगिराजिसतीचरितम् ।
यदियं गुणरेणुकणाक्ततनुं स्तवनीयमुपैति न जातुपरम् ॥ ४
(तोटक)

न दृष्टेष्टबाधःपरैर्लङ्घ्यता न त्वदुक्ते न चाशक्यकृत्योपदेशः।
तथापि श्रितास्तन्न मिथ्यात्वलीना
न निम्बप्रियाः किं द्विषन्तीक्षुमुष्ट्राः ॥ (भुजङ्गप्रयात) ५

उचितञ्जनोमृतरुचिर्लभतां वृषसंश्रयेण परमोच्चपदम् ।
प्रमदाश्रितेप्यहहतत्रलभां प्रवदन्ति भवदध्वमुचः ॥ ६
(प्रमिताक्षरा)

फलगोचरलक्षणैरुपेतं गदितं यद्भवता प्रमाणयुग्मम् ।
कृतयत्नशता अपीह दोषानलमुद्‌भावयितुं न वादिनोऽन्ये ॥७

संदेहान्युगपदपोहितुं नृतिर्यक् देवानां श्रुतिषु सुधारसं निषेक्तुम्।
त्वां हित्वा कलयितुमीश-भाषातद्-
गौप्यं क इव गिरैकयालमन्यः ॥ (प्रहर्षिणी) ८

न के मनःशुद्धियुगाग्रयोजितप्रबोधचारित्रतुरङ्गमद्वयम् ।
रथं समारुह्य तवेश ! शासनं समासदन् मुक्तिपुरीमविघ्नतः ॥९
(वंशस्थ)

योगेनकिं किमथ तीर्थपरम्पराभिः
किं दैवतैः किमु तपोभिरधीतिभिः किम् ।

मन्त्राक्षरञ्जिनजिनेति जपन्तु सन्तः
पारत्रिकैहिकमुपेयमुपेतु कामाः ॥ (वसन्ततिलका) १०

त्वन्नामकामसामर्थ्यानध्यायध्यायतः सतः ।
सम्पनीपद्यते सद्यः सम्पत्कम्पपराङ्मुखी ॥ (अनुष्टुप्) ११

असत्परीणामपरश्वधेन मच्चित्तपेटां प्रसभं विभिद्य ।
ज्ञानादिरत्नानि हरन्ति चौरा रागादयस्तान्निगृहाण नाथ ! ॥१२
(उपजाति)

त्वद्विधेप्यधिपतौ शिवपुर्यां श्रूयते नहि बहुर्जनवासः ।
धिग्विधिःकुनृपतावपि मोहे वीक्ष्यते भवपुरी जनपूर्णा ॥१३
(स्वागता)

नाथ ! बाधितुमनाथवत्सुधाभोजिनोपि विबुधान् यमक्षमः ।
मानवांस्तु तव पीतदेशनावाक्सुधान् बत दृशापि नास्पृशत् ॥१४
(रथोद्धता)

युक्तिस्फूर्जत्तीक्ष्णधाराशये यैश्चक्रे यौष्माकीणवाणीकृपाणी ।
तेषां भावारातिभिर्युद्धकेलिं
कुर्वाणानां स्यात्करस्था जयश्रीः ॥ (शालिनी) १५

प्रमथितमिथोविरोधाः सुहृदीभूयासतेङ्गिनो निखिलाः ।
त्वद्देशनाभुवमिता नयवादा इव भवत्समयम् ॥ (आर्या) १६

इन कुतीर्थिककल्पितगर्हणा वचनभस्मभिरुज्ज्वलितेप्यहो ।
तव यशोमुकुरे परदैवतव्रजयशोनखलप्रतिबिम्बितम् ॥ १७
(द्रु.वि.)

रुन्धन्नेधितमन्यतीर्थिकततेरौद्धत्यवन्ध्याचलं
सच्चेतोजलपङ्कहृन्मधुसुहृद्धातापिसन्तापनम् ।

हेलाशोषितमोहराजमहिमाम्भोधिर्जिनत्वद्यशो-
गस्तिः सैषब(व)भस्तिहस्तिदशनच्छेदावदातच्छविः ॥ १८
(शा.वि.)

शेषोहिर्यस्य मूलङ्कनकगिरिरपि स्कन्धबन्धश्चतस्त्रः
काष्ठाःशाखाःप्रशाखाविदिशउरुतलं व्योमजालन्दलानाम् ।
ताराः पुष्पाणि सिद्धास्पदमथ शिखरं पुष्पदन्तौ फलश्री-
च्छायाविश्रान्तविश्वः स्फुरति तव यशःपादपः सोयमुच्चैः ॥१९
(स्त्रग्धरा)

ऊर्ध्वोर्ध्वमारोहति हृन्नभोनृणां त्वद्भक्तिरागांशुपतिर्यथायथा ।
तथातथांहःपटली बलीयसी छायेव देव ! क्षयति प्रतिक्षणम्॥२०
(उपजाति)

स्वजनकमनस्तापाधानोद्भवाघविपक्त्रिम-
व्यसनमपि ही हन्तुं कामं न शक्तिमधुःपरे ।
तव पुनरिन श्रीमोहोर्वीपतिं सबलं द्विधा-
परिदलयितुं काष्ठाप्येकालगन्न रणाङ्गणे ॥ (हरिणी) २१

न दोषाणां स्वस्मिन्नधिप ! भवताऽदायि वसति
र्गुणानां नैवान्यैर्हरिहरविरञ्चिप्रभृतिभिः ।
शिवन्तेषामुद्भासयितुमभिसन्धिस्तव भवं
तदा तातेभ्यस्तेन तु किमिव वैशिष्ट्यमधिकम् ॥(शिखरिणी)२२

आपत्कोटीविघटनपटुः सम्पदाकृष्टिमन्त्रः
श्रेयोवल्लीवनवनधरस्तत्त्वधीसौधदीपः ।
विद्याकन्दो रतिपतियशःक्षीरबभ्रुप्रचार-
श्चेतोवृत्तिं मम रमयतु त्वत्पदाब्जप्रणामः ॥ (म.क्रा.) २३

कषायतपनातपग्लपितमप्रशस्तक्रिया-
नुचिन्तनमलीमसं विषयतर्षपर्याकुलम् ।
भवद्गुणकदम्बकस्तुतिसुधाहृदे मज्जनं
जिनेशितरनुक्षणं सृजतु मामकीनं मनः ॥ (पृथ्वी) २४

त्रिभुवनभवनाभोगभावभासनगृहमणिसम नतजनताभिमतार्थ-
सार्थवितरणकल्पद्रुम विविधिछन्दोजातिरुचिरमिति संस्तव-
मकरवमप-वृजिनप्रभसूरिनिवहमहनीयमहन्तव यत्कण्ठपीठ-
सीम निलुठति सैष तस्य पुरुषस्य जिनकरतलमुपैति
सकलेष्टफलसिद्धिरिद्धगुणतरुविपिनः ॥ २५

पू.आ.श्री जिनप्रभसूरिविरचितम्

पञ्चवर्गपरिहारमयम्

## १०. ॥ श्रीवीरजिनस्तवनम् ॥

(आर्या)

स्वः श्रेयससरसीरुह, सूरं श्रीवीरं ऋषिवरं सेव ।
सविशेषहर्षरसवश, सुरासुरव्यूहसेव्यांह्रिम् ॥ १

अश्वोवसीयससरः, शोषसहस्रांशुराश्रयः सहसाम् ।
संसारलालसां वो, भूयाल्लवशो वशी वीरः ॥ २

विषयाशीविषवीश्वर, हिंसारस सरसवारिरुहशिशिर ।
विश्वस्य रोषशार्वर, संहाररवे शिवाय स्याः ॥ ३

आशंसवः शिवश्री, विलासलीलां विहाय सुरयोषाः ।
यं शिश्रियुः स्वरीशाः श्रीवीरः श्रेयसेऽसौ वः ॥ ४

हरहासहंसशशिहा–रहारियशसोः शिवैषिसंश्रययोः ।
ईहे वरिवस्यायै, वीरेशस्यांह्रिसारसयोः ॥ ५

शीलसरोवरलहरी, विहारशिशिरा असंवरीयो वः ।
वीरस्य व्याहारा, ह्रियासुरशरीरशौर्यहरा ॥ ६

उरुसंशयशैलस्वरु, ररिहा वीराह्वयो वरवृषांसः ।
अवसेयाल्लौल्यं वा, वर्षारुहवारिवाहरवः ॥ ७

सरलाशयाः सुशीला, रिरंसवः श्रायसश्रिया सह ये ।
येषां श्रीवीरेश्वर, सेवारस एव हर्षाय ॥ ८

वीर शिवालयसरसी, वरलावर सर्वविषयविल्लास्य ।
संवरसारसवासर, सर्वेषां लोलवीष्यवृषम् ॥ ९

शीलश्रियो विवाहावसरे विश्वाश्रयो रसावलये ।
आवर्षं वसुवर्षी, विशां विशालैरयैरासीः ॥ १०

आशंसे सहसाहं, वासवसेवार्ह शिवरसाल हरे ।
रुहविश्रसावसाय, व्यवसायायासविरहवरम् ॥ ११

अहरुषयोर्विशरारु, श्रीसर्वस्वं हि शशिसरोरुहयोः ।
अशरारुस्वास्यश्री, लास्यविलासैर्विलोलयसि ॥ १२

संसारसलिलराशेः, शोषे ऋषिरौर्वशेय इव वीरः ।
सर्वाशालासियशो, राशिरहिंसारहः शाला ॥ १३

उरसिशयालुः श्रेयः, श्रिया असंवरसरोरुहशशीव ।
रायाल्लयं शिवावह, रसाविहारः स्वसेवायां(सन्दानिकम्) ॥१४

अविषह्यशिरःशूलं, विश्वलिहो विषयवैरिवारस्य ।
व्याहरसि वृषरहस्यं, शस्याय शरीरिविसराय ॥ १५

शैशव एव सुसारः, स्वरहार्यशिरोविलोलसेव्यांह्रे ।
संहरसि हेलयांहः, सिंह इव वशेश्वरं सहसा ॥ १६

शिशिरांशुशिशिरलेश्यै, रार्यव्यवहारलालसैररुषैः ।
संश्रीयसे ऋषीशै, रीर्ष्यावल्लीलवासिवरैः ॥ १७

उल्लासय स्वसेवारसशीले विशि शिवावलीं वीर ।
अविरलविषयहलाहल, लहरीसंहारसुशिरीष ॥ १८

श्रवसी वशयसि सौवै-र्व्याहाररसैः सुरासुराहिविशां ।
यैः सह रसालयाऽहा, सिहारहूरारसाभरस ॥ १९

रैहारिशरीरश्रीः, सुरासुरावार्यवीर्यशाली यः ।
संवरवैरियशःशशि, राहुरशेषश्रियां वासः ॥ २०

वरिवस्यः सूरिवरै, र्विहाय आशारसाविहारियशाः ।
अंहोऽसुरवंश हरिः, सुरशैलशिलाविशालोराः ॥ २१

शुश्रूषुशिष्यविसर, श्रवःसुहर्षरसवर्षिसंरावः ।
अविलयवार्यैश्वर्य, श्रीयोषाश्लेषरसविवशः ॥ २२

सैषोऽसहायवीरः, शिवारिवाराहवेष्वसुसहेषु ।
विश्वस्य सुरोर्वीरुह, आयुष्यः श्रेयसां वीरः ॥ २३

संसारो रुषिवालय, वारिविशोषौर्वहव्यवाहो वः ।
अव्याल्लीलाऽलससुर, विलयाहावाऽविषयशीलः ॥ (पं. कु.) २४

अह्रियोऽलसस्य शिष्या, वयवलवस्याऽयविरहविरसस्य ।
श्रीवीर वीरयरया-ल्लेश्या अश्रेयसीरस्य ॥ २५

यः पञ्चवर्गपरिहारमनोज्ञमेतच्चेतश्चमत्कृतिकरं गुणकीर्तनं ते ।
जिह्वाग्रवर्ति वितनोति विपद्वितानाः
श्रीवीरभाग्ययुजि न प्रभवन्ति तस्मिन् ॥(वसन्ततिलका) २६

पू. आ.श्री जिनप्रभसूरिविरचितम्
विविधालङ्कृतशब्दलालित्ययुक्तम्

# ११. ॥ श्रीवर्द्धमानस्वामिस्तवनम् ॥

(उपजाति)

श्रीवर्द्धमानः सुखवृद्धयेऽस्तु यशःप्रतापैरभिवर्द्धमानः ।
सिद्धायिका रक्षति यस्य तीर्थं विघ्नौघतः सन्ततमेव देवी ॥१

जिनेन्द्र ! नेन्द्रा अपि तावकीनान्
स्तोतुं गुणान् शक्तिजुषस्तथापि ।
भक्त्येरितस्तान् कतिचिन्नवीमि
नाज्ञः स्वमात्रां विविनक्ति वीर ! ॥ २

नयाध्वनां नाथ ! कृतैकमत्यैरश्रान्तमेकान्तहितोपदेशैः ।
करैरिवोष्मद्युतिना तमिस्रास्त्वया नतानां भवभीर्निरासि ॥ ३

प्रणीयतेऽस्माद्भुतरत्नचित्रैः समं विमानैस्त्रिदशागमेन ।
कल्याणकैर्भूवलयं त्वदीयैस्त्रिविष्टपान्यूनमनूनऋद्धि ॥ ४

भवन्तमीशं भजतोऽनुजातु दुःखान्यलं कानि च नापि तापैः ।
पाणिस्थचिन्तामणिमङ्गभाजं का निर्ऋतिः पीडयितुं शशाक ॥५

सूर्यप्रभा मोहतमःसमूहव्यापादने संशयवल्लिदात्री ।
त्वद्देशनावाग् जयति त्रिलोकीलोकस्य कर्णामृतवृष्टितुल्या ॥६

(इ.वज्रा)

रिपून् विजित्यान्तरगानगाधवीर्येण सत्ज्ञानरमां निवेश्य ।
ऊरर्यकार्षीरिन मुक्तिपुर्याः साम्राज्यमज्यानि सुखोत्करेण ॥७

भिस्सेव पीयूषभुजा जनस्य मथ्नाति मिथ्यात्वविषोर्मिपूरम् ।
तव प्रभा नेत्रपुटैर्निपीता कृतस्थितिर्वर्ष्मणि निष्कलङ्के ॥ ८

वृत्ताष्टकाद्यक्षरनामधेयैस्तदन्त्यवर्णाहितनामकेऽह्नि ।
इयं स्तुतिर्वीरजिनस्य दृष्टा करोतु कल्याणमनुत्तरं वः ॥ ९

पू.आ.श्री जिनप्रभसूरिविरचितम्
प्रत्येकपद्ये समसमपाद-पुनरावृत्तिरूपम्
यमकमयं दीपोत्सव वर्णनात्मकम्

## १२. ॥ श्रीवीरजिनस्तवनम् ॥

श्रीवर्द्धमान परिपूरितनम्रकाम
चामीकरप्रभ जिनप्रभसूरिरेतम् ।
सोसूत्र्यते तव जगज्जनहर्षवर्ष-
दीपोत्सवस्तवलवं यमकावदातम् ॥ (वसन्ततिलका) १

(अनुष्टुप्)

श्रितास्त्वां कमलाहर्म्य कल्पपाद पयोज ये ।
करौ तान् प्रति विश्वैककल्पपादपयोजये ॥ २

कस्ते नतिं न सद्बोधसिन्धुरारातिलक्ष्मणे ।
रङ्के च तुल्यचित्ताय सिन्धुरारातिलक्ष्मणे ॥ ३

हित्वेश ! देहं दर्शे त्वां शिवशङ्कार्त्तिके विदः ।
नान्यतीर्थ्या यत्र लुप्ता शिवशङ्कार्त्तिकेविदः ॥ ४

रुद्द्वान्यपवर्णानामादानं दीपालिका सताम् ।
कोटिं परां यत्र तेऽभूदानन्दी पालिका सताम् ॥ ५

कुदृशां शुश्रुवे तेऽन्त्यदेशनाशितदर्पका ।
धन्यैरेवेश ! वैराग्यदेशनाशितदर्पका ॥ ६

त्वन्मुक्त्याऽसीत्तमो हन्तुं तरसा दक्ष पावनी ।
पूःपापा पापपद्माऽल्पेतरसादक्षपाऽवनी ॥ ७

त्वत्सेवायां हृषीकेभहस्तिपाऽलस्यहीनता ।
कैर्न नाम तदा राज्ञो हस्तिपालस्य हीनता ॥ ८

दधाना ऽघोरगेषूक्तस्वातिरेकाविराजताम् ।
ऋक्षेषु जात त्वन्मोक्षो स्वातिरेका विराजताम् ॥ ९

त्वन्निर्याणेन करणं नागसञ्ज्ञमरञ्जयत् ।
एनांसि भगवन् कं ना नागसञ्ज्ञमरञ्जयत् ॥ १०

मूर्छागतस्येन्द्रियार्थममता विषपानतः ।
नाथोपचर्यां कुर्यास्त्वं मम ताविषपानतः ॥ ११

तावकं या पिबत्युच्चै रमायाननसारसम् ।
दृष्टिर्विन्दति सौरस्य रमाया न न सा रसम् ॥ १२

स्तूयासमन्वहमहं भवतः पृथिव्यां
सिद्धार्थनन्दनयशोभिमतं समस्याः ।
सिद्धार्थनन्दनयशोभि मतं समस्याः
सर्वश्रियां जिन निजं हृदि रोप्यतां मे ॥ (वसन्ततिलका) १३

पू.आ.श्री जिनप्रभसूरिविरचितम्
व्याकरणप्रयोगगर्भितम्

## १३. ॥ श्रीवीरजिनस्तवनम् ॥

निस्तीर्णविस्तीर्णभवार्णवं ज्ञैरुत्कर्णमाकर्णितवर्णवादम् ।
सुपर्णमंहोहि दमे सुपर्ण श्रीपर्णवर्णं विनुवामि वीरम् ॥ १
(उपजाति)

यैर्व्याप्यतां प्राप्यत तावकीनं क्रमाम्बुजं नाथ ! नमस्करोतेः ।
संसारचक्रभ्रमणाभिधस्य गणस्य ते वृत्करणं गृणन्ति ॥ २
(उपजाति)

तुल्येपि नेत्रामृतवर्षिभावे कलङ्कपङ्कच्युतिसंयुतिभ्याम् ।
प्रधानशिष्टं वदनं त्वदीयं मन्यामहेऽन्वाचयशिष्टमिन्दुम् ॥ ३
(उपजाति)

द्विगोरिव त्वत्प्रणतस्य सङ्ख्या पूर्वा प्रवृत्तिर्न कुतीर्थिकानाम् ।
विभो ! बहुव्रीहिसमासवत्वमन्यार्थ एवोपदधासि वृत्तिम् ॥ ४
(उपजाति)

विभक्तिमुक्तं पुरुषैरसङ्ख्यैः समाश्रितं धातुविकारहीनम् ।
अपूर्वमेतत्कटकृत्यनिष्ठाप्रधानमाख्यातमिन ! त्वदीयम् ॥ ५
(उपेन्द्रवज्रा)

यस्मिन्न सन्धिर्न च वर्णलोपो न संस्तुतिर्विग्रहकारकाणाम् ।
नवा विकल्पः क्वचन प्रयोगेष्वहो नवं व्याकरणं तवेदम् ॥ ६
(उपजाति)

ध्यात्वा हृदा त्वां फलमेति भव्यो दृष्टापि साक्षान्न कृतीत्वभव्यः।
तत्सत्यमेतद्बहिरङ्गतो यत् स्यादन्तरं गोत्रविधिर्बलीयान् ॥ ७
(इन्द्रवज्रा)

एतावतैव प्रतिभाति विश्वविलक्षणं वीर ! भवच्चरित्रम् ।
भालेन युष्मत्पदसम्प्रयोगेप्यलम्भि लोकस्य यदुत्तमत्वम् ॥ ८
(उपजाति)

एकत्र धातावुपसर्गपञ्चकप्रयोग इष्टः कविभिर्निरन्तरम् ।
त्वद्ध्यानधातावुपसर्गविंशतिं
सुरः प्रयोक्ता न कथं कुलक्षणः ॥ (उपजाति) ९

प्रभो ! महच्चित्रमिदं कदम्बके कुतीर्थिकाणामपि कर्म धारये ।
यन्मोहराजप्रधनेषु पुंवद्भावो न कश्चित् परिपोस्फुरीति ॥ १०
(उपजाति)

शुद्धयोर्वरद भावकर्मणोर्दर्शयन् विकरणस्थितिं पदे ।
निर्विभक्ति समुदाहरन् पदं साधुलक्षणविचक्षणो भवान् ॥११
(रथोद्धता)

अनुपघातिनमेव किलागमं प्रणिगदन्ति जिनेश्वर ! शाब्दिकाः ।
असुमतामुपघातकरः स्पृशत्
कथमिवागमतां स कृतः परैः ॥ (द्रु.वि.) १२

योपादानं नश्यतः पापपूगस्यासि व्याप्यं वन्दतेर्वासवानाम् ।
आधारः श्रीसम्पदां सम्प्रदानं
त्रैलोक्यस्य स्तोत्ररत्नोपदायाः ॥ (शालिनी) १३

बेडावद्यः करणमुशतां मोहवार्द्धि तरीतुं
कर्ता भातेर्द्विरदरदनच्छेदशोभिर्यशोभिः ।
भव्यानां यस्त्वमसि सुपथप्रस्थितो हेतुकर्त्ता
तस्मै तुभ्यं जिन ! मम शिरो नम्रताकम्रमस्तु ॥ (म.क्रा.) १४

अन्तस्थास्तव शासनस्य यशसां कुन्दावदातत्विषां
गल्भन्ते भुवि सम्प्रसारणविधौ मर्त्या न तत्कौतुकम् ।
यत्ते नित्यमनामिनोपि कुगुरौ दुर्वृत्तदेवेषु च
भ्राजन्ते गुणवृद्धिभाजनतया ब्रूमस्तदत्यद्भुतम् ॥(शा.वि.) १५

तात ! त्रातरिदं नपुंसकमपि स्वान्तं मदीयं भव-
न्माहात्म्य-स्तुतिसुन्दरीं प्रणयतः पाणौ करोत्वेकदा ।
तत्संश्लेषसुखानुभाववशतः क्लैब्यं विधूय क्षणात्
तत्रोत्पादयिताऽथ शाश्वतचिदानन्दाह्वयं नन्दनम् ॥(शा.वि.)१६

इत्थङ्कारमिभारि लक्षणनरः सल्लक्षणप्रक्रिया-
चित्रं स्तोत्रमिदं विदम्भहृदयो जिह्वाग्रजाग्रत्तमम् ।
कुर्वाणः स्मरबाणकुन्ठनकलानिस्माततानर्तकी
नाट्याचार्य जिनप्रभेन्द्र पदवीसाम्राज्यमासादयेत् ॥(शा.वि.)१७

पू.आ.श्री जिनप्रभसूरिविरचितम्

पञ्चकल्याणकमयं लाटानुप्रासाद्यनेककाव्यकलायुक्तम्

## १४. ॥ श्रीमहावीरस्वामिस्तवनम् ॥

(उपजाति)

पराक्रमेणेव पराजितोऽयं सिंहः सिषेवे धृतलक्ष्मदम्भः ।
सुखानि वः खानिरयं रमाणां द्वैमातुरस्तीर्थकरः करोतु ॥ १

सप्ताश्वतेजाः करसप्तकोच्चः कर्मैधसप्ताप्तिरसप्तभीतिः ।
प्रणीतवान् सप्तशतीं नयानां वीरः श्रिये व्यञ्जितसप्ततत्त्वः ॥२

शक्रानत प्राणतकल्पपुष्पोत्तरात्त्वमाषाढवलक्षषष्ट्याम् ।
देवाधिदेव द्विजदारदेवा नन्दोदरेऽभूर्विहितावतारः ॥ ३

इषस्य नन्द्यादसिता त्रयोदशी द्व्यशीत्यहानन्तरमीशितस्ततः ।
सुरेशसेनापतिदेशिताध्वना क्षात्रं कुलं यत्र पवित्रितं त्वया ॥४

प्रभूतभूतिद्युभवद्भुवा भवज्जनुर्महे नोऽजनि हे जिन ! ध्रुवम् ।
जगत्त्रयी जन्तुषु हर्षवर्षिणी निरूढरूढिर्मदनत्रयोदशी ॥ ५
(वंशस्थ)

त्वया स्वदेहद्युतिसंविभागसम्भावितं हेम सुवर्णमासीत् ।
तारं तु हीनं त्वदनुग्रहेण दुर्वर्णमित्यापदवर्णवादम् ॥ ६
(उपजाति)

बाल्ये विबोधाय हरेः सुराद्रिः पादाग्रनुन्नस्तव यच्चकम्पे ।
चित्रीयता त्वत्तरसा रसातन्मूर्धानमाधूनयति स्म नूनम् ॥ ७
(इन्द्रवज्रा)

बभूव भाग्यातिशयप्रभावात् गुरुस्तवापि त्रिजगद्गुरोर्यः ।
युक्त्यैव तं मेरुगिरेर्गरिष्ठं सिद्धार्थमप्यार्यगणा गृणन्ति ॥ ८
(उपजाति)

कथं गुणैः प्राप्तयशःपताका नारीषु नास्तु त्रिशलाशलाका ।
यत्कुक्षिशुक्तौ विमलः सुवृत्तो
मौतिक्यभूस्त्वं गुणयुक्तिहृद्यः ॥ (उपजाति) ९

दिवि प्रवृद्धं सुरमीश ! मुष्टिघातेन यद्वामनतामनैषीः ।
गर्वाद्रिखर्वीकरणश्रमं तु चकर्ष तीर्थेश्वर शैशवेन तत् ॥ १०
(उपेन्द्रवज्रा)

मोक्षं गमी यः खलु तद्भवेपि गन्तुं कथं सोर्हति लेखशालाम् ।
इतीव शक्रोऽपललाप पित्रोरनौचितिं ते विनयेन धीमान् ॥११
(इन्द्रवज्रा)

व्याकुर्वतस्ते हरये यदागमं
सङ्गृह्य बुद्ध्या कतिचित् गिरां लवान् ।

अध्यापको यद्विदधे तदुच्चकै-
रैन्द्रं भुवि व्याकरणं प्रथामगात् ॥ (इन्द्रवंशा) १२

यस्या न कस्योदितमुक्तिमार्गमार्गस्य कृष्णा दशमी शमीश ! ।
प्राज्यं प्रभो ! यत्र विसृज्य राज्यं
श्रमण्यसाम्राज्यमुपायथास्त्वम् ॥ (इन्द्रवज्रा) १३

शिवालये प्रोज्झितविग्रहं यत् त्वत्पादमूले चमरं निलीनम् ।
जम्भारिदम्भोलियमः प्रचण्डो
न स्प्रष्टुमाप्यैष्ट किमत्र चित्रम् ॥ (उपेन्द्रवज्रा) १४

न बाधितुं जातु दधुः समर्थतां मुनीन्द्र ! धातोरिव नान्ववर्त्तिषुः।
समाधिरूढां प्रकृतार्थसम्पदं
तवोपसर्गा व्यशिषंस्तु केवलम् ॥ (वंशस्थ) १५

न कौशिके रागमुपासनापरे करोषि रोषं स्म न चण्डकौशिके ।
अहो उदासीनतयैव निर्जिता
चमूस्त्वया दुर्विषहापि कर्मणाम् ॥ (वंशस्थ) १६

निबर्हितुङ्गां सुरभर्तुरुद्यतस्तथा तथा यो दुरचेष्टत त्वयि ।
बहिः कृतः स्वर्गिसमाजसङ्गमात्
ससङ्गमः स्यान्न कथं जनङ्गमः ॥ (वंशस्थ) १७

एकाग्रपक्षत्रिशतावसाने श्रीवीरतीरे ऋजुवालिकायाः ।
तवोदगात् केवलऋद्धिरस्ताऽपराधराधस्य शुचौ दशम्याम् ॥१८
(इन्द्रवज्रा)

एकाक्षमाहुर्मुनयः कथं मामितीव कोपात् त्वदुपर्यशोकः ।
अदीदृशत् षट् पदगर्भपुष्पव्याजस्फुरत्तारकदृक्सहस्त्रम् ॥ १९
(इन्द्रवज्रा)

सुरैर्विकीर्णास्तव देशनावनौ बभुः प्रसूनप्रकराः समन्ततः ।
भयश्लथीभूतकरात्परिच्युताः
शरा इवानङ्गभटस्य कौसुमाः ॥ (वंशस्थ) २०

स्फुटीभवन्मालवकौशिकीमुखप्रशस्तरागस्तव संस्तवोचितः ।
प्रविश्य दिव्यः श्रवणाध्वनि ध्वनि-
र्मुदे न केषां रजयन् मृगानपि ॥ (वंशस्थ) २१

स्थातुं चलच्चामरयुग्मकैतवात् त्वदीयदन्तद्युतिजाह्नवीजले ।
ध्रुवं त्वदास्याम्बुजवासिभारती
युग्ये उपेतां कलहंसदम्पती ॥ (इन्द्रवंशा) २२

स्थैर्यं हृतं यद्भवता शिशुत्वे तद्याचनाय स्फुटमेष मेरुः ।
स्वयंसमागादिति तुङ्गहेमसिंहासने ते करवन्ति तर्कम् ॥ २३
(इन्द्रवज्रा)

हन्तुं क्षमोऽहं तम एकमेव तद्देहि मे सर्वतमोपहत्वम् ।
इतीव विज्ञापयितुं सिषेवे भामण्डलच्छद्मधरो रविस्त्वाम् ॥२४
(इन्द्रवज्रा)

दूराज्जराजन्मभिदे भवद्गीः सुधासपीत्यै त्रिजगज्जनौघम् ।
नूनं नदन् संसदि देवदेवैर्दिव्याहतो दुन्दुभिराजुहाव ॥ २५
(इन्द्रवज्रा)

भेदं प्रमाणान्तरदर्शितं सन्नमंस्यते सर्व इतीव पुंसाम् ।
सितातपत्रत्रितयच्छलेन रत्नत्रयं दर्शयति स्म साक्षात् ॥ २६
(इन्द्रवज्रा)

सुपर्वसञ्चारितहेमपङ्कजापदेशतश्चङ्क्रमणक्षणे किल ।
गतस्पृहस्यापि गुणैर्वशंवदाः
पदोस्तले ते निधयो नवालुठन् ॥ (वंशस्थ) २७

त्रैलोक्यसंयुक्तनिरङ्कुशश्रिप्राकाररेखात्रयवेष्टिताङ्गम् ।
नैक्षन्त धन्याः कतिनाम रक्षायन्त्रोपमं त्वां सुमनोऽर्चनीयम्॥२८
(इन्द्रवज्रा)

त्वत्प्रातिहार्यश्रियमित्यवेक्ष्य चेतो न यस्येश ! चमच्चकार ।
स केवली चेन्न तदाऽस्तु तस्य
नरब्रुवस्याजननिर्जगत्याम् ॥ (इन्द्रवज्रा) २९

अनिन्द्यविद्यावदनेन्दुदर्पणा गणाधिपास्ते यदसूत्रयन् श्रुतम् ।
गिरस्तवैव त्रिपदीसुधाकिरः सतां मनःस्वप्रथितेन गौरवम् ॥३०
(वंशस्थ)

अशेषभाषापरिणाममञ्जुलं विचित्रसन्देहविषान्तवज्जलम् ।
स्तुवे वचस्ते नयनिर्विरोधता
विधायि सम्बोधविधौ निबन्धनम् ॥ (वंशस्थ) ३१

तप्त्वा तपः षष्टमपास्त भव्यलोकार्तिकः कार्तिकदर्शरात्रौ ।
अपापमापुः पदमीश ! पापापुर्यां द्वियुग्सप्ततिवत्सरायुः ॥३२
(उपजाति)

स्वे यत्र बुद्धे सति फल्गुनीषु जाले स्मरोऽभून्मृतकल्पमानी ।
तद्विश्ववन्द्योत्तरफल्गुनीषु बभूव कल्याणकपञ्चकं ते ॥ ३३
(उपजाति)

भुवनाधिपतेरनन्तया भवतः स्वातिगतेऽत्र भाधिपे ।
उदयाद्युचितं घनाघनोदकयोगान्नवमौक्तिकश्रिया ॥ ३४
(वैतालीय)

ज्ञातेक्ष्वाकुकुलप्रदीप ! भगवन् वन्दारुवृदारक-
श्रेणीरत्नकिरीटकान्तिलहरी संस्नाप्यमानांह्रये ।
मोहोर्वीपतिगर्वपर्वतभिदि व्याधामधामश्रिया-
मश्रान्तं जिनसिंहसूरिमहित श्रीवीर ! तुभ्यं नमः ॥(शा.वि.)३५

इति स्तुतिपरायणे त्रिजगदेकचूडामणे !
प्रसीद परमेश्वर ! स्वरसभक्तिनम्रे मयि ।
भवेन्मम भवे भवे भवदुपासनावासना
जिनप्रभवसंविदां वरद पूर्णमेतावता ॥ (पृथ्वी) ३६

पू.आ. श्री जिनप्रभसूरिविरचितम्
विविधवृत्तनामश्लेषार्थगर्भितम्

## १५. ॥ श्रीवीरजिनस्तोत्रम् ॥

कंसारिक्रमनिर्यदापगाधारा**शुद्धविराट्**छदच्छविम् ।
छन्दोभिर्विविधैरधीरधीस्तोष्येऽहं चरमं जिनेश्वरम् ॥ १

त्रैलोक्यनेतस्तव दुर्नयालीनिर्नाशनं शासनमाश्रितो यः ।
तस्**येन्द्रवज्रा**युधमाविरस्ति दुष्कर्मशैलेन्द्रभिदाविधाने ॥ २

किमेकमाश्चर्यकरं न ते यत्पुष्पन्धयोऽप्येष विशेषविज्ञः ।
त्यक्**तोपजाति**भ्रमणाभिलाषस्त्वदङ्गसौगन्ध्यमनुप्रयाति ॥ ३

यः सृजत्यजरसौरभसारैरम्बुजैस्तव पदाम्बुजपूजाम् ।
प्रेत्य तस्य दिवि देवमृगाक्ष्यः **स्वागता**नि निगदन्ति सरागम्॥४

वाजिवारण**रथोद्धता** भटैरुद्भटा सुभगभोगभङ्गिभृत् ।
राज्यऋद्धिरुपनन्नमीति तं नन्नमीति तव यः पदौ मुदा ॥ ५

नाकिनिकायकरप्रहतानां सम्प्रसरन्गगने मुरजानाम् ।
जन्ममहे तव कस्य न जज्ञे दत्तम**दो धक**धोङ्कृतिनादः ॥ ६

ये भक्त्यात्त**भ्रमरविलसिता** जाताः(जज्ञुः)
पादाम्बुरुहि तव विभो ! ।
तैः श्रेयःश्रीर्मधुरमधुरसास्वादासादात्समजनि कृतिभिः ॥ ७

तत्त्वातत्त्वारोपलोपप्रवीणां प्रह्वप्राणित्राणसंस्थाधुरीणाम् ।
आज्ञां धत्ते मौलिना भव्यजन्तु-
श्रेणिः श्रद्धा**शालिनी** तावकीनाम् ॥ ८

वसुधाम सुधामयवक्र विधो ! तव भाषितमाद्रियते भुवि यः ।
स सुखानि सुखानिरिवोद्धमणीन् बिभृते
परि**तोऽटक**कीर्तिभरः ॥ ९

**स्त्रग्विणी** कुण्डलभ्राजिगण्डस्थला
तारहारद्युतिद्योतिवक्षस्तटा ।
राजिराखण्डलानामखण्डादरा
पादपीठेऽलुठत्तावके पावके ॥ १०

क्षणादेव तेषां शिवश्री**भुजङ्ग**
**प्रयातं** विवृद्धिं शुभं कर्म पुंसाम् ।
भवन्नाममन्त्रस्य वर्णानुपूर्वी रसज्ञाग्रवर्तिष्णुरापादिता यैः ॥११

**द्रुतविलम्बित**मध्यरवध्वनद्विविधतूर्यमनेकमणीमयम् ।
कुसुमवर्षचितं तव देशनावनितलं क इवैत्य न मोदते ॥ १२

मुकुरोज्ज्वले गणभृतां हृदये **प्रमिताक्षरापि** बत वाग्भवतः ।
अनियत्तया प्रतिपफाल जिन
ध्वनितार्थतश्च जगदर्च्यधियाम् ॥ १३

जगत्प्रभो ! भक्तिभरादनुद्विजाद्-
द्विजातिवंशादपहृत्य कृत्यवित् ।
नरेन्द्र**वंशस्थ**मचीकरच्छचीपतिर्भवन्तं हरिनैगमेषिणा (?) ॥१४

वाचां ते निखिलनयाविरोधिनीनां
दुर्बोधद्रुमदलने कुठारिकाणाम् ।
माहात्म्यं भुवनमनः**प्रहर्षिणी**नां
निर्वक्तुं क इव यथावदस्तु शक्तः ॥ १५

सिद्धार्थराजकुलनन्दनपारिजात
न भ्राम्यति क्व तव कीर्तिरपारिजात ।
वर्णेन दुग्धमधुरेण मनोजनाग-
**सिंहोद्धता** स्थिरतया सुमनोजनाग ॥ १६

अति महति भवोर्मी**मालिनी**ह भ्रमन्तो
जननमरणवीच्या घातदोदूयमानाः ।
कथमपि पृथुपुण्याः प्राणिनः प्राप्नुवन्ति
प्रवहणमिव केचिच्छासनं तावकीनम् ॥ १७

लवणिमतर्जितस्मरपुरन्ध्रिरूपदर्पा
घटितकटाक्षलक्षशरविद्धकामिमर्मा ।
कनकमणिमयाभरणरश्मिरञ्जिताङ्गी
व्यजयत **वाणिनी** न भवतः समाधिमुद्राम् ॥ १८

प्रबोधं भव्याम्भोरुहवनमधीशाभिगमयन्-
हरन्मोहध्वान्तं परसमयतारा: कवलयन् ।
निविष्ट: सिंहासन्यलममलभामण्डलयुतो
भवानाभाति स्मोदय**शिखरिणी**व द्युतिपति: ॥ १९

अमित दमितस्त्रोतो माद्यत्तुरङ्गमसङ्गम-
त्रिदश**हरिणी**नेत्रो नेत्रत्रिभागविलोकितै: ।
तव जिन ! मन: शेके कर्तुं मनागपि न स्वसा-
च्चलयितुमलं किं हेमाद्रिं युगान्तमहाबला: ॥ २०

दारिद्र्यापत्परिभवजनुर्विस्रसामृत्युदु:खै-
रार्ता: के के न तव बलवद्देव सेवां प्रपन्ना: ।
किं स्याद्दोष(द्रोग)प्रशमनपटोरोषधस्योपयुक्तौ
**मन्दाक्रान्ता** जगति जनता दु:सहेनामयेन ॥ २१

शरदुदितनिशाकरांशु**प्रभा** जैत्रकीर्तिच्छटा-
धवलितनिखिलत्रिलोकीतलं श्रद्धयोपासते ।
सरभसविनमत्सुराधीशचूडामणिज्योतिषा-
मरुणितपदपीठमूर्मीभिरेष्यच्छिवास्त्वां प्रभो ! ॥ २२

बिभ्राणो नखविक्रियां भयकरीं धूतोल्लसद्वालधी
रौद्रं शब्दमनीचकै: प्रकटयन्भूयोऽवनीपादृत: ।
त्वद्भक्त्या भृतकोऽप्यवाप्य नृपतां मांसादरं वर्धयन्-
धत्तेऽनेकपराजिदर्पदलने **शार्दूलविक्रीडितम्** ॥ २३

विद्यामन्त्रैर्न कार्यं सुरतरुभिरलं वित्तेन च मृतं
पर्याप्तं राज्यलक्ष्म्या कृतममरतया ह्यास्तां **सुवदना** ।
स्फूर्जत्त्वेका तु भक्तिस्तव मम मनसि ध्वस्ताखिलमला
कैवल्यश्रीर्यया स्यात्करतलनिलया साह्नाय भगवन् ॥ २४

श्रीवीरः सर्वदिक्कैः कनकरुचितनूरोचिरुद्दीप्तदीपै-
र्मङ्गल्यः सोऽस्तु दीपोत्सव इव जगदानन्दसन्दर्भकन्दः ।
सूक्तिर्जैनप्रभीयं मृदुविशदपदा **स्रग्धरा**धीयमाना
भव्यानां भव्यभूत्यै भवतु भवतुदे भावनाभावितानाम् ॥ २५

पू.आ. श्री जिनप्रभसूरिविरचितम्
विविधवृत्तबद्ध-अत्युत्तमचित्रादिकाव्यचमत्कृतियुक्तम्

## १६. ॥ श्रीवीरजिनस्तवनम् ॥

(अनुष्टुप्)

चित्रैः स्तोष्ये जिनं वीरं चित्रकृच्चरितं मुदा ।
प्रतिलोमानुलोमाद्यैः खड्गाद्यैश्चातिचारुभिः ॥ १

वन्देऽमन्ददमं देवं यः शमाय यमाशयः ।
नायेनघ घना येनापाकृता ममता कृपा ॥ २

(प्रतिलोमानुलोमपादः)

दासतां तव भागारा न चेयाय मतामस ।
समतामययाचेन रागाभावततां सदा ॥(अनुलोमप्रतिलोमः) ३

वरदानवरानदि(न्व)त्व त्व(न्व)दिरावनदारव ।
याज्यदेव भयान्यास सन्याया भवदेज्यया ॥ ४

(अर्धप्रतिलोमानुलोमः)

श्रीद वीर विरेभ त्वं दमिताक्ष गताऽशुभ ।
वीभाक्षमारम्भितारे रक्ष मां सदरं गवि ॥ (अर्धभ्रमः) ५

गीरता जनता रह्ले ! (रजतारक्ष्णे) धीरतास्थिरतारसा ।
सारतारश्रुताऽवन्ध्या सुरताजन तावकी ॥ (मुरजबन्धः) ६

ये पश्यन्ति तवेहास्यारविन्दं भक्तिबन्धुराः ।
न पतन्ति भवे शस्यास्ते विदो भगवन्नराः ॥ (गोमूत्रिका) ७

नमासाररसामान मारिताक्षक्षतारिमा ।
साता मया यामतासा रक्षयाम महा(या)ऽक्षर ॥(सर्वतोभद्रम्)८

तिर्यङ्नर सुराकीर्णा भासते ननते सभा ।
त्वन्माहात्म्यात् कृताश्चर्यं या श्रिता ततता श्रिया ॥ (पदम्) ९

रेगौराङ्गोरुगीर्गङ्गागौरीगुरुररोगरुक् ।
गोरङ्गा गाररो(रा)गारि रैरिरोरै गुरुं गिरिम् ॥(द्व्यक्षरः) १०

लाललालोललीलालं ततता तितिता तते ।
ममाममाममुमाऽननानेनोननानन ॥ (एकाक्षरपादः) ११

ककंकिकाककंकौकः केकाकोककेकिकम् ।
कककाकुककोकैक ककुः कौकोंक्रकाङ्ककम् ॥(एकाक्षरः)१२

मरुभूमौ तपत्रृताविव चारुसरोवरम् ।
कुतः सुकृतहीनानां सुलभं तव शासनम् ॥(असंयोगाक्षरः)(यु)१३

सारणिः पुण्यवन्याया न्यायमौक्तिकशुक्तिका ।
कामधेनुर्नयविदां बन्धो(बोधो)ल्लासन ला(सा)लसा ॥ १४

सारं स्याद्वादमुद्रायास्त्रिपदी भवतोऽञ्जसा ।
सा मेऽस्तु(सु) हृदि कान्तैकाखिलेन रहितैनसा ॥ १५
(द्वाभ्यां खड्गः संदानितकम्)

श्रीसिद्धार्थकुलव्योमदिवाकर ! निरञ्जन ! ।
न के क्षतैकान्तवादिमतं तीर्थं तव श्रिताः ॥ (मुशलम्) १६

भुक्ता या त्वयि भव्याली धन्या धत्ते स्म चेतसा ।
सामता तामसा काममकासा रङ्गसागरम् ॥ (त्रिशूलम्) १७

त्रिशलाकुक्षिपाथोजराजहंस ! जगद्विभो ! ।
भोगास्तृणमिव त्यक्तास्त्वया मोक्षदिदृक्षया ॥ (हलम्) १८

सुरासुरनरास्तुभ्यं नमस्यन्ति जिनोत्तम ! ।
मनःप्रसादसन्दर्भ(?) दलिताशुभवासनाः ॥ (धनुः) १९

कथं कर्तुं जनो मोहव्यपोहमहह क्षमः ।
मनसा सादरं यस्त्वां न स्तौति तिमिरापहम् ॥ (शरः) २०

बाल्ये मेरुशिरःकम्पसम्पत्प्रथितविक्रमः ।
मनोजाऽनोकहव्याल ! मम स्वामी भवाऽऽभवम् ॥(शक्तिः)२१

मानितार्यक्रमामार रमामाकन्दमाधव ! ।
वधमार्गे ममाकास सकामा धीः प्रतानि मा ॥ २२

(अष्टदलकमलम्)

वन्ययान ! घनस्वान ! ध्यानमौनकनद्धन ! ।
ज्ञानस्थान ! जिन ! श्रीन ! घनमेनः खनस्व नः ॥ २३

(षोडशदलकमलम्)

जय हेमवपुःश्रीक ! जगन्मोहापहारक ! ।
जराहिवीनर्सिहाङ्क ! जन्मनीरधिनाविक ! ॥ २४

(स्तुत्यनामगर्भं बीजपूरम्)

तुभ्यं नमोऽतुलनयस्थितिकाय भीति-
वन्यासु पावक ! सुरस्तुत ! वीर ! नेतः ! ।
विद्यालताविपुलमण्डप ! हेमरूप !
कल्याणधीकरणदक्ष नतेदमीन ! ॥ (हारबन्धः) २५

भग्नाकृत्यपथो जिनेश्वरवरो भव्याब्जमित्रः क्रिया-
दिष्टं तत्त्वविगानदोषरहितैः सूक्तैः श्रवस्तर्पणः ।

जन्माचिन्त्यसुखप्रदः सुरचितारिष्टक्षयो वः सदा
दाता शोभनवादिधीः कजदलायामेक्षणः संविदा ॥ २६

(कविकाव्यनामाङ्कं चक्रम्)

श्रीमद्धाम समग्रविग्रह मया चित्रस्तवेनाऽमुना
नूतस्त्वं पुरुहूतपूजित ! विभो ! सद्यः प्रसद्यैधि माम् ।
ख्यातज्ञातकुलावतंस ! सकलत्रैलोक्यक्लृप्तान्तर(रः)-
स्फारक्रूरतरज्वरस्मरतरत्(भरः)संरब्धरक्षारतः ॥ २७

(चामरबन्धः)

पू.आ.श्री धर्मघोषसूरिविरचितम्

## १७. ॥ श्रीवीरजिनस्तवनम् ॥

(अनुष्टुप्)

जय श्रीसर्वसिद्धार्थ ! सिद्धार्थनृपनन्दन ! ।
सुमेरुधीर ! गम्भीर ! महावीर ! जिनेश्वर ! ॥ १

योऽप्रमेयप्रमाणोऽपि सप्तहस्तप्रमोपितः ।
पूर्णेन्दुवर्ण्यवर्णोऽपि स्वर्णवर्णसवर्णकः ॥ २

सदृशं कौशिके शक्रे सर्पे च क्रमसंस्पृशि ।
पीयूषवृष्टिसृष्ट्या यं दृष्ट्या दिष्ट्या विदुर्बुधाः ॥ ३

विष्टपत्रितयोत्सङ्गरङ्गदुत्तुङ्गकीर्त्तिना ।
सनाथं येन नाथेन विश्वं विश्वम्भरातलम् ॥ ४

यस्मै चक्रे नमः सेवाहेवाकोत्सुकमानसैः ।
वीराय गतवैराय मर्त्यामर्त्यासुरेश्वरैः ॥ ५

यस्माद् द्वेषादयो दोषाः क्षिप्रं क्षीणाः क्षमाखनेः ।
दोषाः पूषमयूखेभ्य इव हर्यक्षलक्षणात् ॥ ६

यद्देहद्युतिसन्दोहसन्देहितवपुर्दधौ ।
रविः खद्योतपोतद्युत्याडम्बरविडम्बनाम् ॥ ७

भविनां यत्र चित्तस्थे स्युर्धीवृद्धिसिद्धयः ।
तं वर्द्धमानमानौमि वर्द्धमानसुभावनः ॥ ८

इति यस्ते वास्तवं पठति वीर ! जिनचन्द्र ! जातरोमाञ्चः ।
यात्यपवर्गं स द्रुतमखर्वगर्वारिवर्गजयी ॥ ९

पू.आ.श्री जिनवल्लभसूरिविरचितम्

समसंस्कृतप्राकृतं-

## १८. ॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

(वसन्ततिलका)

भावारिवारणनिवारणदारुणोरु-
कण्ठीरवं मलयमन्दरसारधीरम् ।
वीरं नमामि कलिकालकलङ्कपङ्क-
सम्भारसंहरणतुङ्गतरङ्गतोयम् ॥ १

बाढं विसारिगरिमा महिमा तवेह
बुद्धो न देवगुरुणा न पुरन्दरेण ।
तं कोऽवगन्तुमखिलं जडिमालयोऽह-
मिच्छामि किं तु तव देव ! गुणाणुमेव ॥ २

सन्तो गुणा गुणिगुरो तव हाससहंस-
नीहारहारधवला बहुलीभवन्ति ।

ते सोमसूरहरिहीरविरञ्चिबुद्ध-
मायाविदेवनिवहे न मलीमसा वा ॥ ३

देवं भवन्तमवहाय दुरन्तमोह-
सञ्छन्नबुद्धिमिहिरा इह भूरिकालम् ।
संसारनीरनिलये बहु संसरन्तो
विन्दन्ति जन्तुनिवहा न हि सिद्धिभावम् ॥ ४

सासूयसङ्गमसुरोरुसमूढदम्भ-
संरम्भसन्तमससञ्चयचण्डभासम् ।
हिंसासरोरुहतमीरमणं चिरोढा-
हङ्कारकन्दलदलीकरणासिदण्डम् ॥ ५

वन्देऽहमिन्दुदलभालममन्दभन्द-
सन्दोहमन्दिरवरं दरकन्दकोलम् ।
गम्भीरसम्भवजरामरणोरुनीर-
संसारसागरतरीकरणिं च वीरम् ॥ ६

उद्दामकामभरभङ्गुरमङ्गभङ्ग-
संसङ्गबन्धुरमुरोरुहभारखिन्नम् ।
देहं सलीलपरिरिङ्खणमञ्जुशिञ्जि-
मञ्जीरचारुचरणं सरसं वहन्ती ॥ ७

सङ्गेयताललयचञ्चुरचारचारी-
सञ्चारिणी करणबन्धकलासु सज्जा ।
उन्नालनीलरुहकोमलबाहुवल्ली
भल्लीव विद्धबहुकामिकुरङ्गसङ्घा ॥ ८

हेलाविलोलमणिकुण्डललीढगल्ला
कङ्केल्लिपल्लवकरा वरकम्बुकण्ठी ।
केलीललामरमणी रमणीयहावा
नालं निहन्तुमिह ते विमलाभिसन्धिम् ॥ (त्रि.कु.) ९

सञ्चारिकिन्नरगणारववेणुवीणा-
संरावभिन्नकलगेयरवाभिरामा ।
आकालभाविकुगुरूहकुधी(धो)कुदेव-
सम्बन्धबुद्धहरणी तव देव ! वाणी ॥ १०

सन्देहदावजलवाहमजीवजीव-
भावावभासतरणिं भवसिन्धुनावम् ।
आगामिकेवलरमातरुणीविवाहा
देवागमं तव नरा विमला महन्ति ॥ ११

देवा महापरिमलं तरलालिजाल-
झङ्कारहारि तव वीर ! सभासु भूरि ।
फुल्लारविन्दनवसुन्दरसिन्दुवार-
मन्दारकुन्दकबरं कुसुमं किरन्ति ॥ १२

निःसीमभीमभवसम्भवरुढगूढ-
सम्मोहभूवलयदारणसारसीरम् ।
वीरं कुवासमलहारिसुवारिपूर-
मुत्तुङ्गमारकरिकेसरिणं नमामि ॥ १३

भिन्दन्तमन्तरणकारणमन्तरायं
संरुद्धरोगसमवायमलोभमायम् ।

उच्छिन्नमोहतिमिरावरणावसायं
वीरं नमामि नवहेमसिद्धकायम् ॥ १४

वन्दारुवासवसुरासुरभासुराल-
ङ्कारामलच्छविपरागसमुद्धराणि ।
सेवामि ते चरणवारिरुहाणि भूरि-
सन्देहरेणुरणोरुसमीर ! वीर ! ॥ १५

अञ्चामि ते चरणतामरसालिलीला
सन्धायि पञ्चममहागणधारिवाणी (?) ।
सम्बन्धबुद्धिकरुणालयलिङ्गसिद्ध-
सद्भावलीदमिगणं चरणं चरन्तम् ॥ १६

उच्चण्डधारकरवालकरारिवार-
विच्छिन्नकुम्भगलनालकरालनागे ।
कुन्तासितोमरविभिन्नपरासुदेहे
कङ्कालसङ्कुलभयावहभूमिभागे ॥ १७

सावेगहुङ्करणडामरमुण्डरुण्ड-
कीलाललालसविहङ्गकुलावरुद्धे ।
आबद्धबाणविसरे सहसा नुवन्तो
वीरं नरा रणभरेऽरिबलं यजन्ति ॥ (यु.) १८

आसन्नसिद्धिकमलापरिरम्भलम्भ-
दम्भोलिपाणिमिव मोहगिरिं किरन्तम् ।
सम्पत्तिकारणममङ्गलमूलकीलं
सेवन्ति के न भगवन्तमघं हरन्तम् ॥ १९

आयासभङ्गडमरामयसम्पराय-
चोरारिमारिविरहेण चिराय देव ! ।
भूमण्डले सनगरानिगमा विहार-
चारेण ते परममुद्धवमावहन्ति ॥ २०

निःसङ्ग ! निःसमर ! निःसम ! निःसहाय !
नीराग ! नीरमण ! नीरस ! नीरिरंस ! ।
हे वीर ! धीरिमनिवासनिरुद्धघोर-
संसारचार ! जय जीवसमूहबन्धो ! ॥ २१

उल्लासितारतरलामलहारिहारा
नारीगणा बहुविलासरसालसा मे ।
संसारसंसरणसम्भवभीनिमित्तं
चित्तं हरन्ति भण किं करवाणि देव ! ॥ २२

इच्छामहासलिलकामगुणालवालं
चिन्तादलं समलचित्तमहीसमुत्थम् ।
सम्भोगफुल्लमिव मोहतरुं लसन्तं
हे वीरसिन्धुर ! समुद्धर मे समूलम् ॥ २३

सम्पन्नसिद्धिपुरसङ्गममङ्गलाय
मायोरुवारिरुहिणीवरकुञ्जराय ।
वीराय ते चरमकेवलिपुङ्गवाय
कामं नमोऽसमदयादमसत्तमाय ॥ २४

हे देव ! किङ्करमिमं परिभावयेह
मज्जन्तमुद्धरजवे भवसिन्धुपूरे ।

उत्तारणाय कुरु वीर ! करावलम्बं
भूयोऽसमञ्जसनिरन्तरचारिणो मे ॥ २५

कुसमयतरुमालाभङ्गसंहारवायो
कुनयकुवलयाली चूरणे(चूर्णने) मत्तनाग ! ।
तव गुणकणगुम्फे मे परीणाममित्थं
विमलमपरिहीणं हे महावीर ! पाहि ॥ (मालिनी) २६

अनयनिबिडे पीडागाढे भयावहदुःसहे
विरहविरसे लज्जापुञ्जे रमे भवपञ्जरे ।
निरयकुहरङ्गामी हाहं न सिद्धिमहापुरी-
सरलसरणिं सेवे मूढो गिरं तव वीर हे ! ॥ (शिखरणी) २७

निरीहं गन्तारं परमभुवि मन्तारमखिलं
निहन्तारं हेलाकलिकलह केलीहसरसम् ।
भवन्तं नन्तारो नहि खलु निमज्जन्ति भवभी-
महापारावारे मरणभयकल्लोलकलिले ॥ (शिखरणी) २८

एवं सेवापरहरिहया लोलचूलामणीद्ध-
च्छायालीढं खरकिरणभाभिन्नम्भोरुहं वा ।
चित्तागारे चरणकमलं ते चिरं धारिणो मे
सिद्धावासं बहुभवभयारम्भरीणाय देहि ॥ (शिखरणी) २९

इत्थं ते समसंस्कृतस्तवमहं प्रस्तावयामासिवा-
नाशंसे जिनवीर ! नेन्द्रपदवीं न प्राज्यराज्यश्रियम् ।
लीलाभाञ्जि न वल्लभप्रणयिनीवृन्दानि किं त्वर्थये
नाथेदं प्रथय प्रसादविशदां दृष्टिं दयालो ! मयि ॥(शा.वि.)३०

पू. उपाध्यायपद्मराजगणि-विरचितम्

भावारिवारणान्त्यपादसमस्यापूर्तिमयम्

# १९. ॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

(वसन्ततिलका)

वन्दे महोदयरमारमणीललामं,
कामं महामहिमधामविलासधामम् ।
वीरं भवारिभयदावकरालकीला-
सम्भारसंहरणतुङ्गतरङ्गतोयम् ॥ १

देवा नरा विमलबुद्धिगुणा हि नाव-
गच्छन्ति देव ! निखिलं गुणसञ्चयं ते ।
मन्तुं न तं सममलं जडपुङ्गवोऽह-
मुञ्छामि किन्तु तव देव ! गुणाणुमेव ॥ २

हे वीर ! हीरसुरसिन्धुर ! सिद्धसिन्धु-
डिण्डीरपिण्डधवला गुणधोरणी ते ।
गोविन्दवारिरुहसम्भववामदेव-
मायाविदेवनिवहे न मलीमसा वा ॥ ३

निस्सङ्गरङ्ग ! तव सङ्गममन्तरेण,
चिन्तामणी-सुरगवी-करर्णि चिरेण ।
नारायणं च मिहिरं च हरं महन्तो,
विन्दन्ति जन्तुनिवहा न हि सिद्धभावम् ॥ ४

छिन्नामयं परमसिद्धिपुरे वसन्त-
मुल्लासिवासरमणिं महसा हसन्तम् ।

मायातमोनिलयसङ्गममूढदेवा-
हङ्कारकन्दलदलीकरणासिदण्डम् ॥ ५

देवं दयाकमलकेलिमरालनालं,
धीमन्दिरं सरसवाणिरमा(र)सालम् ।
चित्ते वहामि वरसिद्धिरसालकीरं,
संसारसागरतरीकरणिं च वीरम् ॥ (युगलकम्) ६

रम्भावभासिकरिणीकरपीवरोरु-
संरम्भमुच्चकुचकुम्भभरेण मन्दम् ।
अङ्गं सरङ्ग-परिरम्भकलासु धीरं,
मञ्जीरचारुचरणं सरसं वहन्ती ॥ ७

लीलाविलासपरिहासतरङ्गवेणी,
रोलम्बपुञ्जकलकज्जलमञ्जुवेणी ।
छायावहा कुसुमबाणपुलिन्दपल्ली,
भल्लीव विद्धबहुकामिकुरङ्गसङ्घा ॥ ८

पङ्केरुहारुणकरा कलकण्ठरामा-
नामारवा तरुणचित्तकरेणुरेवा ।
नारी विभासुर ! सुरासुरसुन्दरी वा,
नाऽलं निहन्तुमिह ते विमलाभिसन्धिम् ॥ (त्रिभि.) ९

अंहोमयं निविडसन्तमसं हरन्ती,
सन्देहकीलनिवहं सममुद्धरन्ती ।
हिंसानिबद्धसमयानयधीदुरूह-
सम्बन्धबुद्धिहरणी तव देव ! वाणी ॥ १०

गम्भीरिमालय ! महापरिमाणमङ्ग-
सम्बद्धभङ्गलहरीबहुभङ्गिचङ्गम् ।
नीरालयं नयमणीकुलसङ्कुलं वा,
देवागमं तव नरा विरला महन्ति ॥ ११

भेरीरणं दिवि सुदानगिरं भणन्तो,
देवा वहन्ति तव पारणदायिगेहे ।
धाराचयं वसुमयं च सचेलचालं,
मन्दारकुन्दकबरं कुसुमं किरन्ति ॥ १२

उद्दण्डचण्डकरणोरुतुरङ्गवार-
मुद्दामतामसकरेणुबलं च वीरम् ।
सम्मोहभूरमणभूरिबलं दलन्त-
मुत्तुङ्गमारकरिकेसरिणं नमामि ॥ १३

वन्दारुचारुसुरकिन्नरसन्निकायं,
विच्छिन्नभीमभयकारणसम्परायम् ।
सनिस्सीमकेवलकलाकमलासहायं,
वीरं नमामि नवहेमसमिद्धकायम् ॥ १४

आरामधामगिरिमन्दरकन्दरासु,
गायन्ति भूमिवलये गुणमण्डलं ते ।
नारी नरा सुरवरा अमरा अमन्द !
सन्देहरेणुहरणोरुसमीर ! वीर ! ॥ १५

संसारिकामपरिपूरणकामकुम्भं,
सञ्चारिहेमनवकञ्जपरम्परासु ।

सेवामि ते चरमदेव ! समन्तसेवि-
सङ्घावलीदमिगणं चरणं चरन्तम् ॥ १६

सन्नद्धधीरवरवीरसवेगबाण-
छायानिरुद्धतरुणारुणचण्डबिम्बे ।
सम्पन्नघोरतुमुले गुरुभीरुकम्पे,
कङ्कालसङ्कुलभयावहभूमिभागे ॥ १७

भल्लासिभिन्नहयवारणवारवाण-
साडम्बरारिकरणावरणे दुरन्ते ।
चित्ते चिराय तव नाम वरं वहन्तो,
वीरं नरा रणभरेऽरिबलं जयन्ति ॥ (युगलकम्) १८

संवित्तिवित्तकरुणारसवारिकुण्डं,
पीडाहरं गुणसमूहमणीकरण्डम् ।
संसारसिन्धुजलकुम्भभवं भवन्तं,
सेवन्ति के न भगवन्तमघं हरन्तम् ॥ १९

सञ्चारभूचरणकेवलसिद्धिवास-
संवासवासरवरा इह वीरदेव ! ।
देवासुरोरगकुमारसहेलभूमी-
चारेण ते परममुद्धवमावहन्ति ॥ २०

हे वीर ! मेरुगिरिधीर ! वसुन्धराल-
ङ्काराभतारवसुभूरिमयोरुसाल ! ।
आरोहिमङ्गलमहीरुहकन्द ! भिन्न-
संसारचार ! जय जीवसमूहबन्धो ! ॥ २१

धीरोहभूरुहचलीकरणे धुरीणा,
दूरं तमोविसररेणुविसारिणो मे ।
बाला समीरणरया इव तूलपूलं,
चित्तं हरन्ति भण किं करवाणि देव ! ॥ २२

इच्छाजले कलिमलाविलचित्तकच्छे,
रूढं विरुद्धरसभावफलावलीढम् ।
आरम्भदम्भचिरसम्भववल्लिजालं,
हे वीरसिन्धुर ! समुद्धर मे समूलम् ॥ २३

सेवापरायणनरामरतारचूडा-
लङ्कारसारकरमञ्जरिपिञ्जराय ।
वीराय जङ्गमसुरागमसङ्गमाय,
कामं नमोऽसमदयादमसत्तमाय ॥ २४

हे देव ! ते चरणवारिरुहं तरण्ड-
मारोहिणो दरभरं हर देहि देहि ।
पारं परं भवदुरुत्तरनीरपूरे,
भूयोऽसमञ्जसनिरन्तरचारिणो मे ॥ २५

अविलयमकलङ्कं सिद्धिसम्पत्तिमूलं,
भवजलरयकूलं केवलं धारिणोऽलम् ।
चरणकमलसेवालालसं किङ्करं ते,
विमलमपरिहीणं हे महावीर ! पाहि ॥ (मालिनी) २६

तरुणतरणिं जीवाजीवावभासविसारणे,
सबलकरिणो मायाकुञ्जे दयारससारणिम् ।

चरणरमणीलीलागारं महोदयसङ्गमे,
सरलसरणिं सेवे मूढो गिरं तव वीर हे ! ॥ (हरिणी) २७

लसन्तं संसारे सुरनरसमुल्लासकरणं,
वहे वारं वारं तव गुणगणं देव ! विमलम् ।
अपारं चित्ते वा बहुलसलिले बिन्दुनिवहं,
महापारावारेऽमरणभय ! कल्लोलकलिले ॥ (शिखरिणी) २८

गुञ्जापुञ्जारुणकररुहाऽऽयामसम्पन्नबाहो !
भन्दारामे कुसुमसमयं वीरदेवाविलम्बम् ।
गङ्गानीरामल ! गुणलवं ते समुच्चारिणे मे,
सिद्धावासं बहुभवभयारम्भरीणाय देहि ॥ (म.क्रा.) २९

एवं श्रीजिनवल्लभप्रभुकृतस्तोत्रान्त्यपादग्रहात्,
कृत्वा ते समसंस्कृतस्तवमहं पुण्यं यदापं मनाक् ।
संसेव्यक्रमपद्म ! राजनिकरैः श्रीवीर ! तेनार्थये,
नाथेदं प्रथय प्रसादविशदां दृष्टिं दयालो ! मयि ॥ ३०
(शा.वि.)

पू.आ.श्री कल्याणसागरसूरिविरचितम्

## २०. ॥ श्रीवीरजिनाष्टकम् ॥

(वसन्ततिलका)

तुभ्यं नमः समयधर्म्मनिवेदकाय
तुभ्यं नमस्त्रिभुवनेश्वरशेखराय ।
तुभ्यं नमः सुरनरामरसेविताय
तुभ्यं नमो जिनजनार्चितपत्कजाय ॥ १

तुभ्यं नमोऽभिलषते हरिचन्दनाय
तुभ्यं नमो वरकुलाम्बरभास्कराय ।
तुभ्यं नमः प्रणतदेवनराधिपाय
तुभ्यं नमः प्रवररूपमनोहराय ॥ २

तुभ्यं नमो हरिणनायकनायकाय
तुभ्यं नमो यतिततिप्रतिपालकाय ।
तुभ्यं नमो विकचनीरजलोचनाय
तुभ्यं नमस्तनितनादविराजिताय ॥ ३

तुभ्यं नमः कुशलमार्गविधायकाय
तुभ्यं नमोविकटकष्टनिषेधकाय ।
तुभ्यं नमो दुरितरोगचिकित्सकाय
तुभ्यं नमस्त्रिजगतो हृदि भूषणाय ॥ ४

तुभ्यं नमो दलितमोहतमोभराय
तुभ्यं नमः कनकसन्निभभूघनाय ।
तुभ्यं नमोप्यखिलसद्गुणमन्दिराय
तुभ्यं नमो मुखकलोदितचण्डिकाय ॥ ५

तुभ्यं नमोऽतिशयराजिविभूषिताय
तुभ्यं नमः कुमतितापसुभञ्जनाय ।
तुभ्यं नमो मुखपयोधिवहित्रकाय
तुभ्यं नमो विगतकैतवमत्सराय ॥ ६

तुभ्यं नमो विदितभव्यजनाशयाय
तुभ्यं नमो निखिलसंशयवारकाय ।
तुभ्यं नमः प्रथितकीर्त्तियशोन्विताय
तुभ्यं नमो जितहृषीकमुनीश्वराय ॥ ७

तुभ्यं नमःप्रमितपुद्गलनिर्मिताय
तुभ्यं नमः सकलवाङ्मयपारगाय ।
तुभ्यं नमो भविकचातकनीरदाय
तुभ्यं नमश्चरणवैभवदायकाय ॥ कुलकम् ८

वीराष्टकं पठति यः सततं त्रिसन्ध्यं
त्यक्त्वा सदा प्रबलमोहजदुष्प्रमादम् ।
तद्धाम्नि मङ्क्षु कुरुते कमला निवासं
कल्याणसागर भुवामसतामभीष्टम् ॥ ९

पू.आ.श्री कल्याणसागरसूरिविरचितः

## २१. ॥ सत्यपुरीयश्रीमहावीरस्वामिस्तवः ॥

(द्रुतविलम्बित)

त्वमसि सद्गुणनन्दनमन्दरस्त्वमसि मेरुलतावलिमण्डपः ।
त्वमसि खेचरनाकिनरस्तुतस्त्वमसि रूपवशीकृतविष्टपः ॥१

त्वमसि योगिजनौघशिरोमणिस्त्वमसि कान्तिविकाशितदिग्गणः ।
त्वमसि भाषितरञ्जितनागरस्त्वमसि सिद्धिवशारतिमोहितः ॥२

त्वमसि भद्रकरः करुणालयस्त्वमसि भक्तचकोरनिशाकरः ।
त्वमसि दर्शनहर्षितमानवस्त्वमसि संसृतिसागरपोतकः ॥ ३

त्वमसि मोहमहीरुहमुद्गरस्त्वमसि धर्मधनो धनकामदः ।
त्वमसि संशयवायुभुजङ्गमस्त्वमसि दर्शितजीवदयापथः ॥ ४

त्वमसि धारितशीलविभूषणस्त्वमसि कामितदामसुरद्रुमः ।
त्वमसि देवनराधिपवन्दितस्त्वमसि जाड्यतमिस्रनभोमणिः ॥५

त्वमसि कर्मवनावनिपावकस्त्वमसि सेवकपूजितपङ्कजः ।
त्वमसि जन्मजरामृतिवारणस्त्वमसि शाश्वतमोक्षपदस्थितः ॥६

त्वमसि मञ्जुलसत्कुलदीपकस्त्वमसि सर्वपदार्थविशारदः ।
त्वमसि लोकनतो नतवत्सलस्त्वमसि देवशिलीमुखपुष्करः ॥ ७

त्वमसि नाथमनोहरलक्षणस्त्वमसि सम्मतजीवगणः सदा ।
त्वमसि संवरमार्गविधायकस्त्वमसि दानगुणाल्पितकल्पकः ॥८

त्वमसि चित्रकरातिशयाञ्चितस्त्वमसि सूरितीश्वरसेवितः ।
त्वमसि दुःखिजनावनतत्परस्त्वमसि हारनिभः क्षितिमण्डले॥ ९

त्वमसि शिष्टनरामरसङ्गतस्त्वमसि लोकचमत्कृतनिर्ममः ।
त्वमसि केवलिसाधुनतो मुदा त्वमसि कुग्रहदोषनिवारकः ॥१०

त्वमसि सद्व्रतभारवृषोपमस्त्वमसि वीतमदो विशदाशयः ।
त्वमसि तीर्थपते रुचिराह्वयस्त्वमसि गुप्तिपवित्रितमानसः ॥ ११

त्वमसि बुद्धिपराजितगीःपति-स्त्वमसि हाटकसन्निभविग्रहः ।
त्वमसि भाग्यवि(नाश?)कासनिकेतन-
स्त्वमसि लोभमहीधरवज्रकः ॥ १२

त्वमसि सप्तभयार्णवतारकस्त्वमसि दुर्घटसत्यनयाध्वगः ।
त्वमसि सम्मदसन्ततिकारकस्त्वमसि सिद्धिकरो वरदायकः ॥ १३

त्वमसि विश्वजगज्जनवल्लभस्त्वमसि रक्षितभूतकदम्बकः ।
त्वमसि दुर्भगदुस्थहरोनिशं त्वमसि विस्तृतलोचनरञ्जकः ॥१४

त्वमसि विश्वपतिर्श्रितबान्धवस्त्वमसि वक्त्रतिरस्कृतचन्द्रमाः ।
त्वमसि वैरिसमुद्रघटोद्भवस्त्वमसि तीर्थकरः प्रतिबोधदः ॥१५

त्वमसि भव्यशिखण्डिबलाहकस्त्वमसि बन्धुरमूर्तिधरोऽजरः ।
त्वमसि सर्वविभुर्विगतातुरस्त्वमसि संयममण्डनमण्डितः ॥१६

त्वमसि शान्तरसाश्रितचेतनस्त्वमसि पौरुषनिर्जितकार्मणः ।
त्वमसि दुर्लभबोधिनिबन्धनस्त्वमसि कामदुघाधिकदानदः ॥ १७

त्वमसि सञ्चितपुण्यनिधिः परस्त्वमसि विघ्नसरीसृपगारुडः ।
त्वमसि शुभ्रयशोभरमन्दिरस्त्वमसि सङ्घजयोन्नतिहर्षदः ॥१८

त्वमसि सत्त्वहितो मतिवर्द्धनस्त्वमसि धर्म्मसरोजसरःसमः ।
त्वमसि चक्रिनतो भविशेखरस्त्वमसि पारगतः परमेश्वरः ॥१९

त्वमसि सत्यपुरामलभूषणस्त्वमसि संश्रितपादमृगाधिपः ।
त्वमसि केवलयुग्मविराजित-
स्त्वमसि वीरजिनो जिननायकः ॥ २०

त्वमसि शासनपोतनियामकस्त्वमसि साधुदयालुललामकः ।
त्वमसि सौख्यकरस्त्रिशलाङ्गज-
स्त्वमसि विश्वगुरुः शुभसागरः ॥ (हरिणी) २१

जयति सततं वीरः शम्भुर्भवोदधिपारगो
जगति तिलकः पापध्वान्ते गभस्तिरनुत्तरः ।

कुशलनिलयस्तीर्थस्वामी सुरासुरसंस्तुतो
विदितमहिमा विश्वे विश्वेश्वरार्चितपत्कजः ॥ (वंशस्थ) २२

कुलावतंसं यतिधर्म्मदेशकं कलन्दिकापारगमङ्गिपालकम् ।
नवीमि वीरं मतिदं हितावहं मनोर्थसम्पादनकामकुम्भकम् ॥२३
(भुजङ्गप्रयात)

प्रभुं देववन्द्यं जिनं विश्वनाथं जगच्चारुचूडामणिं वीरनाथम् ।
स्तुवेहं जितारिं नतस्वर्गिनाथं
सदा शान्तिकारं नरेन्द्राधिनाथम् ॥ (भुजङ्गप्रयात) २४

श्रीराजं वीरदेवं प्रणतसुरमणिं देवमर्त्याधिराजं
कल्याणाम्भोधिवृद्धौ विमलशशधरं भाग्यसौभाग्यकारम् ।
ये भव्याः संस्तुवन्ति प्रतिदिनमनघं चारुभक्त्या त्रिसन्ध्यं
प्रख्यातिं ते लभन्ते त्रिभुवनविदितां कीर्तिप्राग्भारकर्त्रीम् ॥२५
(स्रग्धरा)

पू.आ.श्री कुलमण्डनसूरिविरचितम्
चित्रबन्धयुक्तम्

## २२. ॥ श्रीवीरजिनस्तवनम् ॥

विश्वश्रीद्ध ! रजश्छिदे गरिमदत्या(त्वां)दर्पनाशे क्षमं
सद्वाचं स्तुवयाश्रवं परिहरन् क्ष्मासूर्य दुःखक्षमम् ।
निस्तन्द्रं तपनद्वसुं दुरितसूदारिक्थ ! वीर ! स्थिरं
रम्यश्रीविरसोऽसकामनिकृतिं मद्रालयं शङ्करम् ॥(शा.वि.) १

(चतुर्गुनाममङ्गलं चक्रम्)

(अनुष्टुप्)

तनुते यन्नुतिं जम्भजिद्राजी मुदिता द्रुतम् ।
तं स्तुवे वीततन्द्राजिभयं भावेन भास्वता ॥ (मुशलम्) २

ततयास्तनृणां मुक्त्यै या नीरुक्तनवे नता ।
तारभाभार तापास स पाताक्षर रक्ष ताः ॥ (शुलम्) ३

ततकष्टावलीलावलीलाढ्य श्रीवरा रताः ।
ताररावश्रुतौ वीर रवीद्धाभ सुरास्तव ॥ (शङ्खः) ४

तज्ज्ञाःसदमलेक्ष्वाकुवंशजेयुः शर्मिस्तव ।
वरेण्यानन विश्वेश शरणं सुसुखेच्छवः ॥ (श्रीकरी) ५

तञ्शमीश विशस्त्वालमवन्दत घनारव ।
वधवल्ल्यां वह्निवद्यो वरिवर्त्सि वशी वरः ॥ (चामरम्) ६

तरणे चिररूढामतमस्सु चरणादरः ।
रसिकस्तव भूयासं सेवनेऽनल्पमानसः ॥ (हलम्) ७

तत्यजेऽत्र तकाश्चण्डपार्श्वमिन्द्रस्तुताहस ।
सर्वदोषैस्तत्क्षयाशां शान्ताघ ददतो विशाम् ॥ (भल्लम्) ८

तरीवाचरसि ज्ञानोदारनिःशेषभूस्पृशाम् ।
शान्तितुष्टिकरापारभवाब्धौ विश्ववन्दितः ॥ (धनुः) ९

तम्यतिक्रम्यतेऽत्यन्तमोहदुःखमयीशितः ।
तवेन ! सेवयाऽवश्यं भव्यैः स्थिरशिवस्थितः ॥ १०

(द्वाभ्यां खड्गः)

तमहं विनमामीत(न)तन्द्र वीर सतां मत ।
तपो यस्त्वं व्यधा विश्ववित्तं वीतरिपोऽतमः ॥(शक्तिः) ११

तपःशमरमारामतर ! शं गुणसत्तम ! ।
मम गुप्ताश्रिताधीश ! मरणक्लेशहृदिश ! ॥ (छत्रम्) १२

तविषे लसत्यमोहाशय चारुरुचायशः ।
शक्राली त्वन्नतेर्ज्ञानभासुराऽपपरा सुभीः ॥ (रथपदम्) १३

तवीत्यवीतसाराज्ञा प्राणिनां प्रास्तभीः शुभा ।
भाराशेऽशेषभावारीन् शिवदा तव रंहसा ॥(पूर्णकलशः) १४

तत्त्वसार तरसा ना त्वयि राज्यद-धीरसा ।
साराद्धुतेऽमोह ! धीरा रज्यते वीर मोदतः ॥(अर्धभ्रमः) १५

तरसाऽस्तमोहत्वेत तत्त्वेह प्रशमान्वित ।
तन्विमान्यवनीतात ! ततानीष्टान्यसारत ! ॥ (कमलम्) १६

तवांह्री वन्दते साऽनुकम्प यः साऽय ! भावतः ।
तस्य नानागुणरयाऽन्यो नम्यो नो नोदितैनसः ॥ (शरः) १७

तत्परः सततं शिश्रीषामि त्वां दारितांहसम् ।
सम्पदादाऽपसंसार रसाऽसन्तमसं मत ॥ (त्रिशूलम्) १८

नमाऽनाश्रितशर्मांशु नेहमन्द दयान्वित ।
तथा त्वत्तः सुरेश ! त्वं केतुबोधिधियं हितः ॥ (वज्रम्) १९

यस्तेऽष्टादशचित्रचक्रविमलं वीर ! स्तवं सश्रियं
भक्त्यैवं कुलमण्डनोऽतत महाज्ञानातनुश्रीशुभ ! ।

मुक्तश्रीयुतचन्द्रशेखरगुरुप्राज्यप्रसादादमुं
तं तातात वरः स शान्ततम शं भासा ततः सन्ततम् ॥ २०

(शा.वि.) (परिधिकाव्यम्)

चक्राऽयोमुखशूलशङ्खसहिते सुश्रीकरीचामरे
सीरं भल्लशरासने असिलता शक्त्यातपत्रे रथः ।
कुम्भाऽर्द्धभ्रमपङ्कजानि च शरस्तस्मात् त्रिशूलाशनी
चित्रैरेभिरभिष्टुतः शुभधियां वीर ! त्वमेधि श्रिये ॥ २१

(शा.वि.)

पू.आ.श्री रत्नशेखरसूरीश्वरशिष्यरत्न-
पू.आ.श्री हेमचन्द्रसूरिविरचितः

## २३. ॥ श्रीमहावीरस्वामिस्तवः ॥

(अनुष्टुप्)

उद्गिरन्निव भावस्थं, तमेवानन्दमात्मना ।
श्रेणिकः श्रीमहावीरं, जितमारं मृदूक्तिभिः ॥ १

ध्येयस्त्वं सर्वसत्त्वानामन्यं न ध्यायसि प्रभो ! ।
पूज्यस्त्वं विबुधेशानामन्यः पूज्यो न तेऽस्ति यत् ॥ २

सेव्यस्त्वं जगतां नाथ !, न सेव्यः कोऽपि ते प्रभो ! ।
स्तुत्यस्त्वं स्तूयसे नान्यो, जगत्साम्राज्यलब्धितः ॥ ३

शरण्यस्त्वं हि सर्वेषां, न कोऽपि शरणं तव ।
त्वं प्रभुर्विश्वविश्वेषमान्यो नास्ति तव प्रभुः ॥ ४

सिद्धिसौख्यं त्वदायत्तं, नापरस्तस्य दायकः ।
परात्परतरस्त्वं हि, त्वत्तो नास्ति परः क्वचित् ॥ ५

त्वमनादिरनन्तस्त्वं, ज्योतीरूपं परात्परम् ।
त्वामामनन्ति विबुधा, जगत्त्रितयदर्शिनम् ॥ ६

नमस्तुभ्यं भवाम्भोधियानपात्राय तायिने ।
त्वत्तोऽहं परमानन्दं, प्रार्थये प्रार्थितपद ! ॥ ७

तव प्रेष्योऽस्मि नाथाहं, त्वत्तो नाथामि नाथताम् ।
जगच्छरण्य ! मां रक्ष, प्रसीद परमेश्वरः ॥ ८

पू.आ.श्री लक्ष्मीसूरिविरचितः

## २४. ॥ श्रीमहावीरस्वामिस्तवः ॥

जगद्बन्धुः कृपासिन्धु, स्वामिन् ! ख्यातोऽसि किं ततः ।
दत्त्वाऽस्मभ्यं महादुःखं, महानन्दं श्रितः स्वयम् ॥(अनुष्टुप्)१

हहा महाधमतमा, विश्वतारक ! नारकाः ।
प्रमोदं कलयामासु–र्ये ननु त्यजति त्वयि ॥ (अनुष्टुप्) २

विश्वत्रयाधार ! कृपानिधे ! त्वं,
विज्ञप्तिमेकां शृणु सङ्घनाथ ! ।
सङ्घस्य रागो विविधानुभावो,
विघ्नस्य कर्ता किमु नात्र जातः ॥ (इन्द्रवज्रा) ३

वीरेति वीरेत्यभिधानमुक्त्वा,
कस्याभिमुख्यं च विधाय पृच्छाम् ।
निःसंशयाः स्यामः कथं च मुग्धा–
नाश्वास्य मुक्तिं गतवान् स्वयं यत् ॥ (इन्द्रवज्रा) ४

त्वत्सदृशो नास्त्यधुना जगत्यां,
यः सङ्घसारां कुरुते निरीह ! ।

भावाक्षिसद्दायक ! जीवनेत-
रमोघ ! कस्त्वामभिधास्यते च ॥ (उपजाति) ५

त्राताऽसि धातः ! किमुपेक्षसेऽस्मान्,
ज्ञात्वापि चित्तस्य गतिं जनानाम् ।
मूर्तेन ज्ञानेन भवत्स्वरूपं,
तूर्णं ग्रहीष्यामि विभोः कथं हा ॥ (इन्द्रवज्रा) ६

पू.आ. श्रीलक्ष्मीसूरिविरचितः

## २५. ॥ श्रीमहावीरस्वामिस्तवः ॥

वीतराग ! तव दर्शनमुक्तौ, भ्रान्तवान्निखिलयोनिनिकाये ।
भूरिशोऽहमथ तद्यदि लब्धं, तेन माऽस्तु सहसाऽत्र वियोगः ॥१
(स्वागता)

वीतराग ! सफलः स वासरः, स क्षणः स पलः सुलक्षणः ।
याम एव स तु सर्वकामदो, यत्र वन्दनमहस्तवाभवत् ॥ २
(रथोद्धता)

मां प्रलोभ्य गमनं तव नार्हं, बालकं प्रतिदिनं कृतमिष्टम् ।
गोयमेति वचनैः श्रुतिमध्ये, को वदिष्यति तवागमसारम् ॥३
(स्वागता)

देहि देहि जिननाथ ! दर्शनं, लङ्घनस्य समयो न शोभते ।
मुञ्च मुञ्च भगवन्निजाग्रहं, तारकेति कथमन्यथा प्रथा ॥ ४
(रथोद्धता)

कस्य पादकमलानि (लं च) वन्द्यते,
जीवितं त्वयि विधायितं मया ।
युक्तितश्च विविधात्मनिश्चयात्,
स्वीकृतोऽसि जिनदेव ! पाहि माम् ॥ (रथोद्धता) ५

पू.आ.श्री सोमसुन्दरसूरिकृतम्

## २६. ॥ श्रीवीरजिनस्तवनम् ॥

(उपजाति)

छत्रत्रयालङ्कृतमौलिमण्डनं
संवीज्यमानं चमरैः सुरेश्वरैः ।
जिनाधिराजं मृगराजविष्टरो-
पविष्टमेकं प्रभुवीरमानुमः ॥ १

गङ्गातरङ्गा इव चङ्गशुद्धतास्-
त्रिलोकलीलाक्रमविक्रमोद्धताः ।
गुणास्तुरङ्गाः कियतोऽपि यांस्तव
श्रितैः सुखाप्यः कविसादिभिर्जयः ॥ २

तव प्रभावस्तनुभूरजल्पतोऽ-
प्यनल्पसङ्कल्पितरोषतोषणः ।
त्वदङ्गणाग्रे युवराजवज्जवाद्
यात्रामिषाल्लोठयते जगत्त्रयीम् ॥ ३

आज्ञा परेषां न रराज निर्जरे-
श्वरादिकानां प्रभवेत् सचेतने ।

अचेतनैरप्यनलाम्बुविद्युदा-
दिकैस्त्वदाज्ञा तु न लङ्घ्यतेऽद्भुतम् ॥ ४

स्यादैहिकानेकपदार्थसिद्धये
श्रद्धा जिनाधीश ! यथा प्रथावती ।
तथाऽत्रपारत्रिकशर्मनिर्मिता-
वुपायभूता त्वयि सा ममाऽनिशम् ॥ ५

पुरः स्फुरद्धूपजधूमडम्बरं
चिरं सृजन्तोऽपि तवेह देहिनः ।
स्वमुज्ज्वलैः पुण्यदलैर्बरीभ्रति
त्रिलोकमात्मीययशोभिरप्यहो ! ॥ ६

न राजयक्ष्मादिकदूषिताः स्युः
नरा जयक्ष्मादिकराज्यऋद्धाः ।
प्रभावतस्ते रवितोऽतिशायि-
प्रभावतस्तेन न के स्तुयुस्त्वाम् ॥ ७

(शार्दूलविक्रिडीत)

तेजोभिर्विजितो रविः सह परीवारेण बद्धाञ्जलिः ।
पादाग्रे तव सेवनां विरचयत्येकाग्रचित्तः सदा ।
तत् किं तस्य सुतः शनिस्तनुभवा भद्रा तनूजस्तथा ।
कीनाशस्तदधिष्ठिता च भरणी त्वद्भाक्तिकां(कानां) पुरः ॥८

नाणद्याणकनन्दिवर्द्धनपुरश्रीहस्तिकुण्डीपुरी-
श्रीमद्ब्राह्मणवाटकेषु बृहति ग्रामे तथा जीवति ।
श्रीवीरे क्षितिपालमुख्यविपुलप्रासादसंस्थापिताः
तन्मूर्तीः गुरुसोमसुन्दरमहःकीर्त्तिर्नमाम्यन्वहम् ॥ ९

पू.आ.श्री प्रद्युम्नसूरिकृता

## २७. ॥ श्रीवीरजिनेन्द्रस्तुतिः ॥

(स्रग्धरा)

श्रेयो यो नारनाथः कलिमलकदनो निर्मलध्यानपूतः,
संसारान्तर्गतान् वै विकलतरजनान् धारयन् देशनातः ।
पूज्यो नित्यं भवे वोऽतिशमघनरसोऽमेयशक्तिर्बिभर्ता,
वीरो स त्रैशलेयो दिशतु जिनवरोऽघौघहा वै विशालम् ॥ १

क्षोण्यां क्षान्त्या जनानां क्षपितकलिमलाः क्षय्यपक्षं शरण्याः,
स्वान्तारण्ये सरन्तो जिनपतिनिवहाः छेदयन्तु प्रशान्ताः ।
स्फुर्जज्ज्ञानं सुरेन्द्रैः कुमतिमतिहरन्तोऽर्चितानो विधेयु-
र्येषां कीर्त्यौघमध्ये मुनिजनवृषभा ध्यानलीलां रटन्ति ॥ २

संसारोदन्वदम्भस्यति दममतयो मज्जतां यानपात्रं,
पाठं दोषैर्विहीनं बहुगमगहनं सार्थशब्दौघदेहम् ।
ये भक्त्या साधुलोका जिनमतमनघं सम्प्रदायात् पठन्ति,
यान्ति प्रद्युम्नसूरित्वमलतनुभृतां तेऽस्य सम्यक्श्रुतस्य ॥ ३

पू.आ.श्री पार्श्वेन्दुसूरिकृता

## २८. ॥ श्रीमहावीरस्वामिस्तुतिः ॥

(भुजङ्गप्रयात)

जगत्कल्पना कल्पवृक्षोपमानं लसत्केवलज्ञानलक्ष्मीनिधानम्।
महानन्दशोभाकरं स्वर्णदेहं सदा श्रीमहावीरदेवं स्तुवेऽहम् ॥१

तपोलब्धिसम्प्राप्तसंसारपारं हतानेकदुर्वारभावारिवारम् ।
शुभध्यानतेजोजितानङ्गदेहं सदा श्रीमहावीरदेवं स्तुवेऽहम् ॥२

सुराणामधीशैरलं सेव्यमानं त्रिलोके भवं भूरिविस्तीर्णदानम् ।
नमन्नाकिनागेन्द्रसम्पूज्यदेहं सदा श्रीमहावीरदेवं स्तुवेऽहम् ॥३

विषव्यालवेतालदोषैरजेयं सदाभोगसौभाग्यभागैरमेयम् ।
कृताशेषभव्यालिमाङ्गल्यगेहं सदा श्रीमहावीरदेवं स्तुवेऽहम्॥४

एवं महावीरजिनाधिराजं भक्त्यानिशं ये भविनः स्तुवन्ति ।
कल्याणमालाकलितं त्रिलोके ते शाश्वतं सौख्यभरं लभन्ते ॥५

(इन्द्रवज्रा)

पू.आ.श्री भावदेवसूरिविरचितम्

केवलाक्षरमयम्

## २९. ॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

अनवरतममरनरवरशतनतपदकमलयमल ! मलदलन ! ।
अनपशदचरणचयमय ! ततरभरधरणधवल ! जय ॥ १

जय सरसवचनवशजन ! समघन ! सदवयवसरलकरचरण ! ।
जलजदलनयन ! गतमल ! शशधरवरवदन ! गजगमन ॥ २

जय सदय ! सनय ! भवदवकवलन [शमन]
नवजलदसमयसम ! अचलबल ! सकलभयहर !
शमदमलयभवन ! जगदवन ! ॥ ३

अदमतमकरणगजगणखरतरखरनखरनखरभवधरण ! ।
अवतमसमसममघमयमपहर मम समयतपनपद ! ॥ ४

हतसततभवजगमचर मत कर लसदभय दहन कमनग ! ।
अपनय मम भवरसमरमशरणजनशरण ! गतमरण ! ॥ ५

असदयवशभवदवकरगतरसदलपटलहरणखरपवन ! ।
मम वचनमनसमहमहरवतर कनकनगवदतरल ! ॥ ६

जनमथनमदनघनमदफणधरगरलदरदमनपतगवर ! ।
हतशकलमव मम जननजलगतलवणकणवदमलय ॥ ७

नमदमलनयनकजवनदशशतकरबहलगहनभवदहन ! ।
अकरणगमपरबलरणजयभट ! जय परमपदसदन ! ॥ ८

इति भक्तिरचित-विमलाक्षरमालया महावीर ! [जिनाधीश !]।
शुभभावदेवसूरिस्तुत ! केवलमक्षरं देहि ॥ ९

पू. आ. श्री हीरविजयसूरिकृतम्

## ३०. ॥ श्रीमहावीरजिनस्तोत्रम् ॥

भक्त्या नमस्कृत्य गुरुं गुरुं गुरुं,
बुद्ध्या सतां सर्वदया दयादया ।
भास्वत्प्रभावं विभयाऽभयाभया,
मुनीशितारं सुदरं दरन्दरम् ॥ (उपजाति) १

श्रीवीरमर्हन्तमहो महोमहो-
दयं स्तुवे भक्तहितं हितं हि तम् ।
देवाधिदेवं सुमनोमनोमनो-
हारानुभावं सकलं कलङ्कलम् ॥ (यु.) (उपजाति) २

श्रीत्रैशलेयोऽवृजिनो जिनो जिनोऽ-
नङ्गाधिराजोऽममतामतामताः ।
देयादलं वः परमारमारमा-
पीयूषगीर्देवरतीरतीरतीः ॥ (इन्द्रवंशा) ३

श्रीज्ञातपुत्रं विरतारतारता-
सिद्ध्यै श्रयध्वं समयामयामया ।
सदा स(श)माद्यैःर्वसुधासुधासुधा-
करोपमं साधुपरम्परं परम् ॥ (उपजाति) ४

श्रीवर्धमानोऽसुमतो मतोऽमतोऽ-
भवोऽवताद्वश्च कलं कलं कलम् ।
तीर्थेतसत्रासदयो दयोदयोऽ-
हितोऽपि कामं जलतालतालता ॥ (उपजाति) ५

भदन्त ! देवार्य ! भवाभवाभवा-
वतार ! कामे पिहिते ! ऽहितेहिते ।
निःश्रेयसानन्दकृते कृते कृते-
ज्ञानामृतान्तर्दम ! माऽममाममा ॥ (उपजाति) ६

अकारि ते गौः सुधया धयाधया-
ग्रस्ताऽविमुक्ताऽमितयातयातया ।
यानन्तमाहात्म्यमयामयामया,
सितर्त्तिधेया सुरसारसारसा ॥ (उपजाति) ७

इत्थं स्तुतो जिनवरोऽखिलभाववेदी,
सिद्धार्थभूपकुलकाननकल्पवृक्षः ।
सूरीशितुर्विजयदानगुरोर्विनेय-
सूरीशहीरविजयेन मुदा प्रसन्नः ॥ (वसन्ततिलका) ८

पू.उपा.श्री उदयधर्मविरचितम्
द्वात्रिंशद्दलकमलबन्धबन्धुरम्

# ३१. ॥ श्रीमहावीरस्वामिस्तवनम् ॥

(स्वागता)

सन्नमत्त्रिदशवन्द्यपदं श्रीवर्धमानममलं विजितारम् ।
संस्तवीमि भवसागरपारं प्राप्तुमिच्छुरुरुसद्गुणरत्नम् ॥ १

सद्भिरादृतमुरीकृतयत्नं त्वन्मते गततमस्युरुभासि ।
संशयावलिहरेऽद्य विलासि स्वान्तमस्तु मम संयमगेह ॥ २

सङ्गमुक्त ! भवदावजदाहं त्वं पयोधररव ! त्रिशलासू- ।
सम्भवं तमदिताङ्गिमनःसूदात्तधीरिममनोगजवारी ॥ ३

सन्ततं जिन ! भवानघहारी यैरसेव्यततरां गततन्द्रम् ।
सस्पृहं श्रयति तान्नृसुरेन्द्रश्रीर्मनोहररसापि दुरापा ॥ ४

सङ्गतं गमशतैर्गुरुपापापोहकं जिन ! नयद्रुमकन्दः ।
सम्मदाय नहि कस्य तवाऽदस्सद्वचोऽमिततमोभरदीपः ॥ ५

सञ्चितं गुणगणैर्भवतापच्छेदि तेऽद्भुततमं पदपद्मम् ।
संसृजन्ति भविकाः श्रितपद्मं स्वेऽमले हृदि दितारतिकामम् ॥६

सङ्करेऽपि पतितास्तव नामध्यानमङ्गजजलातप ! येऽधुः ।
सम्पदं त इह यान्ति सुसाधुश्रेणिसेवित ! तपस्ततितीव्र ! ॥७

सज्जनाम्बुजविबोधकृति ब्रध्नोपमो जननीरधितोऽतः ।
संसदा दिविषदां नत ! तातः पाहि मां शममयस्त्वमनीव ! ॥८

सम्यगूर्ध्वभुवने मरुतोञ्चत् पञ्चमस्वररवैः सुसुरीकाः ।
सञ्जगुर्गुरु यशस्तव राकाचन्द्रमण्डललसद्गुणचारो ! ॥ ९

सम्परायरिपुभिः सह मारो वर्धतेऽमद ! दधन्मयि नोदम् ।
स त्वयाऽवगणितः किमकन्दः
काञ्चनच्छविविभूषितकाय ! ॥ १०

संसृतिं भयकरीमपहाय स्फीतिनिर्मल ! लभंस्तव बोधम् ।
शर्म नैर्वृतममन्दमबाधं यामि नायक ! कदाहमकर्मा ॥ ११

सङ्गरे श्रियममी अरिमर्माविच्छरोत्कररयेऽप्युपयेमुः ।
संस्मृतस्त्वमसि यैर्भवितामुद्दामकामिततरुः शुभ ! शस्त ! ॥१२

सङ्गमामरकुदर्पदवास्तप्रावृडम्बुद ! दयापर ! देव ! ।
सम्प्रति स्फुरति ते महिमा-
वच्छासनं भुवि विभो ! सविवेकम् ॥ १३

सत्पथप्रथनसार्थपतिं कस्त्वां जिनेश ! न नमत्यपकाम ! ।
सत्कलाकुवलयामृतधामन्नद्भुता विधिधियं दमशाल ! ॥ १४

सर्वथा भयकरः कलिकालस्तावदङ्गिनि निबद्धविटम्बः ।
संश्रितौ तव पदौ नहि यावद् वासवायुधधरौ रिपुयोध ! ॥१५

सर्वदापि भगवन्नघबन्धं प्रार्थयाम्यसमनो बहिरङ्गम् ।
सन्निधौ निजपदोरितरागं मां विधेहि शशभृद्वदनश्री ! ॥ १६

श्रीरत्नसिंहसूरीन्द्रपादपद्ममधुव्रतः ।
चकारोदयधर्माऽमुं स्तवं कमलबन्धगम् ॥ (शा.वि.) १७

परिधिश्लोकः-

श्रीसिद्धार्थनरेशनन्दन ! जिन ! श्रीवीर ! नीरुक्तनो !
स्तुत्वा त्वां नयनाग्नि (३२)सम्मितदलाम्भोजन्मबन्धस्तवात् ।
नेहे चक्रिपदं न वासवपदं नाऽस्तापदं सम्पदं
किन्तु त्वत्पदपङ्कयोर्नियमले भृङ्गायतां मे मनः ॥(शा.वि.)१८

पू. उपा. श्री यशोविजयविरचितम्

## ३२. ॥ श्रीमहावीरप्रभुस्तोत्रम् ॥

(मन्दाक्रान्ता)

ऐन्द्रं ज्योतिः किमपि कुनय-ध्वान्त-विध्वंससज्जं,
सद्योऽविद्योज्झितमनुभवे यत्समापत्तिपात्रम् ।
तं 'श्रीवीरं' भुवन-भुवनाभोगसौभाग्यशालि-
ज्ञानादर्शं परमकरुणा-कोमलं स्तोतुमीहे ॥ १

दिव्य-श्रव्य-ध्वनिमभिनवच्छत्र-सच्चामरौघं,
हृद्यातोद्यप्रवर-कुसुमाशोकशोभं सभायाम् ।
स्वामिन् सिंहासनमधिगतं भव्यभामण्डलं त्वां,
ध्यात्वा भूयः कलयति कृती को न सालम्बयोगम् ॥ २

गाढाभ्यस्तात् त्रिभुवनगुरो ! किं न तस्मादकस्मात्,
क्षीणे पापे प्रभवति निरालम्बनो योगमार्गः ।
यस्मादाविर्भवति भवतो दर्शनं केवलाख्यं,
लक्ष्यावेधप्रगुणितधनुर्मुक्तकाण्डोपमानात् ॥ ३

मध्ये त्वाभ्यां भवति चरमावञ्चके नाम योगे,
दिव्यास्त्राणां परमखुरली मोहसैन्यं विजेतुम् ।
तत्प्रौढैकक्रम-परिणमच्छ्रास्त्र-सामर्थ्ययोगा,
रोगातङ्कोज्झितपदमिताः प्रातिभज्ञानभाजः ॥ ४

आस्तामस्ताहितहितदृशो दूरवार्ता तवासौ
इच्छायोगादपि वयमिमे यत्सुखं सम्प्रतीमः ।
तस्याधस्तात् सुरपतिपदं चक्रिणां चापि भोगाः,
योगावेशाद्यपि च गदितं स्वर्गपुण्यं परेषाम् ॥ ५

सेयं भक्तिस्तव यदि मयि स्थैर्यवत्येव भर्त-
स्तत्प्रत्यूहं तदिह कलयन् कामये नैव मुक्तिम् ।
पूर्वं पश्चादपि च विरहः कार्यतो यश्च न स्यात्,
भूतो भावी तदयमुभयोः किं न मुक्तेर्विभागः ॥ ६

मुञ्चाम्येनां न खलु भगवन् ! क्वापि दुःखे सुखे वा,
तत्त्वज्ञाने प्रणयति पुनः सङ्गते सा यदास्ते ।
ईर्ष्याद्वेषैर्विष समयतः शिक्षणीयास्तया स्यु-
र्येनाभेदप्रणयसुभगा सा ज्ञमज्ञं च रक्षेत् ॥ ७

प्राणायामैः किमतनुमरुन्निग्रहक्लेशचण्डैः,
किं वा तीव्रव्रतजप-तपः-संयमैः कायदण्डैः ।
ध्यानावेशैर्लयपरिणतैर्भ्रातृभिः कं सुषुप्ते-
रेका भक्तिस्तव शिवकरी स्वस्ति तस्यै किमन्यैः ॥ ८

मोहध्वान्तप्रशमरविभा पापशैलैकवज्रं,
व्यापत्कन्दोद्दलन-परशुर्दुःखदावाग्निनीरम् ।
कुल्या धर्मे हृदि भुवि शमश्रीसमाकृष्टिविद्या,
कल्याणानां भवनमुदिता भक्तिरेका (व) त्वदीया ॥ ९

त्वं मे माता त्रिभुवनगुरो ! त्वं पिता त्वं च बन्धु-
स्त्वं मे मित्रं त्वमसि शरणं त्वं गतिस्त्वं धृतिर्मे ।
उद्धर्ता त्वं भवजलनिधेर्निवृत्तौ त्वं च धर्ता,
त्वत्तो नान्यं किमपि मनसा संश्रये देवदेवम् ॥ १०

तपगणमुनिरुद्यत्कीर्ति-तेजोभृतां श्री-
"नयविजय" गुरूणां पादपद्मोपजीवी ।
स्तवनमिदमकार्षीद्वीतरागैकभक्तिः,
प्रथितशुचि "यशः" श्रीरुल्लसद्भक्तियुक्तिः ॥ ११

महोपाध्याय – श्री धर्मसागरगणिविरचिता

## ३३. ॥ श्रीमहावीरस्वामिविज्ञप्तिद्वात्रिंशिका ॥

(शार्दूलविक्रीडित)

श्रीमत्स्वर्गिजनार्च्चितक्रमयुगं सङ्क्रान्तविश्वत्रयं,
विज्ञानं विलसद्वचःप्रतिवचःस्याद्वादमुद्राङ्कितम् ।
बिभ्राणं बत बाधवन्ध्यवचनं चापायवन्ध्यस्थितिं,
श्रीमद्वीरजिनेश्वर ! स्तुतिपथं नत्वा नये त्वामहम् ॥ १

ऐश्वर्यादिगुणैकलेशमपि ते वक्तुं न योगीश्वरः,
कोटी-कोटिनिजायुषापि विभवे जिह्वासहस्रैरपि ।
तन्मेऽपि स्पृहयालुता हितवती तत्राऽस्तु तद्वत्पुन-
र्विज्ञप्ताविति नोचिता तव पुरः प्रत्यर्थ्यसौ ज्ञप्तये ॥ २

तत्रापीश ! पुरा पुरातनमदीयाऽऽचार्यवर्यैः पुरः,
प्रज्ञप्ता यदमी द्विषः करकरग्राहं परित्यज्य यान् ।
वाचाऽऽज्ञां प्रतिपद्य ये त्वदरयस्तानेव वाग्गोचरी-
कुर्वे सर्वविदस्तवापि पुरतस्त्वद्भक्तिनुन्नोन्नतः ॥ ३

स्वामिन् सम्प्रति तेऽपि बहुशस्तत्र प्रसिद्धा दश,
शेषाः किञ्चिदकिञ्चिदेतदितरे त्वद्बोधबोध्याश्च ते ।
नामग्राहनिरूपिता हितममी तीर्थस्य ते स्युस्ततः,
प्रीतिर्गाढतरेप्सिता च सततं स्यादावयोस्तत् शृणु ॥ ४

श्रीमद्विक्रमतोऽङ्करामरजनीट्वर्षे (१३९) वशामुक्त्यवाक्
राकाङ्कोऽङ्कतिथीन्दुके(११५९)युगनभोर्के (१२०४)
स्त्रीजिनार्चाद्विषन् ।

विश्वार्केऽ(१२१४) म्बरपल्लवःषडनलार्के(१२३६)द्व्यदर्धराकाग्रही
श्रीमच्छासनदेवतास्तुतिरिपुः खाक्षद्विचन्द्रे(१२५०)पुनः ॥ ५

अष्टाभ्रेष्ववनौ १५०८ जिनप्रतिमया स्पर्द्धी पुनः साधुभि-
र्युग्माङ्गेष्ववनौ च १५६२ सङ्करमतिर्व्योमाश्वबाणावनौ १५७०।
बिम्बार्चाद्विमुखो द्विवाजिशरभूवर्षे १५७२ बभूवाधमः,
सर्वेऽप्येवमिमे दसापि विदिशःस्वीयाऽऽग्रहाद् दुर्ग्रहात्॥ (यु) ६

स्त्रीनिर्वाणनिराकृतौ च सिचयावृत्यङ्गतालिङ्गता,
द्वारं तत्कलकेवलानुदयता चेति प्रतिज्ञावतः ।
तस्मादेव मतिश्रुते कथमिति स्यातां सवस्त्रस्य मे,
प्रज्ञाशून्यहृदस्ततस्तदरुचेर्मानान्न ते मान्यता ॥ ७

मन्वानोऽपि जिनेशि तैजसतनुं नाहारहेतुस्थितिं,
धर्माराधनसाधनान्यपि मुधा बुद्ध्या परित्याजयन् ।
देहं प्रत्युत पालयन्निति विसंवादाद्यवित्सर्ववित् !
निर्वाच्यं च निदर्शयन् कुलवधूस्तेऽरिर्वरं चेष्टते ॥ ८

पक्षः पञ्चदशीमवाप्य सकलीस्यात्तत्र तत्पाक्षिकं,
युक्तं चेति विकल्प्य कल्पनपरः कुह्वादिकक्षाश्रितः ।
ही सांवत्सरिकादिवज्जिनपते ! सङ्केतमुन्मूलयन्,
भूतेष्टादिन एव पाक्षिकरवस्याऽरातिरेषः स्फुटम् ॥ ९

ज्ञानादीन्युपचारसाध्यशुचितानीष्टप्रदाऽनिष्टहृद्-
भावानीति तव प्रणीतसमये दृष्ट्वापि वाऽपेतदृग् ।
ज्ञानाऽऽचारहितोपचारमुपधानादीप्सिताऽसाधनं,
विद्वानेतदिति प्रभो ! प्रभुपुरः किं नो व्रजेन्निग्रहम् ॥ १०

पावित्र्येण विवर्जितेति रमणी नाऽर्हत्सपर्योचिता,
मत्वा तां प्रतिषिद्धवान्किमु न च ज्ञानादिसम्पद्ग्रहम् ।
कादाचित्कमशौचमन्यसदृशं न ज्ञातवानज्ञराट्,
दुर्ज्ञेयस्त्वरयाऽरिरेष भगवन् ! सम्प्रत्यमीषां नृणाम् ॥ ११

वृद्धौ मासतिथी प्रमाणमथवा ते न प्रमाणं किमु,
ब्रूहीत्येवमुदीरितः प्रतिवचोऽशक्तः कुकर्माऽरिजित् ! ।
वाचाऽऽज्ञाविमुखः प्रसिद्धिमगमत् श्रीवार्षिके पर्वणि,
प्राप्तानन्द इव स्मितं च कुरुते कृत्वा हि तत् श्रावणे ॥ १२

प्रायश्चित्तकृतिः प्रतिक्रमणसत्कृत्यं द्विशः प्रत्यहं,
प्रज्ञप्तं भगवंस्त्वया तदधिकं कुर्वीत कः काम्यधीः ।
तद्दृष्टान्तमुखेन संवरमयं सामायिकादीव यत्,
पर्वस्वेव नु पौषधं नियमयन्नस्ति त्वदाज्ञाबहिः ॥ १३

ईर्यां सामयिके सुचित्तजननीमन्ते प्रतिक्रामयन्,
सद्बीजाङ्कुरितक्षमामिव हलेनोल्लेखयन्नल्पधीः ।
दोषापौषधिनोऽन्त्ययामसमये सामायिकं शिक्षयन्,
दक्षंमन्यजनः कथं कथय मां स्वामिंस्त्वदाज्ञापरः ॥ १४

आयुःपर्यवसायिपञ्चयमवत् त्रिदण्डकोच्चारणं,
सम्यक् सामयिके जनेति मतिकृन्नो नन्दिपूर्वं तथा ।
प्रत्याख्यानविधावुभे इति विभो ! स्यात् सोऽनुकम्प्यः कथं ?
तद्यद्देव ! दिवाकरद्युतिततिः कुर्वीत किं पेचकम् ॥ १५

पीयूषद्विषतो विषादनमिव प्रीताशुमृत्योः पुन-
र्भूपाज्ञापरिपन्थिनोऽलमटवीस्तेनैकनिश्राश्रमः ।

नद्याः साधनमस्य चाधममतेश्चामुण्डिकाराधनं,
युक्तं ह्येव तवाहितस्य हितकृत् ! खेदं वृथा मा कृथाः ॥ १६

किञ्चिद्धर्मवशेन वस्तु निखिलं साधर्म्यवैधर्म्यभा-,
गन्योऽन्यं प्रतिवस्तुविस्तरविभुज्ञानिन्नजानन्नयम् ।
श्रद्धालुर्मुखवस्त्रिकाग्रहणतः स्यात्साधुलिङ्गी ततो,
नो युक्तं तदिति प्रकल्पनपरः पापात्मराड् विश्रुतः ॥ १७

किञ्चारोपयता तुलां निलयिनः स्वात्मानमाप्तप्रभो !
तेनाऽऽनायि निजे गले दृढतरः पाशः स्वयं दुर्धिया ।
धान्याऽऽहारजलोपचारशुचिता-वस्त्रावृताऽवाच्यप-
न्यासार्हन्नति-जैनशासनमतिश्रद्धानसद्ध्यानतः ॥ १८

हत्वाऽऽवश्यकभूपतिं जिनपते ! तत्कण्ठहारोपमं !
द्विः सङ्ख्यानियमं समत्वनृपतेस्सत्संवरैकात्मनः ।
कण्ठे पाशमधीश ! पश्य पुरतः कुर्वन्नुपादाय वै,
षड्जीवेष्वघृणो घृणास्पदमसौ स्यात्ते कथं संवरेट् ! ॥ १९

प्रायस्तुल्यकदाग्रही शरमितश्चक्षुर्मितेन प्रभो !,
सभ्यान्तस्तदयं पुरस्तव तिरस्कार्यस्त्वनार्यप्रभुः ।
तद्वत्रिस्तुतिकोऽपि कोपदहनः काम्यः कुकर्मात्मनां,
कोप्यस्त्वद्वचनामृतैकरसिकैर्बाह्यातिबाह्यो यतः ॥ २०

स्वामिंश्चित्रकृदश्रुतं तव रिपोरेकं चरित्रं शृणु,
त्वत्तीर्थस्य नमस्कृतिं च वचसा स्वीकृत्य तन्मध्यगा ।
न स्तुत्या श्रुतदेवतेति वदति श्रुत्वापि तत्सन्निधे-
रौन्नत्यं जिनशासनस्य सततं श्रीहेमचन्द्रादितः ॥ २१

विश्वार्च्यक्रम ! हे महाजडजनव्यामोहकृद्दुर्गिरा,
त्वद्बिम्बार्चनदोषदर्शनपराऽपुण्याक्षराक्षूणया ।
षड्जीवेष्वनुकम्पयार्द्रहृदयोऽस्मीति ब्रुवाणो बहि-
र्विश्वास्य प्रतिघातको हतघृणः किंयोनिभावीभवेत् ॥ २२

नद्युत्तारपुरोविहारकरणं वाचंयमानां जिनाऽऽ-
देशः पेशलमुत्तरं विरचयन्नर्हन्नपीति प्रभो ! ।
पूजाऽणुव्रतिनोऽर्हतां न कुसुमैर्युक्ता जिनेत्यावदन्,
मद्याशीव तव द्विषन्नहह वै वैरूप्यभागीक्ष्यताम् ॥ २३

चार्वी चन्दनचम्पकादिकुसुमैर्नार्चा सदर्च्यक्रम !,
त्यागीशस्य दिशन्नहो ! जडसभाशृङ्गारभूतः स्वयम् ।
अर्थानर्थविवेकदृग्विरहितो वेश्याजनं पूजय-
न्नर्थान्मूर्खजनं ह्यवातरदयं कालः कलिर्मूर्तिमान् ॥ २४

पेटा वज्रमयी रदैरिव महामुद्राङ्किता दुर्मते-
रुन्मुद्रीकरणोद्यतस्य दशनव्यापत्तिहेतुर्हित ! ।
गम्भीरार्थमिदं तव प्रवचनं व्याख्योद्यतस्याऽऽत्मधी-
क्लृप्त्या वृत्तिपरम्पराद्यपमतेर्युक्तं द्विषोऽध्वच्युतेः ॥ २५

प्रायः प्राकृतसंस्कृताशनरतिः स्त्रीवस्त्रवाष्पानकृद्,
व्युच्छिष्टान्नविगानवानगपहृन्नाम्नापि निन्द्यश्रुतिः ।
दुर्वेषी विमुखीह ते प्रवचनाच्चेन्नाऽभविष्यद् द्विषन्,
धर्माऽधर्मफलं फलेक्षणपरोऽद्राक्षीदमुत्रापि कः ? ॥ २६

ही हीनो गुरुणा गुरुप्रभुरणानध्वश्रवास्साश्रवा,
साधुश्रेणिरिति प्रकल्पितमतिः सम्प्रत्यसावीक्ष्यते ।

दुर्ल्लक्ष्मा क्षितिमण्डले कटुफलैकासक्तिसेव्यः कटु-
र्युक्तस्तीर्थमपाद्धर्मक्षिविषयं दुर्वावदन्नल्पधीः ॥ २७

पापात्मा प्रतिमाऽर्हतामभिनमस्कार्याऽथ पूज्या च तत्
प्रोच्याऽपि प्रतिपक्षतामभिदधन्मायाविमुख्यः क्षितौ ।
यद्यद्धर्ममवाप्यमुक्तिपदवीवीथी भवेत्पूजिता,
तं धर्मं प्रतिषेधयत्यधिपते ! साधुप्रतिष्ठात्मकम् ॥ २८

त्वद्बिम्बप्रतिबद्धशुद्धहृदयस्कन्धोर्णिकादण्डभृद्,
दृष्ट्वापि प्रतिमाश्रवः श्रवणभृद् बिम्बारिवद् विश्वराट् ! ।
साङ्कर्यं दधदेष वेषविषयं वैषम्यभाग्गुर्वनु-
क्रान्तेः क्रान्तिसमोपमः श्रुतिपथाऽनाकर्ण्यवैवर्ण्यभाग् ॥ २९

पूजाऽरिः प्रतिमाऽरिवज्जिनपते ! पूजाऽवसाने जने,
मिथ्यादुष्कृतमादिशन्नभिमतः पाशस्तपस्व्यङ्गिनः ।
पञ्चाऽऽचारगतामपीन ! न विधौ वादे वदेदर्चनां,
मूर्त्यादेः करणं तथा च कुमुनिर्मूर्तिप्रतिष्ठां पुनः ॥ ३०

निद्रा साधुजनस्य जैनसमये नाऽऽज्ञा प्रमादो यतः,
प्रोच्येति प्रतिसेव्य तां च ससुखं स्वर्गापवर्गाध्वनि ।
भो लोकाः ! किल पश्यत स्फुटमहं सम्प्रस्थितोऽस्मीति वा-
गन्योक्त्या जिन ! शिक्षयंस्त्वदरितां विश्वोपमान् व्यंसकः ॥३१

इत्युद्भाव्य निबन्धितानधिकृतान् कक्षाऽम्बरग्राहकान्,
दीनान्दीनरवान्निरीक्ष्य भगवंस्त्वत्किङ्कराऽस्मत्पुरः ।
सद्राज्यं निजधर्मसागरशशी स्वीयेषु पीयूषदृग्,
भुञ्जन्नाऽऽरविचन्द्रमा जय जयिष्वस्माद्दृशेषु प्रभो ! ॥ ३२

महोपाध्याय–श्री सोमविजयगणिविरचितम्

## ३४. ॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

श्रीगुरुपदकमलं निजे, मानससरसि निधाय रे
श्रीजिनवीरमहं नुवे, भविजनसङ्घशिवाय रे ॥
शिवशान्तिकारकचलननलिनं कमलकोमलकरतलं
केवलालोकविलोकिताखिलनाकमर्त्यरसातलम् ।
संसारसागरपारगामी त्वमसि वीरविभो ! यथा
तदपारपारावारतरणे स्यामलं मम कुरु तथा ॥ १

देहि विभो ! मम शिवपदं, त्वं करुणारससिन्धो ! ।
भवभयनीतिमतो यते(तेः), समजगतीजनबन्धो ! ॥
बन्धुवदमरशूलपाणे रोषदोषनिवारको
विकटदृष्टिविषोऽपि भोगी कौशिकोऽमरनायको(कः) ।
भवता कृतो जिनराज ! पीडाऽतीव सोढा सुरकृता
अपराधवत्यपि सङ्गमे जिन ! कृपादृष्टिरुदीरिता ॥ २

मोहमहीधरकरगतं मामुद्धर जिन ! वीर ! रे
हेतुमृते हितकारको मेरुमहीधरधीर ! रे ॥
धीरिमादिगुणौघबन्धुर–गतिजितामरसिन्धुरो
विकटसंकटकोटिकारकवामकाममुधाकरो(रः) ।
मयि किङ्करे कुरु भूरिकरुणामिह भवेऽपि भवान्तरे
त्वमकारि जगदुपकारविधये वेधसा भुवनोदरे ॥ ३

यदि मम मानसमन्दिरे वस सलवं जिन वीर ! रे
अहमतरं भवसागरे लब्धभवोदधितीर ! रे ॥

भवतीरदायक ! योगिनायक ! जन्तुतायक ! शुभविधे ! ।
समभीतिवारक ! भुवनतारक ! शान्तिकारक ! शमनिधे ! ।
हरिहरसुरासुरवशीकारककामकुञ्जरकेसरी (रिन् !)
करवाणि तावकवाणिमनिशं कुरु तथा भवतरुकरी(रिन् !) ॥४

यदि मम मानसमानसे क्षणमपि हंससि देव ! रे
किं बहुना तपसा तदा सुरनरपतिसकृतसेव ! रे ॥
सेवासु हेवाकिनो जीवा लभन्ते शिवसम्पदं
किमु भविकलोका ! विगतशोका ! भजत नो गुणसम्पदम् ? ।
मम भवतु देव ! सदैव सेवकपावनं तव शासनं
तथा श्रीगुरुहीरसूरेरपरमिह किमु याचनम् ! ॥ ५

महोपाध्याय श्री सोमविजयगणिविरचितम्

## ३५. ॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

त्रिशलासुत ! रे वाञ्छितफलमन्दार ! रे
हरिपूजित ! रे करुणामृतभृङ्गार ! रे
जनजीवन ! रे त्रिभुवनजनताधार ! रे
नतसुरनर ! रे गतभवपारावार ! रे ॥
भववारपारावारतरणे ! देव ! शरणं देहि मे
श्रीवीरजिनवर ! भुवनहितकर ! रुचिरसूरो हि स हि मे (?) ।
संसारकारागारपतितं मोहराजवशीकृतं
मां मोचयाऽऽशु जिनेश ! तावकसेवकं शरणागतम् ॥ १

गतदूषण ! रे त्रिभुवनभूषण ! वीर ! रे
सुखसागर ! रे मेरुमहीधरधीर ! रे
समताकर ! रे मारदवानलनीर ! रे
ममताहर ! रे आसादितभवतीर ! रे ॥
भवतीरयायी भुवनपायी पाहि पाहि कृपानिधे !
भवरूपकूपादतिविरूपादीश ! साधितशुभविधे ! ।
भविकामितामितसिद्धिदाने त्वमसि दैवततरुनिभो
निजचलननलिने लीनमनिशं मानसं मम कुरु विभो ! ॥ २

विकराले रे कलिकाले तव शासनं
जिन ! लेभे रे कथमपि भवभयनाशनम् ।
मम कुरु कुरु रे सौवगिरा मतिवासनं
मा पुनरपि रे भवतु मनोभवपाशनम् ॥
मनोभवभवपाशनं मेऽनन्तशोऽजनि जिनपते !
तदभावकरणे देव ! शरणे समेतोऽहं शुभमते ! ।
अथ यथोचितकरणचतुरे नाथ ! किं कथनेन मे ?
तथा कुरु न भवन्ति रोषादयो दोषा मयि समे ॥ ३

करुणापर ! रे नागरवन्दितपाद ! रे
भविराशे रे नाशितसकलविषाद ! रे ।
जिनपुङ्गव ! रे विदलितवादिविवाद ! रे
निजवचसा रे विफलितवीणानाद ! रे ॥
तव नादलीना देवदानवमानवा विकचानना
आयान्ति पातुं भावपीना दोषहीना देशनाम् ।
तथा छागमृगारिवारणवाजिराजिमुखा घना
बहुजातिवैरविनाशकरणे समवसरणे ते सना ॥ ४

त्वयि गतवति रेऽमितसुखसंगतशिवपुरे
दीपाले रे दिवसे देव ! शिवङ्करे ।
संजाते रे भारतनरि विरहातुरे
कथमेवं रे समता गुणमणिसागरे ॥
गुणसागरे जिन ! कथं समता शिवे नाथ ! तथा भवे ?
समताधरो जिनराजवीरो भवन्तं इति किमु नुवे ? ।
अथ विरहवारणकृते सौवं सेवनं दिश यतिपते !
श्रीहीरविजयमुनीशशिशुना नुतो वीरो हितकृते ॥ ५

महोपाध्याय-श्री सोमविजयगणिविरचितम्

## ३६. ॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

श्रीगुरुचरणमुदारं, स्मारं स्मारं स्वमानसे भक्त्या ।
मेरुमहीधरधीरं, वीरं नुतिगोचरीकुर्वे ॥ (आर्या) १

(पादाकुलक)

केवलकमलालीलागारं, शमदमगुणमणिपारावारम् ।
भविजनवाञ्छितफलमन्दारं, वन्दे श्रीजिनवीरमुदारम् ॥ २

भववनगहने निशितकुठारं, भरतभूमिललनागलहारम् ।
मुनिमरालकोटीकासारं, वन्दे श्रीजिनवीरमुदारम् ॥ ३

मदनदवानलविपुलासारं, त्रिभुवनजनतावरशृङ्गारम् ।
उपशमरसभरभृतभृङ्गारं, वन्दे श्रीजिनवीरमुदारम् ॥ ४

हेलाटालितमारविकारं, भवकूपे पतताभाधारम् ।
रूपाकम्पितकमनाकारं, वन्दे श्रीजिनवीरमुदारम् ॥ ५

भविककोटिकृतभवनिस्तारं, त्रिजगति विकसितगुणविस्तारम्।
कृतिततिमानसशुकसहकारं, वन्दे श्रीजिनवीरमुदारम् ॥ ६

काञ्चनकजकृतपादविहारं, सुरनरशंसितगुणसम्भारम् ।
समजनलोचनसुखदातारं, वन्दे श्रीजिनवीरमुदारम् ॥ ७

भविजनवारं तारं तारं, सिद्धिमितो(तं?) दितपुनरवतारम् ।
हृदि निधाय तं वारंवारं, वन्दे श्रीजिनवीरमुदारम् ॥ ८

एवं जिनकोटीरो, विनुतो रागादिजित्वरो वीरः ।
श्रीहीरविजयसूरेः शिष्येण शिवप्रदो भूयात् ॥ (आर्या) ९

महोपाध्याय-श्री सोमविजयगणिविरचितम्

## ३७. ॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

स्वस्ति श्रीदातारं, ज्ञातारं विश्ववस्तुनः सारम् ।
नतसुरनरनेतारं, नवीमि वीरं शमागारम् ॥ (आर्या) १

जयति सदा जिननायकवीरो, जिनमतभासनभानु रे ।
केवलकमलालीलावासो, धीरतया गिरिसानु रे ॥ जयति सदा० १

त्वमसि विभो ! भवपारावारे, भविजनतारणसेतु रे ।
ज्ञातकुलावासेऽमलभूषा-करणे बन्धुरकेतु रे ॥ ज० २

देहि विधेराराधनमनघं, संयमविषये देव ! रे ।
शिवगतिसङ्गतिसाधनमनिशं, सुरनरपतिकृतसेव ! रे ॥ ज०३

त्वमसि पिता माता मम नेता, कामितदाता वीर ! रे !
वितर विभो ! निजचरणे वासं, काञ्चनगौरशरीर ! रे ॥ ज०४

अशोकतरुतलमणिसिंहासन-आसीने जिनराजि रे ।
आतपवारण-चामर-दुन्दुभि-भासुरभूतिविराजि रे ॥ ज० ५

कुसुमनिकर-भामण्डलभासति, भविकजना विकसन्ति रे ।
वीणानादविनादितलोके, के समुदो न भवन्ति ? रे ॥ ज० ६

जिन ! तव सेवालीनं लोकं, समकमला विलसन्ति रे ।
जगदुपकारे जिनपविहारे, ईतिगणा न भवन्ति रे ॥ ज० ७

चिदानन्दरूपे त्वयि नाथे किमु मयि ननु भवभीति ? रे ।
करुणारत ! शरणागतवत्सल !, नैवं भवतो रीति रे ॥ ज० ८

नो विफला विमला जिन सेवा, मा भव विधुरो धीर रे ।
एवं सातकृते मम वचनं, देहि कृपापर ! वीर ! रे ॥ ज० ९

एवं त्रिभुवनजनता-नेता विनुतो जिनाधिपो वीरः ।
श्रीहीरविजयसूरेः शिशुना सङ्घस्य भद्रकृते ॥ ज०(आर्या) १०

पू.आ. श्री उदयसिंहसूरिरचिता
श्रीधर्मविधिप्रकरण-अन्तर्गता
श्लोकप्रथमाक्षरैः स्वनामगर्भिता
कामदेवश्रावककृता (क् च् ट् वर्गरहिता)

## ३८. ॥ श्रीमहावीरस्वामिस्तुतिः ॥

**श्री** वीर ! विहितपरहित ! विश्वत्रयमहित ! मदनमदरहित ! ।
सर्वातिशायिमहसे निर्मलमनसे नमस्तुभ्यम् ॥ १

**उ**दयति यद्वन्महिमा, त्वयि यद्वन्नैव दैवतेऽन्यत्र ।
दीपेऽपि दीधितिलवो, विशेषसीमा तु तिमिररिपौ ॥ २

ददृशुर्ये त्वन्मूर्तिं तन्नयनं नैति तोषमन्यत्र ।
लब्धे पीयूषरसे, पर्याप्तं यद्रसविशेषैः ॥ ३

यद्यपि शुभैर्विहीन – स्तथापि देव ! त्वदङ्घ्रिदासोऽहं ।
तन्मे प्रसीद यस्माद्, भवन्ति नतवत्सलाः सन्तः ॥ ४

सिन्धूनामर्णव इव प्रभावराशेस्त्वमास्पदं देव ! ।
त्वत्तो यतः समीहित–सिद्धिः संसिध्यति ध्यातुः ॥ ५

हरति दुरितानि नितरां, तव स्तुतिर्दिशति सम्पदं सपदि ।
तन्नास्ति वस्तु यन्न हि, महीयसां संस्तवस्तनुते ॥ ६

सूर्यांशुभिर्विभिन्नं, यद्वद् यातीह शार्वरं तिमिरं ।
तद्वत्तव पदनमनाद्, भूरिभवोपात्तमपि पापम् ॥ ७

रिपवो भवोद्भवा मे, स्वामिंस्तव नाममन्त्रमाहात्म्यात् ।
तपनात्तुहिनलवा इव, सद्यः सर्वे विलीयन्ते ॥ ८

भिन्नान्तरङ्गरिपुवर्गमया स्तुतस्त्वमेव त्रिवर्गपरिहारपरैर्वचोभिः।
मह्यं त्रिवर्गपरितः परितोषमूलं,
श्रीवीरनाथ ! गुरुमोक्षपदं ददस्व ॥ (इन्द्रवज्रा) ९

पण्डितश्री विजयसागरगणिविरचितम्

## ३९. ॥ श्रीवीरजिनस्तोत्रम् ॥

स्वस्ति श्रीपरिषेव्यमाणचरणक्ष्मापालचूडामणिं
श्रीसिद्धार्थनरेन्द्रवन्दनमहं तं नोनवीमि स्फुटम् ।
यः कामं प्रममर्द निर्दयहृदा विश्वं जिघांसुं जगद्
रागाख्यं रिपुमङ्घ्रिहस्तयुगलीसंलग्नमप्यादरात् ॥(शा.वि.) १

स्वस्ति श्रियं रातु जिनेन्द्रचन्द्रः सन्त्यक्तमायामदमोहतन्द्रः ।
सिद्धार्थभूपालकुलाम्रकीरः सदाऽस्तु वीरः समतासुधीरः ॥२
(उपजाति)

स्वस्ति श्रियां काममकाममूर्तेर्नानाऽभिरामं बत यस्य धाम ।
पिपर्ति कामानि(?)कलाविलासी
स त्रैशलः पेशलभागधेयः ॥ (उपजाति) ३

स्वस्ति श्रीसुभगम्भविष्णुचरणद्वन्द्वं नमामस्तमां
सिद्धार्थक्षितिपालवासवसुतस्यानन्दसन्दोहदम् ।
यद्रागद्विरदो विमुच्य हृदयं भूयस्तपोज्योतिषा
सन्तप्तं सुखमीप्सुरीप्सितहितश्रेणी सदाऽशिश्रियत् ॥(शा.वि.)४

स्वस्तिश्रीभरभासुरासुरनराधीशोत्तमाङ्गस्फुर-
न्मन्दारद्रुमसूनुचुम्बितपदद्वन्द्वस्य यस्येशितुः ।
पादाम्भोरुहसेवना सुमनसां दत्तो मनोवाञ्छितं
कामं कामगवीव कामितरसः शश्वत् कलाशालिनाम् ॥ ५
(शा.वि.)

सिद्धार्थक्षितिभृत्कुलाम्बरमणिं त्रैलोक्यचूडामणिं
श्रीवीरं नम हे मनः ! प्रसृमरश्रीकीर्तिकेलीगृहम् ।

मुक्तिस्मेरमुखोपगूहनमुखं चेदात्मसादीहसे
कर्तुं ह्यौपयिकं न तत्र किमपि प्राज्ञैः परं गीयसे ॥(शा.वि.) ६

श्रेयः श्रियां धाम यदीयनाम प्रकाममाविष्कुरुते प्रकामम् ।
श्रीत्रैशलं पेशलमूर्तिमन्तं सर्वं चतुर्विंशममुं भजेऽहम् ॥ ७
(उ.जा.)

विबुधावनितानेकच्छेकप्रकामपराङ्मुखं
प्रशमिजनतासम्यग्गेयं गुणोत्कतरराजितम् ।
नय मम मनः ! श्रीसिद्धार्थं सदा स्मृतिगोचरं
तरणिकिरणं ध्वान्तध्वंसे यदीच्छसि सम्पदम् ॥ (हरिणी) ८

कुन्देन्दुस्फटिकावदातसुषमांश्चेतोहरान् बन्धुरान्
ये कामं कलकण्ठकण्ठमधुरध्वानैकताना नराः ।
गायन्ति त्रिदशाधिनाथनिकरानन्दप्रद ! त्वद्गुणां-
स्तेषां जन्म च जीवितं च सफलं पुंस्कोकिलानां जने ॥ ९
(शा.वि.)

चेत्सङ्कल्पविकल्पकल्पनमतिस्त्वं कल्पभूमीरुह-
स्त्वत्सेवाकरणप्रवीणमनसस्त्वच्चञ्चरीका वयम् ।
सर्वाशापरिपूरको जलधरस्त्वं चेद्वयं चातका-
स्त्वं दाता शिवशर्मणो यदि वयं तद्याचकाः स्मोऽधिकम् ॥१०
(शा.वि.)

प्रणिनमति य एनं नाम पूर्वापराह्णे
त्रिभुवनतिलकाभं वर्धमानं समानम् ।
विविधवृजिनमूलं चूर्णपेषं पिनष्टि
प्रबलबलमसौ द्राङ् मोहनीयं समग्रम् ॥ (मालिनी) ११

दुष्टव्याधिमहोदरक्षयमहामेहाङ्गभङ्गादिभी
रोगैर्नैव कदापि सोऽङ्गिनिवहः प्रायः पराहन्यते ।
यस्त्वन्नाममहौषधव्रतविधिव्यापारबद्धादर-
श्चिन्त्या नैव यतो महौषधमणीमन्त्रादिसम्पत्तयः ॥(शा.वि.)१२

प्राघानि तैर्मोहमहाबलानि त्वच्छासनं यैरुररीकृतं प्रभो ! ।
स्वर्मोक्षकामानि मनांसि चैषां
यके जनास्त्वद्वरवक्त्रपायिनः ॥ (उपजाति) १३

एष स्वर्गिगणः प्रकामनिपुणः संसेवते वासवं
प्रायश्चक्रधरं नरं नतिपथं नृणां नयत्युत्करः ।
पातालप्रभुताश्रितं प्रणमति ह्येकोऽसुराणां गणः
कस्कस्त्वां त्रिजगत्प्रभुं न भजते देवो नरो वाऽसुरः ॥ १४
(शा.वि.)

स्तुत्यं जन्म तदीयमेव निवहैर्नृणां कलाशालिनां
वृत्तिश्चापि च वर्णनीयमहिमा प्रज्ञालयं चाननैः ।
सम्पत्सत्स्पृहणीयभावरुचिरा चित्रा तदीयैव सा
यस्त्वां त्रिः प्रतिवासरं प्रणमति प्राणी त्रिधा शुद्धितः ॥ १५
(शा.वि.)

मत्तेभेन्द्रस्य कुम्भस्थलमिव निवहाः षट्पदानां भजन्ते
सम्पूर्णं नीरपूरैः सर इव महसा सारसानाश्रयन्ते ।
सारङ्गाः शाद्वलान्तं वनमिव गहनं सञ्जुषन्ते समन्तात्
तद्वद्देवाधिदेवक्रमकमलमलङ्कुर्वते राजहंसाः ॥(स्रग्धरा) १६

तं वन्दे जिनसार्वभौमतिलकं तीर्थङ्कराग्रेसरं
श्रीवीरं प्रणताङ्घ्रिपद्मयुगलीवीराधिवीरेश्वरैः ।

यः कामं प्रणिहत्य मुक्तिवनितानिष्कामचूडामणि-
र्भुङ्क्ते तां च ददाति भक्तजनता प्रत्यद्भुतं तन्महत् ॥ १७
(शा.वि.)

विविधविषयाशङ्कापङ्कप्रकाशविशोषकं
विमलकमलापारोल्लासप्रवृद्धपटीयसम् ।
नमत जिनपं ज्योतिःस्तोमप्रकाशितविष्टपं
तरणिकरणिं श्रीसिद्धार्थक्षमापतनूरुहम् ॥ (हरिणी) १८

अद्यप्रातीनमेतन्मरणमिति सदा संविदानोऽपि जन्तु-
र्नो धर्मं कर्ममर्मव्यतिकरवशगः कर्तुमीष्टे कदाचित् ।
इत्येतन्मोहजालं दलयतु सकलं सर्वकालीनमात्म-
संवेद्यं सर्वथाऽसौ जिनवरवृषभो मामकं मूलतोऽपि ॥ १९
(स्रग्धरा)

तेषां नैव दवीयसी सुरगवी नेदीयसी स्वारमा
स्वःकुम्भादिविभूतयश्च वशगा दूरे नवा चक्रिता ।
मुक्तिस्त्री च मनोनुकूलचरिता कामं किमु ब्रूमहे
ये नित्यं जिनराजपूजनविधौ बद्धादराः स्युर्नराः ॥(शा.वि.)२०

नाऽसौ चागमिकप्रमाणपुरुषव्यावर्णितं स्वःपदं
नो वा भूचरगोचराश्रयसुखं सत्सार्वभौमादिजम् ।
नैवाऽव्यात् पदसम्पदादिकमपि प्रार्थ्यामहे हे प्रभो !
भूयाच्छाश्वतिकप्रमोदविधये सेवा तवाऽऽकस्मिकी ॥ २१
(शा.वि.)

सिद्धार्थान्वयवार्धिवर्धनविधौ तं पार्वणेन्दूदयं
श्रीमन्तं परमेष्ठिनं प्रणयतुः सत्स्तोत्रमार्गे नये ।
यस्मादाविरभूज्जगत्त्रयहिता सन्दर्शयन्ती स्वयं
भूगोलं च खगोलमेतदुभयं ब्राह्मी जगच्चक्षुषाम् ॥(शा.वि.)२२

सिद्धार्थक्षितिपालवंशविमलस्थूलैकमुक्तामणिं
श्रीमच्छ्रीत्रिशलामनःपरिणतानन्दप्रदानप्रभुम् ।
स्वामिंस्त्वत्पदसेवनव्यतिकरव्यालोलचेतस्कतः
पूतात्मा जन एष निर्मलमनास्तुष्टूषति त्वां सदा ॥(शा.वि.)२३

स्वामिंस्त्वत्पदसेवकोऽस्म्यहमपि त्वेषा मतिः स्थेयसी
स्वल्पा वा महती भवस्थितिमिमां जाने निजामात्मनः ।
नो मां चेत् पदसेवकं परमहो क्षुत्तृड्व्यथा बाधते
तद्ध्यानार्णवलीनपीनमनसो निद्रापि कौतस्कुतिः ॥ २४
(शा.वि.)

ये हिंसानृतचौर्यकार्यनिरता ये चान्ययोषाजुषः
पापव्यापभृतोऽपि वीर ! भवता निस्तारितास्तेऽप्यहो ।
एतेषु स्विकधाः परत्र परधीर्यन्नेक्षसेऽस्मादृशा-
स्तत्ते नौचितिमञ्चति स्वपरयोर्भेदोऽकदर्यस्य यत् ॥ २५
(शा.वि.)

सर्वे गुणाः श्रीजिनवीरमाश्रिताः सद्राजहंसा इव मानसं सरः ।
शरत्सुधादीधितिकान्तकान्तयः
पवित्रलावण्यपयःप्रपूरितम् ॥ (उपजाति) २६

जातं ते फलवत्तवाननरमासंवीक्षणादीक्षणं
हस्ते शस्ततमौ त्वदीयचरणाम्भोजन्मसम्पूजनात् ।

सा सारा रसना त्वदीयविमला भिक्षासु सम्पद्ग्रहात्
मन्ये मे सफलं जनुश्च सकलं स्वामिंस्तव ध्यानतः ॥ २७
(शा.वि.)

एवं श्रीजिनवर्धमान इति सन्नाम्ना जिनाधीश्वरः
सम्यक्संस्तुतिमार्गमेष मयका सम्प्रापितः सत्तमः ।
श्रीमच्छ्रीकुशलादिसागरमहोपाध्यायपादाम्बुज-
प्राप्तप्रौढमहाप्रसादनिरतः स्तात् सर्वदा श्रेयसे ॥(शा.वि.) २८

पू.पं.श्री जीवविजयगणिकृता

## ४०. ॥ श्रीमहावीरजिनस्तुतिः ॥

(कामदुघाचित्रेण)

स्वः श्रीसुखाऽऽसिजननन्दमिताऽघदोष-
मीशं स्फुरद्रुचिरकान्तिसमेतकायम् ।
सत्कीर्त्तिधामहितमात्मविशुद्धये तं
श्रीज्ञातपुत्रजिनपं प्रणमाऽऽशु धीर ! ॥ (वसन्ततिलका) १

श्रीसुखासिजननं दमिताघदोषं
संस्फुरद्रुचिरकान्तिसमेतकायम् ।
कीर्तिधाम हितमात्मविशुद्धये तं
ज्ञातपुत्रजिनपं प्रणमाशु धीर ! ॥ २

(आद्याक्षरैकत्यागात्) त्रयोदशाक्षरी अतिजगती जातिः ।
स्वः श्रीसुखासिजननं दमिताघ-
मीरां स्फुरद्रुचिरकान्तिसमेतम् ।
सत्कीर्तिधाम हितमात्मविशुद्धं,
श्रीज्ञातपुत्रजिनपं प्रणमाशु ॥ ३

(अन्त्याक्षरद्वयत्यागात्) द्वादशाक्षरी जगतीजातिः ।
श्रीसुखासिजननं दमिताघं
संस्फुरद्रुचिरकान्तिसमेतम् ।
कीर्तिधाम हितमात्मविशुद्धं
श्रीज्ञातपुत्रजिनपं प्रणमाशु ॥ ४

(आद्याक्षरैक-अन्त्याक्षरद्वयत्यागात्) एकादशाक्षरी त्रिष्टुप्जातौ स्वागता ।
स्वः श्रीसुखानन्दमिताघदोष-
मीशं स्फुरत्कान्तिसमेतकायम् ।
सत्कीर्तिधामात्मविशुद्धये तं
श्रीज्ञातपुत्रं प्रणमाशुधीरम् ॥ ५

(पञ्चमषष्ठसप्तमाक्षरत्यागात्) एकादशाक्षरी इन्द्रवज्रा ।
सुजननन्दमिताघदोषं रुचिरकान्तिसमेतकायम् ।
महितमात्मविशुद्धये तं त्र जिनपं प्रणमाशु धीर ! ॥ ६
(त्र = हे) पंक्तिजातिः ।

सुजननंदमिताघं रुचिरकान्तिसमेतम् ।
महितमात्मविशुद्धं त्र जिनपं प्रणमासु ॥ ७
(त्र = हे) अष्टाक्षरी अनुष्टुप् जातिः ।

स्वः श्री सुखासिजननं स्फुरद्रुचिरकान्तितः ।
सत्कीर्तिधामशुद्धं श्री-ज्ञातपुत्रं नमाऽऽशुधीः ॥ ८
अनुष्टुप्जातौ श्लोकः । पथ्यावक्त्रम् ।

स्वः श्रीसुखासिजननं, मिताघदोषं स्फुरद्रुचिरकायम् ।
सत्कीर्तिधामहितमा-त्मशुद्धये श्रीजिनं प्रणम ॥ (आर्या) ९

स्वः श्रीजननं दमिताघ-मीशं, रुचिरकान्तिसमेतम् ।
सत्कीर्तिधाम विशुद्धं श्रीज्ञातं जिनपं प्रणमाशु ॥ १०
(आपातलिका)

स्वः श्रीखा(ख)जननन्दमिताघ-मीशं रुचिरकान्तिसमेतम् ।
सत्कीर्तिमहि[त]मात्मविशुद्धं श्रीज्ञातजिनपं प्रणमाशु ॥ ११
आपातलिकापरांतिका । षोडशमात्रिकसुपवित्रा वा ।

स्वः श्रीजननन्दमिताघ-मीशं चिरकान्तिसमेतम् ।
सत्कीर्ति धाम विशुद्धं (सत्कीर्ति[सु]धामविशुद्धं)
ज्ञातं जिनपं प्रणमाशु ॥ आपातलिका चासहासिनी । १२

पू.मु.श्री गुणविजयगणिगुम्फितः

## ४१. ॥ श्रीमहावीरजिनस्तवः ॥

चन्द्रादित्यमरालदन्तिपवनैः सिंहक्षमाभृद्धनैः
वीणाकम्बुरमासमुद्भवरसाकर्पूरशर्वोदकैः ।
लक्ष्मीकान्तकुठारखड्गकुसुमैर्दीपाऽऽपगाकार्मुकै-
र्निर्ग्रन्थालिपयोरुहागुरुपिकैर्वह्न्यश्वकार्त्तस्वरैः ॥ (शा.वि.) १

रमणचित्रकलोचनकज्जलैर्वदनचित्रभुजङ्गमचन्दनैः ।
कुलसुवासमहोदधिनन्दिनीप्रमदसप्रमदैर्वनिविश्रुतैः ॥ २
(द्रु.वि.)

श्यामाभेकरथाङ्गरत्नगरुडैः कीरप्लवङ्गोज्ज्वल-
प्रेङ्खद्वर्णनभोऽम्बुपैः सुफलवद्द्राक्सारिकाखञ्जनैः ।
वेणीरागकुरङ्गकुर्कुटलसद्वंशस्फुरद्वाहनै-
रथैर्वीरविभुं नभोरस ६० मितैः सारङ्गजैः संस्तुवे ॥(शा.वि.)३

भविककुमुदबोधनसारङ्गं कोविदकोकनयनसारङ्गम् ।
सुकृतसरोवरतटसारङ्गं दुष्कृततरुभञ्जनसारङ्गम् ॥ ४

(पादाकुलकम्)

कुनयरजोहरणे सारङ्गं कितवकरटिदारणसारङ्गम् ।
निश्चलतानिर्जितसारङ्गं कुगतिदहनतर्जनसारङ्गम् ॥ ५

सुस्वरतातर्जितसारङ्गं चारुनिरञ्जनतासारङ्गम् ।
सुन्दररूपविजितसारङ्गं सर्वसहनगुणतासारङ्गम् ॥ ६

श्वासपराजितवरसारङ्गं दुर्मदविधिवदने सारङ्गम् ।
दुरितमलापनयनसारङ्गं मन्मथभस्मकरणसारङ्गम् ॥ ७

कुमतिलतालवने सारङ्गं करपङ्कजसमतासारङ्गम् ।
समवसरणसञ्चितसारङ्गं त्रिभुवनभवनसुभगसारङ्गम् ॥ ८

निर्मलतागङ्गासारङ्गं भ्रूमञ्जुलताजितसारङ्गम् ।
शमरससरत्नाकरसारङ्गं सज्जनमनपङ्कजसारङ्गम् ॥ ९

अद्भुतपरिमलसुखसारङ्गं देवसमुद्गाहितसारङ्गम् ।
कण्ठचमत्कृतकलसारङ्गं दुर्नयविततगहनसारङ्गम् ॥ १०

दमितकरणचञ्चलसारङ्गं मुक्तरजतमणिगणसारङ्गम् ।
निर्वृतिमृगनयनासारङ्गं कुमतकुरङ्गहननसारङ्गम् ॥ ११

त्रिभुवनवर्त्तिसुजनसारङ्गं सिद्धिवधूलोचनसारङ्गम् ।
शशिसोदरसुन्दरसारङ्गं सौवरमादर्शितसारङ्गम् ॥ १२

कीलितकोपविषमसारङ्गं वाणीशीतलतासारङ्गम् ।
पावितनिजनिरुपमसारङ्गं मृगमदजैत्रवदनसारङ्गम् ॥ १३

निजवशनिर्मितमतिसारङ्गं सुरपतिभिर्विनुतं सारङ्गम् ।
विदलितमोहविपुलसारङ्गं देवीकृतवापीसारङ्गम् ॥ १४

गगनचलितगुरुवृषसारङ्गं ज्ञातकुले निर्जरसारङ्गम् ।
रोषभुजङ्गदमनसारङ्गं ज्ञानमहाभूरुहसारङ्गम् ॥ १५

स्वीयवशीकृतमनसारङ्गं लेश्यागुणगालितसारङ्गम् ।
दानावर्जितभविसारङ्गं निगदितनियतनिपुणसारङ्गम् ॥ १६

केलिकृते रक्षितसारङ्गं जनरञ्जनलोचनसारङ्गम् ।
लुञ्चितभुजगसदृशसारङ्गं धर्मकथालापितसारङ्गम् ॥ १७

अङ्गरजोमृगमदसारङ्गं मोहरजनिबोधनसारङ्गम् ।
स्वरमाधुर्यमथितसारङ्गं वीरं भजत सुकृतसारङ्गम् ॥ १८

इत्थं वीरजिनः स्तुतो नवनवैः सारङ्गशब्दोद्भवैः
सद्भावैः सनयं गुणादिविजयेनानन्दरोमोद्गमम् ।
हर्षोत्कर्षवशेन पेशलतरैर्भावैः सुरैः सन्नत-
श्चित्तप्रीतिकरं परं पदमयं दद्यान्मुदा देहिनाम् ॥(शा.वि.) १९

पण्डितश्री कल्याणकुशलगणिकृतम्

## ४२. ॥ श्रीवीरजिनस्तोत्रम् ॥

(वसन्ततिलका)

आनन्दमेदुरमहोदयबद्धलीलं,
लीलावहीलितमदं गलितावहीलम् ।
देवासुरावनतपादतलं गभीरं,
वीरं नये नवपथं विनयेन धीरम् ॥ १

नामाऽपि ते चिरनिकाचितपापपूग-
माकन्दकन्दलनिकन्दनकारिजापम् ।

नो सन्दिहे ननु भवन्तमलं नुवन्तो,
नैके नरा अतुलसिद्धिभरं लभन्ते ॥ २

नूनं निरञ्जन ! चिरं जनरञ्जनाय,
का का कला न कलितोदरपूरणाय ? ।
एका न काऽपि कलिता भवतो भदन्त !,
जायेत रञ्जनमरं जनतातिरेकि ॥ ३

देवी न काऽपि वरदा विमला [सु]मेधा,
सिद्धा न काचन कला न कलं दिकाऽपि ।
नो वा निघण्टुघटना सुघटीबभूवाऽऽ-
रम्भे तथापि मम साहसमेव मूलम् ॥ ४

कामं भवन्तु भुवने भव वीतरागा,
नीरागता तव महामुनिवन्दनीया ।
लोकोत्तरऽरुणसमानि भवन्ति किं वा,
नानावसूनि वसुराजिविराजितानि ? ॥ ५

जीवा निरञ्जन ! समीहितसिद्धभावा,
भावावधूतभवभङ्गुरभूरिभावम् ।
देवं भवन्तमवहाय निरुद्धसङ्गं,
नालं ससङ्गमपरं मनसा भजन्ति ॥ ६

भावी भवोऽथ तनुको मम वीरदेव !,
सेवा मया सकलपापहरी तवाऽऽपे ।
किंवाऽनुहंसमुदयङ्गतमन्धकारं,
पीडावहं भवति भूवलये कदापि ॥ ७

जातानुरागधरणीधवमाधवादि-
संसेवनीयचरणं चरणं चरन्तम् ।
आसन्नसिद्धिकमला विमलावसाया,
देवं नमन्ति न परे भवगा भवन्तम् ? ॥ ८

लीलाविलासकिलिकिञ्चितहावभाव-
बिब्बोकमन्थरगमागमचारुदेहा ।
सम्मोहिनी धवलबालमरालमत्त-
मातङ्गहारिगमना पिकमञ्जुकण्ठी ॥ ९

बाढं विलोचनविकूणनसङ्कतेन,
बिम्बाधरेण दरहासनिभालितेन ।
वेणीभुजङ्गमसहायमदोद्धुरेण,
मोहं परं तरुणमानसमानयन्ती ॥ १०

हारावलीकनकचम्पकचारुबद्ध-
सन्नीलकञ्चुकपयोधरभारखिन्नाः ।
भालेऽलकालीवलनेन मनो हरन्ती,
नारी मनो नयति साऽपि न ते विकारम् ॥ (त्रिभि.)११

आगारवासविरमाय समुल्लसन्तु,
सावेगमागमगणं सुचिरं भणन्तु ।
हे देव ! ते चरणकारणमन्तरेण,
संसारपारमधिनाथ ! कथं लभन्ते ? ॥ १२

सम्पन्नसिद्धिरमणीवरसङ्गमाय,
निस्सङ्गमानसरसालविहङ्गमाय ।

कामं नमो निखिलजन्तुसमीहिताय,
सम्पूरणादरपराय परागमाय ॥ १३

आकन्दमन्दरमहीधरधीरभावं,
संसारनीरनिधितारणनद्धनावम् ।
वीरं भजे सजलमेघगभीररावं,
लोकावलोकितमहो ! विपुलानुभावम् ॥ १४

भावावबोधकरणं चरणाभिरामं,
बाढं महोदयमयं नवमञ्जुलाभम् ।
बुद्धादरं सुगमभङ्गतरङ्गसङ्ग-
मीहे महामहिमगेह ! समागमं ते ॥ १५

कामं समोहमदमायसहायलोभं,
हे वीर देव ! कथमेकपदे निहंसि ? ।
हुं नाम नागदमनी गरलं सकण्ठ-
बन्धादिरोगमखिलं किमु नो निहन्ति ? ॥ १६

उद्दामधामसुरदानववासवादि-
मन्दारदामपरिपूजितमादरेण ।
पादारविन्दमघतापनिवारणाय,
के के विभो ! तव नरा न चिरं महन्ति ? ॥ १७

कङ्केल्लिपल्लवनदुन्दुभिचामराली-
भामण्डलाऽऽतपनिवारणफुल्लपुञ्जम् ।
सिंहासनं च वरभेरीवराभिरामं,
नूनं मनो रमयते जिन ! ते समाजे ॥ १८

लोके न के हरिहरादिसुरा अनेके,
जानामि सङ्गतगिरं हितदं भवन्तम् ।
किं नाऽवलोकयसि दीनमिमं भजन्तं,
चिन्ताभरं किमपरं हर मे दयालो ! ॥ १९

आखण्डलामरनराधिपवासुदेव-
सम्पल्लतागहनपल्लवने पयोद ! ।
चामीकरच्छवितनो ! मम वीरदेव !,
संवेगसङ्गममसङ्गम ! मे विधेहि ॥ २०

बाढं पराभवकरं चिरकालरूढं,
गूढं ममाऽमम ! पुराभवमन्तरायम् ।
दूरं निराकुरु गुरो ! करुणानिवास !,
किं नो फलाय सुरसालमरालसेवा ? ॥ २१

के के नरा न कलयन्ति कलाविलासं,
भिन्दन्ति दन्तिनिवहं किमु नो सहेलम् ? ।
जानन्ति सूरिविसरा बलवन्तमन्त-
रङ्गारिभङ्ग चणसङ्ग ! भवन्तमेव ॥ २२

कल्लोललोलनविलोलतिमिङ्गलाली-
सङ्घट्टभीममपि ते तव नामतोऽमी ।
गम्भीरतादुरवगाहजलावगाह-
खिन्ना नरा लघुतरं जलधिं तरन्ति ॥ २३

कण्ठीरवोरगमहोदरवारणाजी-
राजीसमुत्थदरदारणबद्धकच्छम् ।

वीरं सुराजनरराजसमाजपूजा-
सम्भारभाजनमुरीकरवाणि चित्ते ॥ २४

केलीरसो न हि न सा रमणीरिरंसा,
भूमण्डलं न च न वा कनकं समीहे ।
नो नाकसम्पदमथो नरसम्पदं वा,
हे देव ! देहि मम ते सविधे निवासम् ॥ (मालिनी) २५

विरम विरम कामाऽऽगामिलाभाय ग्रामा,
अलमिह नहि रामा तानमानाभिरामाः ।
गुणिगणगणिनाऽमा सिद्धिसंसिद्धिधामा,
जयति परमधामा पारगो वीरनामा ॥ (मालिनी) २६

चरणकरणोपेताचारं गमावलीसङ्गमं,
कुनयघटनाचिन्तापङ्केरुहालीघनागमम् ।
सदयजनताचित्तानीतोपकारसुरागमं,
विदितमहिमालोकालोकं महामि तवागमम् ॥ (हरिणी.) २७

विगाहन्ते जीवा अवनिजलतेजोऽनिलगतिं,
लभन्ते कीटालीनरसुरभवं वासवपदम् ।
सहन्ते ही ! पीडां नरककुहरे केऽपि तदहं,
समीहे संसारावसरविरमं देहि वितनो ! ॥ (शिखरिणी) २८

जाने चिन्तामणि-सुरगवी-कामकुम्भाऽमरागा,
जायन्तेऽमी सततकरगा देव ! ते सेवनेन ।
एतावन्तं खलु तव पुरो नाथ ! नाथेऽनुबन्धं,
भूया भूयोऽगणितमहिमा चित्तचारी चिरं मे ॥(मन्दाक्रान्ता)२९

साहिश्रीमदकब्बरेण विदधे यस्योन्नतिर्भूयसी,
स श्रीहीरगुरुः सुधर्मपदवीं बिभ्रत्तपस्तद्गुणे ।
श्रीमन्मेहमुनीशितुस्तनुधिया शिष्याणुना निर्मितं,
सैद्धार्थेः समसंस्कृतस्तवमिमं श्रुत्वा प्रसत्तिं दधौ ॥ ३०

(शार्दूलविक्रीडितम्)

पू.मु.श्री धर्मवर्द्धनगणिविरचितम्

अथ व्याकरण-संज्ञा-शब्दरचनामयम्

## ४३. ॥ श्रीमहावीरजिनबृहत्स्तवनम् ॥

(उपजाति)

यस्तीर्थराजस्त्रिशलात्मजातः सिद्धार्थभूपो भुवि यस्य तातः,
वितन्यते व्याकरणस्य शब्दैस्तत्कीर्तिरेवात्र यथामुदब्दैः ॥ १

यो लेखशालाऽध्ययनाय वीरो,
विनीयमानः प्रयतः पितृभ्याम् ।
इन्द्रेण पृष्टं सममुत्ततार,
सर्वैस्ततः शाब्दिक एष ऊचे ॥ २

ततः परं यः परिणीय पत्नीं,
संभुज्य सर्वानपि कामभोगान् ।
गृहात्परिव्रज्य चरित्रलोल्या-
न्मन्ये विसस्मार स शब्दविद्याम् ॥ ३

स तत्र संज्ञाविधिना समानैः,
सहाऽपि सन्ध्यक्षरतां विधित्सन् ।
ये नामिनस्तेषु गुणञ्च वृद्धि-
मबाधपूर्वं युगपच्चिकीर्षन् ॥ ४

धित्सन् हसत्वं न हि निःस्वरेषु,
तथान्त्ययोर्वै रसयो र्विसर्गम् ।
नाम्नः शतं त्र्युत्तरमन्त्रयुञ्जन्,
विभक्तिभिस्तस्य च नाशमाशु ॥ ५

लिङ्गत्रयोच्छेदमपि प्रकुर्वन्,
न युष्मदस्मत्स्वपरापरत्वम् ।
अग्रोपसर्गा व्यय कारकं च,
स्त्रीप्रत्ययं तत्र मनागपीच्छन् ॥ ६

वर्णस्य लोपं न तथा विकारं,
न वर्णनाशं च वदन्निरुक्तम् ।
कदापि नो विग्रहकारकेषु,
प्रकल्पयन्नेव विकल्पभावम् ॥ ७

वर्णा विशुद्धार्थविभक्तयो ये,
तेषां समासं न समीहमानः ।
सुखाऽव्ययीभावपदं यदत्र
लिप्सुः सदा तत्पुरुषप्रधानः ॥ ८

द्वन्द्वं बहुव्रीहिपरिग्रहादि-
रूपं विरूपं च न कर्म धारयन् ।
शत्रावशत्रावपि न द्विगुत्वं,
यद्यद्वदंस्तद्धितमेव लोके ॥ ९

नित्यं यथाख्यातक्रियाकृतो ये,
तान्सोपसर्गान्न चिकीर्षमाणाः ।

बिभ्रच्च भावं विजहच्च कर्म,
न कर्मकर्तृत्वमुशंस्तथोक्त्या ॥ (अष्टभिः कुलकम्) १०

विराजतेऽयं किल कामकुम्भः,
स्वामिंस्तव प्राज्ययशः समूहः ।
नो चेत्कथं पूरयतीह नित्यं,
बाढं कवीनां मन ईप्सितञ्च ॥ ११

सतः सदैवाभिनयं नयन्ती,
सरागरंगाय रभागरंगे ।
दिशं दिशं चारुदृशं दिशन्ती,
नर्नर्त्ति कीर्तिस्तव नर्त्तकी च ॥ १२

स्विदयमाद्रियते सुगुणैः सखे,
स्विदयमाद्रियते सुगुणानिति ।
सुगुणमैक्ष्य हि वीर जिनाधिपं,
बुधजना विमृशन्ति भृशं मिथः ॥ (द्रुतविलम्बित) १३

राजानः स्वैर्ललाटैरहरहरमिता यान्स्पृशन्ति प्रणामात्,
ते राजतो नखास्ते जगति जिनविभो ! तान्यपि द्योतयन्ति ।
स्वामिंस्तस्मादमीषां प्रवरमिह महाराज नामास्ति सत्तन्-
मन्त्येऽन्ये नखायामपि दधति महाराज संज्ञां मृषा सा ॥ १४
(स्रग्धरा)

यावल्लसन्तौ दिविपुष्पदन्तौ यावद् ध्रुवस्तावदसौ स्तवश्च ।
कुर्यात्प्रकर्षं विजयादिहर्षं सद्युक्तिलीलः शुभधर्मशीलः ॥ १५
(इन्द्रवज्रा)

पू.मू.श्री. धर्मवर्द्धनगणिविरचितम्

समस्यामयं-

## ४४. ॥ श्रीमहावीरस्वामिस्तवनम् ॥

(शार्दूलविक्रीडित)

श्रीमद्वीर ! तथा प्रसीद सततं मे स्यादियं भावना,
संसारं तु वरं च जीवितमथो त्वद्दर्शनात्कै र्मनः ।
भोगान् सर्वकुटुम्बकं क्रमतया जानामि पक्वेतर-
"जम्बूवज्जलबिन्दुवज्जलजवज्जंबालवज्जालवत्" ॥ १

स्थाने तज्जिननूयसे बुधजनैस्त्वं दुष्टकष्टापहो,
भ्रान्त्या भुक्तविषं त्वगाधमुदकं शत्रूच्छ्रितं शस्त्रकम् ।
दावाग्निः प्रबलो महाँश्च निगडस्त्वन्नामतः स्यात्क्रमा-
ज्जम्बूवज्जलबिन्दुवज्जलजवज्जंबालवज्जालवत् ॥ २

सोऽपि त्वां प्रणनाम यः शिवमते श्रीशैवराजो मुनि-
र्येनामी लवणाम्बुधिप्रभृतयो दृष्टा हि सप्त क्रमात् ।
क्षीरोदोदधिभृद्घृतोदकइराभृच्चेक्षवाः स्वादुवा-
रम्भोधिर्जलधिः पयोधिरुदधिर्वारान्निधिर्वारिधिः ॥ ३

ये त्वां श्रीजिन ! संश्रयन्ति हि जनास्ते स्युर्जिनाख्याधरा-
स्तद्युक्तं जलपर्यया इव विभा प्राप्ताऽधिरित्यक्षरम् ।
पर्यायाः स्युरुदन्वता बुधजनः सगृह्यमाणा अमी,
अम्भोधिर्जलधिः पयोधिरुदधिर्वारान्निधिर्वारिधिः ॥ ४

जिनं भजंतामिति झल्लरीयं, प्रवक्ति लोकानिव वाद्यमाना ।
बृहद्ध्वनेरर्थत एव ठस्य, ठंठं ठठंठं ठठठं ठठंठः ॥ ५

(उपेन्द्रवज्रा)

दानं तपः शीलमशेषपुण्यं, ज्ञानाञ्च विज्ञानमपीह भावः।
त्वच्छासनेनेश विना कृतं तत् , ठंठं ठठंठं ठठठं ठठंठः ॥६
(इन्द्रवज्रा)

जिनवचनमिदं तेऽनन्तकृत्वोऽधिकारे,
प्रययुरणुनिगोदं ज्येष्ठपञ्चेन्द्रियाश्च ।
युगपदिह विपद्य स्यात्कदाचिन्न चित्रं,
मशकगलक मध्ये हस्तियूथं प्रविष्टम् ॥ (मालिनी) ७

मन इदमणुरुपं न्यायसिद्धं मदीयं,
मदमदनमतङ्गा यान्ति तन्मध्यदेशं ।
अहमिह किमु कुर्य्यां देव ! साक्षादजय्यं,
मशकगलकमध्ये हस्तियुथं प्रविष्टम् ॥ (मालिनी) ८

नवनं नमनं महनं वचनं, कुरुते कुरुते कुरुते कुरुते ।
तव यः स यशः शिव मां च सुखं,
लभते लभते लभते लभते ॥ (तोटक) ९

दीव्यद्दीधिति दिक् चतुष्कसदृशं भामण्डलं पृष्ठतः
कृत्वाऽऽसीनमहो चतुर्मुखविधुश्रेष्ठाऽऽस्य नन्तुं त्वकाम् ।
आयातः(तौ?) स्म यदा विमानसहितौ श्रीपुष्पदन्तौ तदा,
चन्द्राः पञ्च तथेव पञ्च रवयो दृष्टा जनै भूतले ॥(शा.वि.) १०

पुण्या ते प्रकृतिः प्रभो ! परसुरो बाढं मदाढ्यः सदा,
स द्रव्योऽपि निराश्रयोऽसि मदनानीकं परिघ्नन् स्फुटम् ।
इष्टं मृष्टतरं च वर्णनमथो प्रस्तूयते ते क्रमाद्-
गङ्गावद् गजगण्डवद् गगनवद् गाङ्गेयवद् गेयवत् ॥ (शा.वि.)११

(कलशः)

इत्थं वाञ्छितदानदैवततरुर्यः शासनाधीश्वरः।
श्रीवीरः शिवतातिराततयशाः श्रीधर्मतो वर्द्धनैः,
नूतो नूतननूतनद्युतिमयः काव्यैर्समस्यामयै-
र्ये ध्यायेयुरिमं जिनं जगति ते स्यु र्जन्तवः कन्तवः ॥(शा.वि.)१२

पू.श्री चन्द्रमहर्षिविरचितः
पञ्चसंग्रहग्रन्थ-टीकाप्रारम्भे

## ४५. ॥ श्रीमहावीरस्वामिस्तवः ॥

(आर्या)

सिद्धं सिद्धार्थसुतं, त्रिकालविज्ञानभासितज्ञेयम् ।
गतकर्मांशश्लेषं, विव्यथसातास्पदं शान्तम् ॥ १

निर्नासिताघजालं, विनाशिताशेषमरणभयपटलम् ।
पथ्योपदेशदाने, कुतर्कनाशे च चपलतरम् ॥ २

आपन्मेघौघानां, विक्षेपे वायुवीर्यजेतारम् ।
अज्ञानध्वान्तार्कं, संसाराब्धौ महापोतम् ॥ ३

भव्यसितोत्पलिकाकर-बोधविधौ विमलकिरणशीतकरम् ।
पापवितापितसज्जन-भूधरनिर्व्वपनवारिधरम् ॥ ४

प्रकटीकृततत्त्वगुणं सुरदैत्यनमस्कृतं भुवननाथम् ।
सुरशैलमिवाचलितं, प्रबलरुपसर्गपवनौघैः ॥ ५

भवजलधिपतितनतजन-शिवपदसुखनगरगमनवरफलकम् ।
अतिगुपिलविपुलकलिकलुष-गहनदवदहनविजितबलम् ॥ ६

पू.मु.श्री समयसुन्दरगणिविरचितम्

# ४६. ।। श्रीमहावीरस्वामिबृहद्स्तवनम् ।।

यमकमयं–

(द्रुतविलम्बित)

जयति वीरजिनो जगताङ्गज, सकलविघ्नवने विगताङ्गजः ।
क्षणनिरस्तसमस्त... मानवग्रहनिषेव्य पदो नत मानवः ।। १

विधुवरेण्ययशः प्रसरो वर–प्रविलसद्गुणहंससरोवर ।
दिशतु मेऽभिमतं सुमनोहर, स्मरतिरस्कृतरूपमनोहरः ।। २

जिनवरं विनुवामि कलापदं, हृतनमत्सुमनः सकलापदम् ।
त्रिजगतीयुवतीतिलकोपमं, कलमकान्तदृशं मलकोपमम् ।। ३

पिबत निर्मलवाक्यसुधारसं, जिनपते जन... द्रुसुधारसम् ।
त्रिभुवनस्य तिरस्कृततामसं, मुखशशिप्रसृतं वितताम‌सम् ।।४

कुशलकन्दपयः कुशलाभवं, भज नतं हतवांस्त्रिशलाभवम् ।
शिवसरोजरविं शमतामलं, सुखकरं कृतिनां नमतामलम् ।।५

सुजनकैरवसोमसमोदयस्तनुसमस्तसुखालस मोदय ।
त्वमिह मां करुणाखिलभूघनः,
कमलकुड्मलकोमलभूघनः ।। ६

जपति नाम जनो जिन ! तावकं, स्पृशति ते न विपज्जनतावकम्।
मुखकरण्डमणिं महिमाशुभं, हृदयकैरपूर्णहिमां शुभम् ।। ७

जिन ! जडोपि जनस्तव नामतः, कविपदं लभते स्तवनामतः ।
सुकृतिसज्जनसञ्चयसोदर, प्रबलपुण्यलतापयसोदर ।। ८

तव वचौ जिन ! मे सरसंशय, द्युतिजिताम्बुजविस्मरसंशय ।
हरतु सर्वतमः पुन रक्षणं, भवपयोधिपतज्जनरक्षण ।। ९

त्वमिह पुण्यगुणेन समुद्धर, प्रपतितं भववारिसमुद्धर ।
रतिपतौ जिन ! मां सहसालसल्ललनवल्ललनैकहसालस ॥ १०

कनककैरवकायकलाप का ... रुपमानतलोककलापरुक् ।
सुजननेत्रसुधारविराजते, चरमतीर्थप ! कापि विराजते ॥ ११

समय मे जिनराज भवानल, पदकजं प्रणतस्य भवानलम् ।
परिहरन् प्रतिपापपरम्पर, व्रतकृताद्भुतपपापरम्परः ॥ १२

तव विलोक्य रुचिं भुवि काञ्चनं, कृत तदा... नो भवि काञ्चन।
प्रविशतीव शुचौ शमतालसद्भवपयोनिधिपोतमतालस ॥ १३

इति मयका महितो जिनचन्द्रश्चरमजिन-
श्चरमोदधिमन्द्रः स्तुति करणेन वितन्द्रः ।
करुणाकैरविणीसमचन्द्रः समयमनोहर
कृत कृतिभद्रः प्रदलितभवभयवन्द्रः ॥ १४

मुनिप्रवरश्रीधर्महंसगणिविरचितम्

## ४७.॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

बम्भणवाटक-

(शार्दूलविक्रीडित)

कम्रानम्रसुरासुरेश्वरशिरः कोटीरकोटीतटी,-
निष्ठानेकमणीघृणीस्नपितवत्पादाब्जशोभोत्सवम् ।
सर्वानन्दपदार्पणेऽमिततयाऽपूर्वैकचिन्तामणिं
तं श्रीबम्भणवाटकाह्वयततख्यातिस्थवीरं स्तुवे ॥ १

यः सिंहं जयति स्म सर्वविजयिस्वोजः श्रिया किं ध्वज,-
व्याजेनेव ततस्तदुत्तमतरः सम्पत्पदाप्त्याऽप्ययम् ।
यत्सेवां तनुते हृदुन्नतमुदा स्पष्टैकशिष्टेष्टदाम्
श्रीमद्बम्भणवाटकाह्वविजयी वीरः स वोऽव्याद्विभुः ॥ २

यन्माहात्म्यमहो ! महामयजलव्यालानलेभद्विषत्,-
सिंहस्त्येनरणादिभीभिदभयानन्दप्रदं प्राणिनाम् ।
यज्जागर्त्ति किमद्भुतं तदसि यत्त्वं सार्व ! सर्वात्मना
भित्त्वा भीतिपदानि शम्पदनिधिः शश्वत्त्वदेकप्रभोः ॥ ३

विश्वं विश्वमनाथमस्त्यभयद ! त्वन्नाथसार्थं विना
सर्वापन्निधिजन्मजातिनिधनक्लेशावलीसङ्कुलम् ।
त्रैलोक्येऽसि च यत्त्वमेव शरणं सत्यं च शंशेवधि,-
स्तेनार्थित्वमितो भवन्तमधिपं याचे यशःश्रीपदम् ॥ ४

मूर्त्तिस्फूर्त्तिरतीव शन्निधिरियं यस्य प्रशस्यं यशः
सौभाग्यं शिवभोगयोगसुभगं माहात्म्यसद्माह्वयः ।
ज्ञानं ज्ञेयमनन्तवस्तुविषयं ध्यानं मनःपावनम्
स श्रीबम्भणवाटकः पटुपदं दद्यान्मुदां सर्ववित् ॥ ५

किं सौभाग्यमयं महोदयमयं किं सर्वसम्पन्मयम्
किं विद्यात्ममयं किमुज्ज्वलकलालीलामयं किं स्फुरत् ।
विश्वानन्दमयं किमद्भुतशमश्रीशम्मयं किं सित,-
ध्यानाद्वैतमयं किमित्यधिप ! नस्तेऽस्तु श्रिये दर्शनम् ॥ ६

यः पूर्णः करुणागुणेन समदृक् शक्रेऽप्यहो कौशिके
पादस्पर्शिनि सङ्गमादिषु तथा दुष्टेष्वनिष्टायिषु ।
सर्वाङ्गक्षमिताक्षमप्रकृतिमत् ख्यात्युत्सवायेव किं
वीरः सोऽस्तु मुदे जगज्जयपदं सान्वर्थसञ्ज्ञां दधत् ॥ ७

तत्सत्यं यदचिन्त्यमन्त्रमहिमैश्वर्यं वसत्यद्भुतम्
त्वन्नाम्न्येव कलावपीश ! भविनां तद्ध्यायिनां स्युर्यतः ।

स्थानस्थाननवीनपीनपदवीसम्पन्महः श्रीयशः
श्रेयः श्रव्यगुणोदया जयमया निर्वाणशंसञ्चयाः ॥ ८

नाथः सार्थक एव यः शिवपथप्रस्थानसंस्थाङ्गिनाम्
योगक्षेमकरत्वतोऽयमजनि स्वामीह सत्यं स्वयम् ।
निर्नाथं त्रिजगन्निरीक्ष्य विषमं दुःखैः कृपापूरतः
सौख्योपायसमर्प्पणैरिव किमाधातुं सनाथप्रथम् ॥ ९

यन्नामापि पवित्रमन्त्रमहिमारूपं परं पावनम्
चिन्तामण्यधिकं त्रिलोकहितकृत् ध्यातं भवोत्तारकम् ।
शुद्धः सिद्धरसः सुवर्णवरणे पुण्यात्मनां स्तान्मुदे
स श्रीबम्भणवाटकाह्वयमयः श्रीवर्द्धमानप्रभुः ॥ १०

हेयादेयतया चतुर्विधभिदं सञ्ज्ञाकषायाश्रयम्
दुस्त...चतुधर्मसंवरसमाध्यासेव्यशय्याश्रमम् ।
किं वक्तुं युगपद्गिरेव भविनां व्याख्यावनीस्थश्चतू-
रूपं यः स्वयमाश्रयच्छ्रितहितं तन्यात्स वीरप्रभुः ॥ ११

त्वं श्रीबम्भणवाटकाह्वभगवन्नाथोऽसि मे त्वं गुरु-
स्त्वं देवद्रुमणीगवीनिपमहाभावोऽपि विश्वार्थदः ।
त्वं सेव्योऽसि जगत्त्रयेऽपि सुखकृत्त्वं सद्गुणस्त्वं भवात्
त्राता त्वं भविनो महोदयपदं त्वं सर्वबन्धुः प्रभो ! ॥ १२

यः स्वैश्वर्यनिधिः श्रितेषु सुभगारोग्यादिसम्पत्प्रदो
राज्यप्राज्यकुटुम्बसन्ततिपदप्रष्ठप्रतिष्ठापटुः ।
कीर्तिस्फूर्त्तिकलाविलासकलनः कैवल्यशालं यतः
स श्रीबम्भणवाटकाप्तसफलः सद्भिस्ततस्त्वं श्रितः ॥ १३

यस्त्रैलोक्यविलोकिकेवलकलाशाली सुरा यं श्रिता
येनाख्यायि सुशासनं त्रिजगती यस्मै नमस्येद् यतः ।
सिद्ध्यध्वाऽजनि यस्य चारु चरणं यस्मिन्ननन्ताः श्रियः
स्युः श्रीबम्भणवाटकाह्वविजयी जीयात्स वीरश्चिरम् ॥ १४

इत्थं भक्तिसुयुक्तिहर्षविनयश्रीसूरिपूज्यस्थिति,-
र्नीतः स्तोत्रपथं पथं शिवपुरस्त्वं मे प्रसीद प्रभो !
स श्रीबम्भणवाटकाह्वसुयशः श्रीवीर शश्वद्यथा,-
नन्तश्रीपदधर्महंसमहिमः स्याद् बोधिबीजोदयः ॥ १५

पू.उपा. श्री नेमिसागरगणि विरचितम्

## ४८. ॥ श्रीवीरजिनस्तोत्रम् ॥

(द्रुतविलम्बितम्)

(सुखाशिका-नाम-गर्भितम्)

जयसि **साकर मोदक** हे शमी सुकृतवृक्ष**जले बि**भयक्षयः।
क्षितजरा**मर कीर्ति**भर क्षमो गलद**घे वर** मुक्तिरमाकरः ॥१

दिशतु मे**षरमां** वर **लापसी खलहलां** स्फुरद्**द्राख**गिरौ पवे ! ।
गुण**बदाम** रिपुक्षयनिर्वृते रत **बनालि अर**म्यमुखाम्बुजम् ॥२

जन **अखोड कपूर करम्बकं** सुजल**दाडिम**नोहरनिस्वनम् ।
प्रणम **सेवक खाण्ड** म **घी**तिदं
स्फुरद**ही**शनुतं नत**खाजल**म् ॥ ३

(फाग)

जन**पस्ता**ञ्जिन **खारिक**भेदक सार ।
**कुहलापाक दमीदो सोपारी** रस सार ॥ १

सत् **सेवइआ मोतीआ कसमसिआ** सार ।
दुष्टकला**डूआ गलपापडी** जयजयकार ॥ २

**मांडी**नत मंतारय वसुधा **मोतीचूर** ।
महसूपकरणकारण **कयरीपाकखजूर** ॥ ३

**मामण** पुण्यवसुं **हालीनत** मंसुखसंग ।
चार्वा**चारोली**कर चारविजितमातङ्ग ॥ ४

**वरसोलां** नतपदयुग पारगतं **नमजाक** ।
जितशो**काकबली**श्वर सुकृत **सदाफल**लोक ॥ ५

**आम्बा नारायण** नतपदकज **सेलडि**सार ।
वृष**बीजोरूं केलां** त्वामभिनौमि जितार ॥ ६

**सालि सुदालि**नतक्रम **मांडा वडि** जिनचन्द्र ।
जयसि **सुखीरवडां** जनकश्मलहर गततन्द्र ॥ ७

सुंदर**डोडी**लाधर **पापड पापडी** सार ।
**तूंरी**आन्वित **कङ्कोडा** भततेस्तनुतार ॥ ८

**गतरेफो फल**चिन्तन **डोडा पान लवङ्ग** ।
वरतर**जायफलो**न्नत**जाव** त्रिभुवनरङ्ग ॥ ९

(कलश)

इत्थं श्रीत्रिशलासुतः स्तुतिपथं दीपालिकावासरे
नीतः स्फारसुखासिकावलिकलैर्भोज्यैरशेषैः सुखम् ।
देयाद्वाचक**धर्मसागरगुरोः** पट्टाम्बरद्योतने
सूर्यश्रीगुरु**लब्धिसागरशिशोर्नेमे**र्मनोवाञ्छितम् ॥ १०

पू.आ.श्री मानतुङ्गसूरिविरचितम्
रसवतीनामसहितम्

## ४९. ॥ श्रीमहावीरजिनस्तवनम् ॥

कल्याणधामकरणं घनकेवलश्री-
राजीवरोचितमनुत्तरतीर्थराजम् ।
सत्त्वालयं प्रगुणराजिनयप्रमाण-
सच्छासनं पटु नवानतमामनन्तम् ॥ (वसन्ततिलका) १

श्रीवर्द्धमानेह सतां शिवाय-रुचायुरिष्यो नवि चाउलाला ।
स आडणीयाक्षरपाटवानां
लब्धे त्वयि (?) सेवितथालभाणाम् ॥ (उपजाति) २

षुडहडीश सुरार्च्य नवा यमी लघु अषोडन वा यम**द्राष**दाम् ।
षसषतत्सुर**सीङ्गोडां** स्यु मः प्रबल**खारिक चारोली**नताम् ॥३

कः कुली तव मु**दाडिम**नीहो वीक्ष्य जातिसषजूरति केलाम् ।
सद्र**साकर** महानीमजां हो मण्डली फलहुली वरसोलान् ॥४
(स्वागता)

आज्ञासात**पुडी** तरारि पिहुला षाजान्तिमोटां स्फुरत्
माठाज्ञाभव सिंह केसर भलां **लाडू**रगाडूसमा ।
यत्राप्नोति सुषाण्डघीयसगुणा झासाङ्कुलीनः पदे
मांडीनामुरुकीर्ति सैव यशसा सेनो **सुंहाली** ततः ॥(शा.वि.)५

सार**साकर**स **आंबिल**वाणी जावनांदल साटोरवमांत्वम् (?) ।
मां त्वसा**दहिवडी**रणभूमि व्याधिभाजिनिय**घेवर**सन्तम् ॥ ६
(स्वागता)

आचूरिमाला गुलघीअमिश्री **दहींथरा** राजससाकुचीर्णा ।
तत्त्वां दया **गुन्दवडा**लकंसा **कंसार**भोच्चै गुल**लापसी**दन् ॥७

किं नारा**यण**मुख्या **आम्बां केलां** सुरासकातलियां ।
मुक्ते: खलु **खडबूजां** कपूजिता **खाण्डघी** अस्तु ॥ ८

नावे: शालिलुदालितो**घृत**शुभ त्वं केवडां घारडां
भा**सालेवड खाण्ड**मीलरसवाग् नि:**पापडे**भ्यो **वडी** ।
श्रेय: पूरणकोपलेह भवतो मां चे त्वदाह्वापरे
रक्षां बीजतरुं घृणैककरणां **केलां** गरागां दधे: ॥(शा.वि.) ९

नित्यां प्रियां करमदाङ्गिकचम्बरिष्भा
पूषाखटी कृतभवैक इरीणदु:कृत: ।
आ**पत्रवेलि**तगुणामय **लीम्बु**याद्युषा
त्वं निर्भरबाह्वलिसुचन्द्रसु **चीभडां** स्तुम: ॥ १०

श्रेय:फली त्वमसि वाग्निकसुम्भियाप्रभृत्
खाटावनीशवनिताधवनीलुआर्च्यख: ।
कस्तूरि आय शरणं मम तत्त्व वीक्ष्यतां
जम्बीरआं बहुलितोत्तमभाववत्सल: ॥ ११

भ्रान्तींडूरां डोडिकामान्तभाजी डोडीभीतेर्मानसे सन्**मतीराम्** ।
त्वं ब्रह्मौ**कौठीम्बडां** कां **करेलां**
**कङ्कोडा**यां **आमली**लाहि देव ! ॥ (शालिनी) १२

काचरीढ्य वचसां गरीण ! भो भक्तिमुत्पल**कलिङ्गडा**स्त्वयम्।
तारकं इरसत्तुंसमाग्रं विधि न
समहिति कोहलां स्यत: (?) ॥ (स्वागता) १३

पुण्यानुकूलरिपुगुन्दलजादरीया
न्नन्दं सुनेह लहिगटुं खलु काकरीयात् ।
पोलीभ्य ओसडसिते विभ**वेढमील**-
भावात् परा **तिलवटी** त्वयि भक्तिपूडात् ॥ (व.ति.) १४

**माण्डा खीर**भवो नघीअकरस **श्रीखण्ड**ना खोबला
माहीं सातवराज**साकर** लवे मेली कमो **खाखरां** ।
**धाणा** हीमनुतूतुयां सदवडा कोरासनारिङ्गतो
रींफाणासुगिरां कृते कउठभस्ते बाउलीआत् प्रभो ! ॥ १५
(शा.वि.)

मुहदूध**जभवेसाकर** साद्दहीन जयसं **करम्बकः** ।
कर्पटाङ्गणसणशालघोलइ त्वं च लूनभृदयुक्शलीमुखे ॥ १६

कान्त्यानि **जायफल**कृत्तम **एलचीर**
श्रीचन्द्रमौल्यचलविङ्ग वलक्षकीर्तेः ।
श्रीज्ञा**तज** ! प्रशमपूर्ण ! **तमालपत्र**-
छाया भवे खयरसार निवृत्तिचेताः ॥ (वसन्ततिलका) १७

**कस्तूरी** कमलालि**चन्दन**लसत्**कर्पूर**जैत्रानना-
मोदोद्यद्भव**पान**फूलसनरी चांहूलबीडां सदा ।
**सोपारी**त्वमिति प्रियां रसवतीं कत्वार्थये त्वां परं
सौहित्यं सुमते विनेयसुकृते श्रीमानतुङ्गप्रभो ! ॥(शा.वि.) १८

पू.आ. श्री रत्नाकरसूरिशिष्यविरचिता

# ५०. ॥ श्रीवीरजिनस्तुति-द्वात्रिंशिका ॥

विनम्रदेवासुरमौलिमालावतंसहंसावलिसङ्गचङ्गम् ।
जगत्त्रयानन्दिरमानिवासं क्रमाम्बुजं वीरजिनस्य नौमि ॥ १
(उपेन्द्रवज्रा)

(उपजाति)

गुरुः सुराणामपि तेऽखिलानां न वीर ! धीरो गणने गुणानाम् ।
को वा स्वयम्भूरमणस्य संख्यां
दक्षः समाख्यातु पयःकणानाम् ॥ २

तथाऽपि कर्त्तुं कलये स्तवं तेऽ-
भीसं(भीप्सां) ततो लिप्सुरहं विमूढः ।
यद्वा विलोभाकुलितं जनानां
मनो विजानाति न किञ्चिदीश ! ॥ ३

सेवापरा वीर ! सुराः सदा ते तद्गेहदासाः किल कल्पवृक्षाः ।
तैः साकमाकर्ण्य तवोपमानं न गर्हते कस्य मनो बुधस्य ॥ ४

जन्माभिषेकावसरे सुराणां शिलोच्चयः कम्पनकैतवेन ।
तवांह्रिसंस्पर्शवसे(शे)न धन्यो ननर्त्त हृष्टश्चलसानुबाहुः ॥ ५

सुरोत्करे कुम्भकरे सुरेशाऽसहत्वसङ्कल्पनिकारकृन्नु ।
वीरक्रमाङ्गुष्ठशिखाप्रणुन्नो मेरुः शिरोधूननमाततान ॥ ६

सुरोऽहिरूपः किल बालकेलावभीरुभावं भवता श्रितेन ।
क्षिप्तस्तव व्योमनि वैरिवर्गे स धूमकेतुस्थितिमाचचार ॥ ७

दम्भोलिदण्डोपममुष्टिघातव्यथागलद्दर्प्पभरः सुरोऽसौ ।
विहाय भीमं च विधाय रम्यं वपुस्तवांह्री प्रणनाम वीर ! ॥८

आलोक्य लोकातिशयं तदेतत् ते बाललीलायितमाललाप ।
त्वां 'वीरमा'खण्डलमण्डलीति
ख्यातिं क्षितौ नाम जगाम कामम् ॥ ९

ज्ञानत्रयालोकितविश्वभावं भवन्तमर्हन्तमऽनाकलय्य ।
चक्रे पितृभ्यां तव लेखशालाविधिस्तमत्राऽनुचितं विचिन्त्य॥१०

अग्रे खलेखार्प्यत (?) लेखशाली
स एष लेखाऽधिपतिस्तवाऽऽसीत् ।
त्वां रत्नसिंहासनसंनिविष्टं पप्रच्छ वैयाकरणं सतत्त्वम् ॥ ११

पुरो यदिन्द्रस्य जिन ! त्वयोचे तत्तेन जैनेन्द्रमिति प्रतीतम् ।
समासवाक्यागमसन्धिसंज्ञामनोहरं व्याकरणं किलाऽऽसीत् ॥१२

त्वया चिरं तत्त्वविदा गुरूणामनुग्रहायावसता गृहेषु ।
व्युत्पादितः शेषजनोऽत्र यस्मात्
'महाजनो येन गतः स पन्थाः' ॥ १३

सुवर्णधाराभिरशेषविश्वं तथा कृथास्त्वं घनवत् प्रपूर्णम् ।
दारिद्र्यतापोपशमेन शस्यश्रिया तथा तच्चिरमुल्ललास ॥ १४

स्त्रैणं तृणं तन्निधनं धनं च विषं सुखं वैषयिकं विधिज्ञः ।
त्वं बन्धनं बन्धुरबन्धुवृन्दं विज्ञाय दीक्षाभिमुखो व्यहासीः ॥१५

बिडौजसोपद्रववैरिसेनां तवापस(त)न्तीमविधौ विधाय ।
साहाय(य्य)कप्रार्थनमादधे तन्मोघं महावीर ! भवानकार्षीत्॥१६

गां निर्जराणामधिपस्य हन्तुं समुद्यतः पातकमाचचार ।
श्रेणिं च तेषां किल यो न लेभे स संगमः किं न जनङ्गमोऽभूत्॥१७

जगत्त्रयत्राणकरोऽपि वीर ! त्राता तमाश्रित्य न ते प्रमादः ।
रवेः प्रकाशः सुतमोपहोऽपि नाभूदुलूकं प्रति तादृशो वा ॥१८

सद्ध्यानसन्नाहधरे सुपर्वसीमन्त(न्ती)नीलोचनबाणमाला ।
समुज्ज्वले वीर हृदि त्वदीये प्रवेशलेशं विततान सा न ॥१९

क्रुद्धस्य देवाधिपतेः कराणां ज्वालाजटालं कुलिशं विलोक्य ।
स कान्दिशीकश्चमरोऽसुरेन्द्रो वीर ! त्वदंह्री शरणं चकार ॥२०

शरीरदुर्गे [तनु?]ज प्रवेशे व्यासेधमाधाय चिरं ज(जि)गाय ।
भृशं भवानान्तरवैरिवृन्दं कृशं सुखेनाप्रतिवीर वीर ! ॥ २१

समुज्ज्वलध्यानविधानवह्नौ हुतेषु कर्मेन्धनसञ्चयेषु ।
आकालमालम्बितसाहचर्या
वीर ! त्वया व्यौह्यत केवलश्रीः ॥ २२

विरोधमाधूय निसर्गजातं परस्परप्रेमभृतोऽसुमन्तः ।
समस्तभाषापरिणामरूपं वचोऽमृतं कर्णपुटैः पपुस्ते ॥ २३

त्रैलोक्यपावित्र्यकरो गरीयो मार्गत्रयेणादधती प्रचारम् ।
सिद्धान्तवाणी भवतः प्रसूता प्रालेयशैलादिव देवसिन्धुः ॥२४

प्रकाशकेनाखिलविष्टपानां मिथ्यादृशां वीर ! न (नु) मानसेषु ।
तमो विभिन्नं भवता खगेन महागिरीणामिव गह्वरेषु ॥ २५

अहो न केषाञ्चिदहोप्रकारं तवावतारोऽपि चकार वीर ! ।
सुदीर्घदारिद्र्यजुषां न यद्वा चिन्तामणिश्चिन्तितदानदक्षः ॥२६

बभूव विध्वस्तसमस्तलोकार्त्तिकः सदा कार्त्तिकवासरोऽसौ ।
प्रभावती सा च कुहूतमिश्रा(स्रा) तद्वीरनिर्वाणमहामहेन ॥२७

नरास्त्वदीयांह्रिनखारुणांशुकास्मी(श्मी)रनीरप्रकरेण वीर ! ।
स्नानान्मलक्षालनमादधानास्तां मुक्तिकान्तामनुरञ्जयन्ति ॥२८

सद्भाग्यभङ्गीभरलभ्यसङ्गं लीलानिकेतं जगदर्च्यलक्ष्म्याः ।
आसाद्य ते शासनमुत्तमं ही जिन ! प्रमादेन मया व्यतीतम् ॥२९

तत् पूर्वसंस्कारबलेन लब्धं मया विलुम्पन्ति हहा प्रमादाः ।
वीर ! प्रसादेन यथा तथैतान्
जयामि वेगेन तथा विधेहि ॥ ३०

अरे करालः कलिकाल मा भूः कर्माणि वः कोऽयमहो प्रयासः।
मया भवद्व्यापसमापधीरं वीरप्रभोः शासनमद्य लेभे ॥ ३१

वीरक्रमाम्भोजवने तवायं परिस्फुरच्चारुरुचीमरन्दे ।
सन्त्यक्तसङ्कल्पपदप्रचारः स्थेमानमास्कन्दतु मे मनोऽलिः ॥३२

इत्थं वीरजिनेश्वरस्तुतिरसौ सज्ज्ञानरत्नाकर-
श्रीरत्नाकरसूरिशिष्यरचिता श्रेयः श्रियामाश्रयः ।
एनां योऽमलभावमञ्जुलमना धीमानमायः स्मरेत्
नित्यानन्दमनोज्ञसिद्धिवनितासङ्गं स चङ्गं श्रयेत् ॥ ३३

(शार्दूलविक्रीडित)

पू.मु.श्री रत्नसिंहविजयविरचितम्
सुजैत्रपुरमण्डन-

# ५१. ॥ श्रीमहावीरजिनस्तोत्रम् ॥

(वसन्ततिलका)

तुभ्यं नमः शुभसुजैत्रपुरावतार !,
तुभ्यं नमः कृतसुहृत्सफलावतार ! ।
तुभ्यं नमः प्रणतकामितकल्प ! वीर !,
तुभ्यं नमो वृषविधानविधौ सुधीर ! ॥ १

तुभ्यं नमः शमरसामृतवारिवाह !,
तुभ्यं नमः शमितदुष्कृतदावदाह ! ।
तुभ्यं नमोऽभव ! भवार्णवकर्णधार !,
तुभ्यं नमः शिवरमाहृदुदारहार ! ॥ २

तुभ्यं नमः कमलपत्रविलोचनाय,
तुभ्यं नमस्तनुभृतां भवमोचनाय ! ।
तुभ्यं नमोऽनिमिषनाथततिस्तुताय,
तुभ्यं नमो भगवते त्रिशलासुताय ॥ ३

तुभ्यं नमो भुवनभीततिभञ्जनाय,
तुभ्यं नमस्त्रिजगतीजनरञ्जनाय ।
तुभ्यं नमो वृषसरोजविरोचनाय,
तुभ्यं नमः करणभाजितरोचनाय ॥ ४

तुभ्यं नमः सुरनरासुरसेव्यपाद !,
तुभ्यं नमो घनघनाघनधीरनाद ! ।
तुभ्यं नमः समयसिद्धसरित्नगेन्द्र !,
तुभ्यं नमः सततसज्जनदत्तभद्र ! ॥ ५

तुभ्यं नमो मयि विधेहि जयं जिनेश !,
तुभ्यं नमस्तनु शिवं शिवसन्निवेश ! ।
तुभ्यं नमः कुरु कृपां करुणानिधान !,
तुभ्यं नमश्चिनु वृषं विहितावधान ! ॥ ६

तुभ्यं नमस्तव विभो ! रुचिरं चरितं,
तुभ्यं नमस्तव मत (तं) परमं पवित्रम् ।
तुभ्यं नमो जिन ! जपामि तवैव नाम,
तुभ्यं नमो भवसुखाय सुखैकधाम ॥ ७

श्रीसंघहर्षसुविनेयकधर्मसिंह-
पादारविन्दमधुलिण्मुनिरत्नसिंहः ।
श्रीमत्सुजैत्रपुरवीरजिनेन्द्रसार-
स्तोत्रं पवित्रमतिचित्रकरं चकार ॥ ८

पू.मु.श्री पार्श्वचन्द्रगणिकृतम् ।

## ५२. ॥ श्रीमहावीरस्तवनम् ॥

कल्याणमालामणिसन्निधानं, श्रीगौतमाद्यैर्मुनिभिः प्रधानम् ।
यशोगुणैः सम्प्रति वर्धमानं,
स्तवीमि भक्त्या जिनवर्धमानम् ॥ (उपजाति) १

अइउऋलृसमानाः सन्ति लोका इदानी-
मघनसरलभूता वक्रभावप्रभूताः ।
कथमिह हि लभन्ते प्राभवं शुद्धमार्गं,
प्रचुरतरविशस्ते तेन तुच्छा नु चित्रम् ॥ (मालिनी) २

लक्ष्मणवर्णादयोऽनेके, वार्द्धिपक्षमिताईताम् ।
ह्रस्वदीर्घप्लुतभेदाः, सवर्णा इति मे मतिः ॥ (अनुष्टुप्) ३

प्राप्तासन्धि बुधा एऐ-ओऔसन्ध्यक्षराणि च ।
व्याकुर्वन्ति यथा भावं, तथाऽहं वीर ! दर्शनात् ॥(अनुष्टुप्) ४

जैना अजैना उभये स्वरायं,
सङ्गृह्य मह्यां च विराधकाः स्युः ।
आराधका वा जिनपर्युपास्ते -
स्तदन्तरं शुद्धधिया कृतार्थाः ॥ (उपजाति) ५

यावन्तः सन्ति विख्याता, अवर्जा नामिनः प्रभो ! ।
तावन्तः शत्रवो दूरं भूयासुस्त्वत्प्रसादतः ॥ (अनुष्टुप्) ६

आद्यन्ताभ्यामर्हतां सुप्रसिद्धौ, यौ चक्राते वार्षिकं सामिवर्षम् ।
विश्वाधीशौ वन्दनीयौ जनानां,
नित्यं वन्दे तावहं भक्तियुक्तः ॥ (शालिनी) ७

भूयांसीहानेहसां व्यञ्जनानि, भुक्त्वा भुक्त्वा भूयसा नैव तृप्तिम्।
याता जीवास्तत्प्रभो तावकीनां,
श्रुत्वा वाचं वीतरागा बभूवुः ॥ (शालिनी) ८

स्वामिन्मे सर्वपापानां, कार्यायेत्सञ्ज्ञया समम् ।
ज्ञायते यदि सामर्थ्यं, त्वत्स्वरूपं लभेत्तदा ॥ (अनुष्टुप्) ९

आमाः शृण्वन्तु मोहाद्या, अरेदोत्रामिनो गुणः ।
यथाऽऽयुर्वेदिनो जन्तो-स्तथा वीरोमयेक्षितः ॥(अनुष्टुप्) १०

एवं कल्याणनिर्वाण-कल्याणिकतपोऽहनि ।
संस्तुतः पार्श्वचन्द्रेण, श्रीवीरो दिशतु श्रियम् ॥(अनुष्टुप्) ११

पू.मु.श्री कमलविजयविरचितम्

द्वात्रिंशद्दलकमलबन्ध-

## ५३. ॥ श्रीवर्धमानजिनेश्वरचित्रस्तवनम् ॥

ऐन्द्रशिरोमणिचुम्बितचरणं, सकलसमीहितकरणम् ।
मुनिजनमानसमोहनकारण-दीपालीसंस्मरणम् ॥ १

प्रणमत वीरजिनं वरणं, केवलकमलाहृदयाभरणं ।
कृतशिवरमणीवरणं, प्रणमत० (ध्रुवपदम्) ।
भारतभूवलयालङ्करणं, निर्जितदुर्जयकरणम् ।
ध्यानविलीनसदन्तःकरणं, कैवल्याविष्करणम् ॥ प्र० २

विश्वविदां प्रथमोदाहरणं, कृतपातकपरिहरणम् ।
मोहमहीपतिदलबलहरणं, ज्ञानसुधाभ्यहरणम् ॥ प्र० ३

प्रवरपुरन्दरकृतपरिचरणं, कनककमलसञ्चरणम् ।
प्रकटीकृतपुरुषोत्तमचरणं, पूर्वजिनेन्द्राचरणम् ॥ प्र० ४

निःकारिणमुपकारिणमशरण-जगतीजनताशरणम् ।
विहितविषयविषज्वरशरण-मनुदिनमनुतनुशरणम् ॥ प्र० ५

दूरीकृतकृतकर्मावरणं, स्फुरदिन्द्रियसंवरणम् ।
अङ्गीकृतसमताप्रावरणं, जनितजयश्रीवरणम् ॥ प्र० ६

चरणक्षणकृतवार्षिकवितरण-जातयशोविस्तरणम् ।
समतासङ्गमनापास्तरणं, भीमभवोदधितरणम् ॥ प्र० ७

शिथिलीकृतसंसृतिसंसरणं, श्लथितजराजनिमरणम् ।
दीपालीदिवसोदयपूरण-मुत्सवकमलाकारणम् ॥ प्र० ८

एवं कमलविजयकविसंस्तुत-मर्हन्तं गुणवन्तम् ।
दीपोत्सवपर्वणि विलसन्तं, वर्धमानभगवन्तम् ॥ प्र० ९

इति वर्णद्वयसङ्कुलनया द्वात्रिंशद्दल-
कमलबन्धचित्रस्तवनम् ।
प्रत्यक्षरविवक्षया चतुःषष्टिदलकमल-
बन्धगर्भमपीति श्रेयः ।

पू.मु.श्री मणिविजयविरचिता

## ५४. ॥ श्रीमहावीरस्वामिस्तुतिः ॥

(अनुष्टुप्)

धीरं जगत्त्रयीहीरं, गभीरं च महागिरम् ।
कर्मभूमिसहासीरं, महावीरं नमाम्यहम् ॥ १

अनादिकालतप्तोऽहं दुःखपापार्त्तिकल्मषैः ।
त्रैशलेय ! ममैभ्यश्च, द्रुतं मोचय मोचय ॥ २

महावीर्याय देवाय, केवलज्ञानशालिने ।
स्मरगजेन्द्रसिंहाय, श्रीवीराय नमो नमः ॥ ३

महाकविश्रीधनपालविरचिता

(संस्कृतप्राकृतमया)

## ५५. ॥ श्रीवीरजिनस्तुतिः ॥

सरभसनृत्यत्सुरयुवतिकुचतटत्रुटितहारतारकितम् ।
जायं सिद्धत्थनरिंदमंदिरं जस्स जम्मंमि ॥ १

बुद्ध्वाऽवधिना निजजन्ममज्जने हृदयभावमशनिभृतः ।
लीलाइ चलणकोडीइ चालिओ जेण सुरसेलो ॥ २

येन च बाल्ये विबुधो विवर्द्धमानः सविभ्रमं नभसि ।
हणिऊण मुट्ठिणा वामणीकओ कुलिसकढिणेणं ॥ ३

सुरपतिपुरतो विवृतिं वितन्वता विततवाङ्मयं येन ।
जणियं जयस्स विज्जोवएससमए महच्छरियं ॥ ४

मातापित्रोः प्रेमानुबन्धमधिकं विबुध्य यः स्थितवान् ।
दिव्वालंकारफुरंतविग्गहो चत्तसंगो वि ॥ ५

येन परित्यज्य जरत्तृणमिव राज्यं समं सुहृत्स्वजनैः ।
वूढो दढनियमभरो लीलाइ गिरिंदरुंदयरो ॥ ६

सङ्गमक-सुरतरुण्यः स्वगात्र-सौन्दर्यविजितरतिरूपाः ।
अब्भत्थंतीओ दढं थेवं पि न जेण गणिआओ ॥ ७

प्रकुपितसुराधिपविक्षिप्तदिप्तदम्भोलिभेदसम्भ्रान्तः ।
चमरो चलणुप्पलमूलमागओ रक्खिओ जेण ॥ ८

येन घनकर्मपटलं प्रकटतपोवह्निना विनिर्दह्य ।
पलयरवितेयपायडमुप्पाडितमक्खयं नाणं ॥ ९

यश्च सुचिरं पृथिव्यां मिथ्यात्वान्धं विबोध्य भव्यजनम् ।
ठाणं जम्मणजरमरणरोगपरिवज्जियं पत्तो ॥ १०

तं नमत नम्रशतमखमणिमुकुटविटङ्कघृष्टचरणयुगम् ।
भुवणस्स वि बन्धणपालणक्खमं वद्धमाणजिणं ॥ ११

## ५६. ॥ श्रीमहावीरस्वामिविविधच्छन्दः-क्रियागुप्तस्तवः ॥

चरमजिन ! तं कल्याणानि त्वां नवानीहमानो,
भवजलनिधेर्भव्यश्रेणिं यः प्रभूतप्रभावः ।
उपचितचिती त्रैलोक्ये योऽवेरऽविघ्नेतिघाती,
दुरितसऽतमो माद्यन्माया मोहहरोधीगुणा ॥ १

स त्वं पातकघातको वरतरश्रीगेहमेऽधीश्वरा,
ध्वस्तोर्वीजनताप ! देहि सुखद ! स्वान्ते च नित्यं मम ।
यः स्वामिन्नवधीरिमा भवभियो भव्याङ्गिनामुल्बणा,
अश्रान्तं समतानिशान्त ! नमतां येनासमाना रमा ॥(शा.वि.)२

मम स मुनिपते ! त्वमुच्चैर्जितोद्यन्मनोजव्यथाम् ।
प्रणतसुरसमाज ! हीनक्रुधातङ्कमुक्तापदः ।
दुरितमसुमतां द्रुतं योऽनुकम्पाऽसमानाशयो,
जिनप ! रविभः शुभं शाश्वतं शर्म विश्वप्रभो ! ॥ (नाराच) ३

न कस्येह त्वं सोऽनिशमपि परानन्दश्रियमलं,
भवानात्मस्वान्तं विमलसमयच्छन्नामजिन ! यः ।
जगज्जन्तूनां यः शमगृहमिहन्मोहाहितभयं,
सुखं शैवं पुंसां नमदमृतभुक् सङ्घाऽतनुत यः ॥ (सुधा) ४

सदा श्रीमन्नव्या ददत इन ! मां सत्त्वहीनं हि सत्त्वं,
भवान् भूतिं योऽत्र क्षतमदतमोघाऽतनोद्योगकारी ।
सुवर्णोद्यत्कान्तेऽदितजनविपत्स्वेदभेदी मुदं यो,
हिमार्चिः सौम्यास्य च्छितनततत्क्लेश ! यः कर्मराशिम् ॥ ५
(मेघविस्फूर्जिता)

भवानर्तिं हर्त्ता स मम हृदये सदा भव सत्वरं,
वरेण्यं यः पुण्यं समवसरणेऽगदच्छलवर्जितः ।
नृणामुच्चैर्नाऽदादमलनयन ! प्रमोदभरं प्रभो !,
बिभेत्तारं दृष्ट्वा प्रकटतरसंयमान्तरशात्रवम् ॥(अतिधृति) ६

स मे स्वामिन् ! प्रेङ्खद्‌गुणगणखने ! रागादिदोषव्रजं,
गलन्मूर्च्छमायाऽमरचयनराधीशार्च्य ! शर्माऽक्षयम् ।
यशोऽस्तग्लौगङ्गाहर ! दिनकराभासी भयं यो भवान्,
वरेण्या यद्वाणीरमृतमधुरामोदेन भविनः ॥ ७

त्वामीशाहं नतस्त्वं गतदुरितमदाजेयं भवभयं,
यो भीते शीतदीप्तिप्रवरमख भवान् भेत्तु नमदघम् ।
ओष्ठद्वय्या प्रवालं निरुपमरुणच्छायाभरभृता,
वीक्ष्य स्त्रीः सारकण्ठीरव हतमदन छेदात्क न मुदम् ॥ ८
(सुवदना)

स मे स्वामिन् ! नम्रानिमिषनृपहरे रोषहीनाऽसुखं त्वं,
जनो यस्योपास्त्या न खलु जिनपते ! दिष्टहानौ भवेऽस्मिन् ।
रतेरग्रे गर्जन् सपदि निजगृहे मन्मथो येन युद्धे,
महामोहः पुष्यन्निखिलभवजुषां भूरिदुःखान्यघानि ॥(शोभा)९

ये भव्याः स्वामिनं शोभनतरविभापूरतापच्छिदं त्वां,
रङ्गद्रोगावली भाग्यभरभवनं नूनमाशु स्थिरान्ते ।
ये भक्त्यालानतुल्य श्लाघ्यभुजभवतः सार्थवाहाभतीर्थं,
ते नस्ते (रुस्ते) दुस्तरां कष्टकुटमटवीं घोरसंसाररूपाम् ॥१०
(स्रग्धरा)

सद्भावध्यानतारप्रचुरभयहर ! त्वं स मे क्लेशराशिं,
दृष्टे तस्मिन्नहं चाखिलभविकजनप्रत्तःशस्ताशिषीष्टम् ।
विश्वङ्केवल्यवस्था विततशुचियशःसञ्चयैर्यः समन्ताद्,
यस्य प्राज्ञा मतं तेऽभिमतदममहन्मञ्जुभङ्गैर्न यैश्च ॥ ११
(स्रग्धरा)

सपदि सदा स मां विकटसङ्कटमिष्टदमोदयागृहा,
क्षतमदने निजानि वचनानि सृजंस्त्वयि तत्र संस्तवं ।
सुगुणमहोदधे ! जगति येन सुवच्छलताऽहिते जने,
भृशमुपसर्गराजिरुरु सत्तरसाऽसमसाहि दुःश्रवा ॥ १२
(पञ्चकावली)

भुवनपते निरया पटुषार्क निजा गिरस्त्वयि येन हि,
प्रहतमनोजव ! भूवलय प्रियभूरिवैभवभागसौ ।
भवति सदा शुचिकाय जगत्त्रयनायके नतिमत्रयः,
परममिमासदनेशदयाद्यततोऽखिलं दुरितं रयात् ॥(प्रकृति) १३

त्वां जिन ! सिंहलाञ्छन ! वयं तमीश ! बहुधा महेम सुतनुं,
सन्महिमाश्रय ! महितवाग्भरे त्वयि मुदं च तत्र विनताः ।
यो नतनिर्जराऽसुरभयस्फुरन्मदहरो गुणैस्त्रिभुवनं,
भूरिदयालुना भवभृतां निजेन वचसा दुरन्तदुरितम् ॥ १४
(भद्रक)

त्रात नमज्जनताऽतनवं स्तवनं त्वयि तत्र सहर्षमहं,
यः शिवलीनमते मनसीह पुराष्टविधं वरयोगविधिम् ।
देहभृतां शुभविग्रहभावगुरुद्विषदुज्झितमुक्तिपथं,
यस्य यशस्ततयो नहि नेतरभूरविभासुर भूवलये ॥(मदिरा)१५

भव्याब्जदिवाकर वाण्यमृतप्रदतस्य तव स्तवमेवमहं,
वीरश्रितमुक्तिमहापुरमोहमदोज्झित यत्र नताः सुगतिम् ।
ध्यायन्त इहाधिप यं बहुबुद्धिमयानगधीरशिवं भविका,
आसन्नलसत् कुशलाः खलु यं परिषेव्य नरा भवदुःखपदम्॥१६

द्याणामण्डन–

## ५७. ॥ श्रीमहावीरजिनस्तवनम् ॥

(भुजङ्गप्रयात)

महानन्ददुग्धोदधौ वर्त्तमानं महामङ्गलालीविधौ वर्द्धमानम् ।
सुधान्धोवधूधोरणीगीयमानं
स्तुवे द्याणके श्रीजिनं वर्द्धमानम् ॥ १

परब्रह्मपीयूषपीयूषमानं सुकर्पूरकस्तूरिकासन्निभानम् ।
समुद्भूतसद्भूतभावर्द्धमानं
स्तुवे द्याणके श्रीजिनं वर्द्धमानम् ॥ २

मदोन्मादमाद्यन्मरुल्लेलिहानं वचोव्यञ्जितादेसविज्ञेयहानम् ।
पदाब्जापतद्यक्षराट्यातुधानं
स्तुवे द्याणके श्रीजिनं वर्द्धमानम् ॥ ३

महीमण्डपाखण्डलक्ष्मीवितानं समुन्मूलितक्लेशवल्लीवितानम्।
नदोन्निद्रजाम्बूनदाम्भोजयानं
स्तुवे द्याणके श्रीजिनं वर्द्धमानम् ॥ ४

नरैः किन्नरैर्निर्ज(रजी)रीभूयमानं
कुकर्मोर्मिघर्मच्छिदाकायमानम् ।
सतां विघ्नविध्वंसने सावधानं
स्तुवे द्याणके श्रीजिनं वर्द्धमानम् ॥ ५

सुदृग्जन्तुजीवातुतुल्यावदानं कृतोन्मादिदुर्वादिवृन्दावदानम् ।
वितीर्णद्विजाद्यर्थितार्थप्रदानं
स्तुवे द्याणके श्रीजिनं वर्द्धमानम् ॥ ६

वियद्वाहिनीवारिवीध्राभिदानं स्फुरद्भाग्यसौभाग्यसम्पन्निधानम्।
जगज्जागरूकप्रभावप्रधानं
स्तुवे द्याणके श्रीजिनं वर्द्धमानम् ॥ ७

क्षमादक्षताक्षोदितक्ष्माभिमानं मनोनल्पसङ्कल्पकल्पोपमानम् ।
परिस्फूर्त्तिमत्कीर्त्तिभिर्निस्समानं
स्तुवे द्याणके श्रीजिनं वर्द्धमानम् ॥ ८

इति द्याणकक्षोणिभृद्वर्द्धमानः स्तुतः सद्गुणश्रेणिभिर्वर्द्धमानः ।
जिनो जीवितस्वामिनामादधानश्चिरं नन्दतान्नन्दयन्तं ददानः ॥९

## ५८. ॥ श्रीमहावीरस्वामिअष्टक-स्तोत्रम् ॥

(शिखरिणी)

यदोये चैतन्ये मुकुर इव भावाश्चिद्र्चितः,
समं भान्ति ध्रोव्य-व्यय-जनि-लसन्तोऽन्तरहिताः ।
जगत् साक्षी मार्ग-प्रकटनपरो भानुरिव यो,
महावीरस्वामी नयन-पथ गामी भवतु मे ॥ १

अताम्रं यच्चक्षुः कमल-युगलं स्पन्दरहितं
जनान् कोपापायं प्रकटयति वाऽभ्यन्तरमपि ।
स्फुटं मूर्तिर्यस्य प्रशमितमयी वाति विमला,
महावीरस्वामी नयन-पथ-गामी भवतु मे ॥ २

नमन्नाकेन्दाली मुकुट-मणिमा-जाल-जटिलं,
लसत्पादाम्भोजद्वयमिह यदीयं तनु-भृताम् ।
भवज्ज्वाला-शान्त्यै प्रभवति जलं वा स्मृतमपि
महावीरस्वामी नयन-पथ-गामी भवतु मे ॥ ३

यदर्चाभावेन प्रमुदितमना दर्दुर इह,
क्षणादासीत् स्वर्गी गुण-गण-समृद्धः सुख-निधिः ।
लभन्ते सद्भक्ता शिवसुख-समाजं किमु तदा ?
महावीरस्वामी नयन-पथ-गामी भवतु मे ॥ ४

कनत्स्वर्णाभासोऽप्यपगततनुर् ज्ञान-निवहो,
विचित्रात्मा-ऽप्येको नृपतिवर-सिद्धार्थ-तनयः ।
अजन्माऽपि श्रीमान् विगतभवरागोऽद्भुतगतिर्
महावीरस्वामी नयन-पथ-गामी भवतु मे ॥ ५

यदीया वाग् गङ्गा विविध-नय-कल्लोल-विमला,
बृहज्ज्ञानाम्भोभिर्जगति जनतां या स्नपयति ।
इदानीमप्येषा बुधजन-मरालैः परिचिता,
महावीरस्वामी नयन-पथ-गामी भवतु मे ॥ ६

अनिर्वारोद्रे-कस्त्रिभुवनजयी काम-सुभटः,
कुमारावस्थायामपि निजबलाद्येन विजितः ।
स्फुरन्नित्यानन्दप्रशमपदराज्याय स जिनः,
महावीरस्वामी नयन-पथ-गामी भवतु मे ॥ ७

महामोहातङ्क-प्रशमनपराऽऽकस्मिकं-भिषग्,
निरापेक्षो बन्धुर् विदितमहिमा मङ्गलकरः ।

शरण्यः साधूनां भव-भयभृतामुत्तम-गुणो,
महावीरस्वामी नयन-पथ-गामी भवतु मे ॥ ८

महावीराष्टकं स्तोत्रं, भक्त्या भागेन्दुना कृतम् ।
यः पठेच्छृणुयाच्चापि, स याति परमां गतिम् ॥ ९

## ५९. ॥ श्रीवीरजिनस्तोत्रम् ॥

(षोडशोत्तरसहस्रपत्रपद्यमयम्)

(अनुष्टुप्)

परम्परपरम्पारपूरपारपरंपरम् ।
परम्परपुरस्पार पौरं परपरं परम् ॥ १

तारकं रतिरन्तार-तूरतारतरस्वरम् ।
निरन्तरमुरस्तारं तार तारकरत्नरम् ॥ २

निरंबरं निरम्बारं निरं... ।
.....मेरं निरस्तार, चर चौरचरं चिरम् ॥ ३

सुरचीरचरं नारं, वरचारं विरञ्चरम् ।
निरर्च्चिरर्च्चिरर्च्चारं निरञ्चारं निरन्तरम् ॥ ४

सालङ्कारं व्यलङ्कारमलङ्करणलक्षरम् ।
.....हारवारवरक्षीरशीलनीरस... ॥ ५

....रहरस्थूरघोरक्रूरकलङ्करम् ।
खुरखुरखलार-कारस्करमुरश्वरम् ॥ ६

पुरन्दरपुरद्वार-द्वारपालनरप्ररम् ।
धुरक्षरकलङ्कालव्यालवारणरत्नरम् ॥ ७

नरकारण्यरथ्यारं, चरणारन्तु... ।
जुरं सारं, सारसौरपुरस्सरम् ॥ ८

चौरजारकरस्फार, द्वार–दूरचरं चिरम् ।
सारङ्गलक्ष्मरं धीर–वीरं वीरहरं स्मर ॥ ९

सारदारदरक्षारवारपारं दुरन्तरम् ।
तारयारं तरस्तार–तरसा रक्तरक्त.. ॥ १०

.....लस्य लज्जारं, मारज्वरज्वलत्पुरम् ।
स्फुरद्विरतिरत्नार–नारवर पुरन्दर ! ॥ ११

घोरचारं चलद्घोरं सरश्वारभरस्वरम् ।
निरन्तरसरं नीरसारं तारय रन्ध्ररम् ॥ १२

वीरधीरस्फुरच्छीलशैलसारङ्गरङ्गर ।
...........गारवो रतर...रतरस्तर ॥ १३

(स्रग्धरा)

सारं सारङ्गरङ्गं रविरतरतिरं सारसारं सुरङ्गं,
रम्यं रम्यं रमारं मरकरमरकं रक्तरक्तारवारम् ।
वारं वारं विरक्तं, रविरविरमरं मारमारं निरस्तं,
रक्ष्या रक्षारखारक्षरखरखरकं... खारम् ॥ १४

स्मारं स्मारं सुरश्मि रसरसरसरं सारसारं शिरस्थं,
रङ्कारङ्कोरगारस्थिरचरसुरसा रन्त्ररक्तारतं रम् ।
आरम्भारम्भरम्भेरमहपरपरं वारपारं परत्रं,
..........श्वरश्वरचुरचं लब्धरङ्कार... ॥ १५

स्वैरं स्वैरं शरण्यं रणरणरणिरं कारणारण्यरण्या,
रण्यारण्यं रसारं सरसरसरसा रन्दरस्फारसीरम् ।
गोरं गोरङ्गिरं तां रगरगरगिरं गौरगौरङ्गिरन्तं,
रङ्गारङ्गारगारं करगिरमुरसा रङ्गिरङ्गैरगौरम् ॥ १६

सारं सारस्फुरदगीरसरपरपरं वारणैरन्तरस्या-,
रब्धारम्भारमारं करणरणरणं रङ्गिरङ्गैरगारम् ।
यो रम्भा रन्तु रम्भोरवरवरतरस्पेरणोरं धरस्या,
रक्ते रक्तोरजोरं विरतिरविरतेरङ्कुरं स्मारयारम् ॥ १७

सौरभ्यारम्भलम्भैरविरस... सौरसारङ्गरङ्गं,
रक्षो रक्षं रमारं परपरपुरतो रन्ध्रिदन्ध्रैरहारम् ।
तारं तारं तरण्डं रथिरथरतिरं स्थूरसारङ्गलष्टं,
लक्ष्यालक्ष्यैरपारं परमलयलयं लब्धलक्षैरदूरम् ॥ १८

(अचलधृति)

शरशरशरशर-सुरसरसरसर, ...खरतर-खरतर-खलखुर ।
परबल-परदर-परबलपरदर, शरभरशरभर-सरभरशभर ॥१९

परमलपरमलनरनिरपरमल-किरणरचरणरतरणिरशरणर ।
नरपुर-सुरपुर-सुरपुरजिर...-....नरविरसरविरसरविरसर ॥२०

निरकल-नरकुल-कलतरवरवर,
करणर-तरणर-विरतर-णरणर ।
गिरधर-गिरकल-गुरवुर-सिरतिर,
निरमर-निरजर-परपुर-मुरसर ॥ २१

निरघर-निरघर-थ... जलजर, चिरमर-मुरतर-दुरतर-दुरहर।
नरकर-नरकर-करनर-निरकर,
सरसर-सुरपुर-परयुर-मरसर ॥ २२

वरकरदुरमरदरलरनिरमल-शरदिरवररलकिरकरसुरविर ।
सुरनर... र हरकुरनिरचर, अररदरसरचरकुरधुरतर ॥ २३

गरधरचरकरवतरसुरवर, चरटरचरटरवरटरकरटिर ।
जरठरनरवरजरठरपरठिर, सरडरसरडरकरटरटरहर ॥ २४

प...............रसुरवरवरपर, परकरणरपरणरवरणरहर ।
निरजिरनिरजिरनिरजिरनिरजिर,
दुरशिरदुरशिरदरहरनिरसुर ॥ २५

दुरसुरनिरधरनरधरचरधर, चरदरसरदरदर... रसर ।
स्वरचलचलनरकुलसरकलकल,
भरतरभरतरवरतिलतिलकर ॥ २६

कुरकुरङ्करकीरकरं करं, दर पुरन्दरदूरदरं दरम् ।
हरविरञ्चिरमारवरं चिरं, चिरतरं चर चौरचरं वरम् ॥ २७

(द्रुतविलम्बित)

ध... धरं धरणोरधरं, विरतेरतरन्तरणीरतिरम् ।
किल कालहरं कुलकारकरं, स्मर वीरवरं शरणोरतरम् ॥ २८

(तोटक)

वरशीलवरं वरनीरवरं, सुरचीरसरं सरसीरसरम् ।
करवीरकरं करणैरकरं, स्मर व... स्मर वीरहरम् ॥ २९

(तोटक)

वीरं वरं वरतरं, वरवरवारं, धीरं धरं, धर धुरन्धरधीरधीरम् ।
सारस्वरं स्मर सरस्थिरसारसीरं,
धीरं धरं धर धरं वर वेरवेरम् ॥ (वसन्ततिलका) ३०

दरभरदरदारं दूरदारं दुरन्तं, रदिरदरद... रं भारभारम् ।
भर भरभरभारं भैरवारम्भरंहौ,
रहरहरहरं हीरं हरं हीरहीरम् ॥ (मालिनी) ३१

सुरवर-सुरवर-सुरवर-सुरव, रविरथरविरथरविरथरथर ।
करतरकरतरकरकरचरण, रविरलरविरलरविरलरवल ॥ ३२
(गुणमणिनिकर)

वीरं परं वरपरं परवारवारं, हीरं हरं हर हरं हरहार हूरम् ।
कीरं करं कर करं करकारकारं,
नीरं निरङ्कुरकरं निरगारसारम् ॥ ३३

(वसन्ततिलका)

सुरद्रुरं सुरसुरं सुरशैलसारं, सारङ्ग... रतरं हर सैरसारम् ।
सारत्वरं दरतरं गरयैरहारं, हारं हिरण्यरपुरं परमेरपारम् ॥३४

श्रीरत्नरत्नरमरं नरवारणै रं, हैरण्यरं वरकरं करमालवारम् ।
हारं सुरस्युरसिरं गरमालचालं,
व्यारं...बरकरं वर वीरवीरम् ॥ ३५

वीरं स्मरन्त्युरतरं नरनीरजोरं, पारम्परं परपरं परमोरसारम् ।
तेरन्त्यर सुरपुरं सुरसैरसालं, सारस्वरस्वरबलं सुरतैरपारम् ॥३६

कैरक्षरखरतरक्षरनीरसीर-
.....रस्थिरं स्थिमतरं सुरतैरतारम् ।

पारं दुरन्तरजलस्यरसारसारं,
श्रीलब्धरङ्गरसरं सुरसालसालम् ॥ ३७

आरम्भरङ्गरतरङ्कजोरहारं, हेरम्बरं वरतुरङ्गरसूरचारम् ।
संरम्भरम्भरसलम्भरसालवारं, सारं शरण्यरवरं सुलयोरसारम्।
शारं सुरं तुरधरं तुर... र सारं,
वीरं स्मर स्थिरकरं चरणोरचारम् ॥ षड्पदी, ३८

अत्र बन्धे ॥ १०१६ षोडशोत्तरसहस्रपत्रबन्धमिदम् ।
श्रीः ॥

पू.मु.श्री बालचन्द्रविरचितम्

## ६०. ॥ श्रीवीरजिनस्तवनम् ॥

(भुजङ्गप्रयात)

महानन्दशुद्धाश्रितं देवदेवं महीनाथसिद्धार्थपुत्रं पवित्रम् ।
यथाकामितं दत्तवार्षिक्यदानं
त्रिकालं स्तुवे श्रीजिनं वर्धमानम् ॥ १

चतुष्षष्टिदेवेन्द्रयोगीन्द्रवन्द्यं सुधाशालिसंशुद्धवाक्यं वरेण्यम् ।
दयासागरं शुद्धसन्मार्गयानं
त्रिकालं स्तुवे श्रीजिनं वर्धमानम् ॥ २

अनन्तोत्तरज्ञानचारित्रलीनं जरारोगसम्मोहसन्तापहीनम् ।
क्षणाद्धूतनिर्मूलमायावितानं
त्रिकालं स्तुवे श्रीजिनं वर्धमानम् ॥ ३

शमस्वादपाथोधिसंसर्गसक्तं सदा कर्ममर्मप्रपञ्चप्रमुक्तम् ।
प्रचण्डप्रतापेन भास्वत्समानं
त्रिकालं स्तुवे श्रीजिनं वर्धमानम् ॥ ४

मनोहारिकल्याणवर्णं विशालं विदीर्णान्तरारिप्रनालिं कृपालुम् ।
गभीरं विशालैर्गुणैर्वर्धमानं
त्रिकालं स्तुवे श्रीजिनं वर्धमानम् ॥ ५

जगज्जीवसन्दोहजीवादिभूतं भवभ्रान्तिरिक्तं नमन्नाकिभूतम् ।
लसत्स्वर्गिनिर्वाणलक्ष्मीनिदानं
त्रिकालं स्तुवे श्रीजिनं वर्धमानम् ॥ ६

इत्थं भक्तिवशेन मुग्धमतिना श्रीवर्धमानः स्तुतः
प्रोद्यद्देहपवित्रकान्तिकलितः सश्रीकशोभायुतः ।
याचे नैव कलत्रपुत्रविभवं नो कामभोगश्रियं
किन्त्वेकं परमोत्तमं शिवपदं श्रीबालचन्द्रार्चितम् ॥ ७

पू.आ.श्री सोमतिलकसूरिविरचितम्

## ६१. ॥ श्रीवीरजिनस्तोत्रम् ॥

(शार्दुलविक्रीडित)

श्रीसिद्धार्थनरेन्द्रवंशकमलाशृङ्गारहार ! प्रभो !
श्रीमद्वीर ! भवन्तमन्तरुदितप्रीत्या विमुक्त्यै स्तुवे ।
निःशेषानपि नाभिनन्दनमुखांस्तीर्थङ्करान् श्रीगुरून्
प्रत्येकं युगपत् क्रमाच्च दशभिः श्लोकैरिहान्तर्गतैः ॥ १

जिष्णोभिग्रहनम्यनर्तितभुवं धूतद्युसङ्गाचलं
नत्वा जागरितादरागमपदेऽघासङ्गभङ्गान्तके ।
श्रीजातप्रतिमल्ल ! जित्वरमहं संसारवासे ध्रुवं
नाथ ! त्वां गुरुरङ्गतः स्तुतमहः सारश्रमः स्यामलम् ॥ २

देवारब्धमसुप्तमन्मथमसुस्फारप्रपन्नापदं
वर्ष्मासंविधिमस्ततापमनसीशा संस्मरन्नुत्तपाः ।

सन्धाभूमिगते न पर्वतसमात्मा भूरिमायामहिं
वव्रेऽन्ते कृतकुग्रहस्थितिवधः सतप्तनन्द्यक्षमाम् ॥ ३

मन्माथिस्मरसुप्तिवर्धनतमः प्राभञ्जि सुष्ठूद्बलं
याता वीतभयं कतीश ! न बृहद्धावाः सुविद्य ! त्वया ।
पिष्टा जागरशोभिशिष्यसहसे हारं विधेया अरं
पृथ्व्यां तत्त्वविभक्तितः किमिव न श्रीगर्जिसज्जा मतिः ॥ ४

श्रेयोवल्ल्यवनिः समस्तसुखकृद्दुःशिष्यकल्पद्रुमं
यः कामक्षुरिकाश्च शीतललता भावं प्रयान्तीरदाः ।
सेक्ता ह्यन्तरमत्ततत्त्वविपिनं निश्रेतगर्ज्जद्रसं
भद्रं त्वं कुरु शर्मलब्धिविदित क्ष्मां यन्नजस्त्रं स नः ॥ ५

विज्ञानर्द्धिरसप्रसुस्थमसुमद्वृन्दं सनास्तानयं
मह्यां सङ्गतदानखानिरमदज्वालं स्वशंसालसम् ।
लब्ध्वा पङ्कमनङ्गवर्जि वचनं तेऽधः प्रयासं जग-
ज्ज्ञायिन् यत्स्मरतप्तिहर्म्यमगमद्धर्मज्ञशर्माञ्चितम् ॥ ६

वव्रेऽहिः श्रितशान्तिरस्तदुरितः सामस्वनं स्वर्वरं
सुप्ता तात्त्विकतेश सादरदमोद्दामास्य दध्रे क्षमा ।
धात्र्यानन्द निशान्तलक्षणमहः कः शुद्धनादा धनं
विद्यादर्पण ! तर्कयंस्तव गिरः सश्रीर्न सानन्दहृत् ॥ ७

सुष्ठ्वालम्बिविभाचयक्षतमः स ब्रह्मभर्तुर्घनं
गन्तुं मर्त्यनिवासभीतिविजयीहातन्नवाऽञ्छ्योऽस्ति मे ।
धिन्वंल्लेखहरिद्रलुम्बिनिवहः सुस्वादमध्योऽप्यहं
शीघ्रं त्वं भव भव्यकेवलवसुस्वामी तदस्ताशुभः ॥ ८

शिल्पानल्पमनःश्रमः परिवहत्श्रीमत्तनव्यान्तरिं
वाचं मारदवातिदाहविहितव्यूहाम्बुवीचीं नदीम् ।
भग्नामित्रतमेश सर्वगतमोलावीं घनध्यम्बुधिं
वन्दित्वाप्तलयः प्रनष्टकलहः स्यां रम्यहर्म्ये हिते ॥ ९

श्रीलोभद्रुमगुल्ममुद्रणभवन्तं मग्नमन्युस्मरं
सोमासत्त्वगुरुं सदा हृदि ददे सारस्पृहासक्तिमान् ।
मर्त्यो वल्गदगुप्तलब्धिमहसं साम्यप्रशस्यस्तवं
प्रस्तीर्णक्लमरुक्चयं भवभयं भित्वाऽगमद्योऽक्षरम् ॥ १०

एवं नव्यनयं विनम्रजगतं त्वामुन्नतप्रातिभं
वन्द्यं यः शतशोऽभिनौति न कृपावादान्तिमः सत्यवाक् ।
श्रीवासोऽस्ततमस्ततिः स विपुलश्रीकं सुसूत्रं हरिं
जित्वाऽमर्त्यकुलस्य नम्यमभयस्तादक्षरश्रीयुतः ॥ ११

यस्त्वां श्रीजिन ! सूदिनोन्मदमनश्चौरः प्रणौति श्रमं
जित्वा सोढगरिष्ठकष्टदहनं रोचिष्णुभालद्युतम् ।
दत्तामर्त्यपवित्रसम्मद ! पठन् कान्तं विशङ्कः स्तवं
वन्द्याऽह्वाय भवान् जिनाः प्रददतामन्येऽपि तस्मै शिवम् ॥१२

## ६२. ॥ श्रीवर्धमानजिनस्तवनम् ॥

श्रीवर्धमान ! गुणपुङ्गववर्धमान !
स्पर्धां करोषि विलसत्तरणिप्रभाभिः ।
कामं समभ्यधिक एव तव प्रतापाद्
यः स्यान्मम त्रिजगति प्रसरायमाणः ॥ (व.ति.) १

(भुजङ्गप्रयातम्)

त्वदीयं मुखं कौमुदीनाथमित्थं
प्रभो ! वक्ति शीतद्युते ! ते सदृक्षम् ।
वदन्ति प्रबुद्धास्तदेतन्मुधाहं
प्रमन्ये यतो निष्कलङ्कत्वयुक्तम् ॥ २

कलङ्कान्वयस्त्वं तु लोके प्रसिद्धो
मृगाकारधारित्वतः साधु मन्ये ।
त्वदीयक्रमद्वन्द्वमित्थं कजान्वा
वरं भाषते ते सदृक्षं मुधैतत् ॥ ३

रजोयुक्तमेवाऽहमस्मिन् रजोभि-
र्वियुक्तं सदारक्तदन्तच्छदस्ते ।
सुबन्धूकसान्ध्यारुणत्वं प्रतीति
प्रहास्यं करोति त्वदीयोऽरुणत्वात् ॥ ४

मदीयं विरक्तस्थरक्तत्वमार्यं
दरीदृश्यतेऽकृत्रिमं भक्तितस्त्वम् ।
मयेति स्तुतो वर्धमानः स सिद्ध्यै
भवेत् प्रोल्लसन्मोक्षलक्ष्म्याः प्रकामम् ॥ ५

पू.मु.श्री सूरचन्द्रविरचितः

## ६३. ॥ श्रीवर्धमानजिनस्तिवः ॥

(पञ्चवर्ग-परिहारमयः) (अनुष्टुप्)

श्रेयःशालः सहःशाली, श्रीवीरः श्रेयसां हि वः ।
वारंवारं वरं वारं, वासवावासवासरः ॥ १

सहसा सार्वसिंहावा–शिवोहवैरिवीर हे ।
वारिवाहरव वीर !, वसुसारशरीररुक् ॥ २

सुरासुरेशसंसेव्य !, शम्वरारिसहोहर ! ।
श्वोवसीयससंराशि–वर्यावास ! वशीश्वर ! ॥ ३

संसारवारिराशीरा–वरोर्वसेय संवर ! ।
श्रेयः सहस्रवर्हाली – हासश्रीवासरेश्वर ! ॥ ४

अंहोरसारुहवार्क्ष(प्लोष)(प्लक्ष) हव्यवाह वलांसल ।
वारीशसूर ! सूरीश ! सूरांशो ! सहसा सह ! ॥ ५

हारिहारहरहास–क्षीरक्षीराम्बुसद्यशः ।
शिववृक्षशिरःसार – क्षीरवाह ! व्यवायहृत् ! ॥ ६

शिवश्रीवर ! शौर्य्यर्य्य !, विश्वविश्वालसंहर ! ।
रोषव्यूहारिसंहारिन् !, शिशिरांश्वास्यसारस ! ॥ ७

एवं महावीरजिनेश ! पञ्च–वर्गाक्षरालीरहितेन सम्यक् ।
शं सूरचन्द्रेण मया स्तवेन,
देहि स्तुतो भूतलभूषण ! त्वम् ॥ (इन्द्रवज्रा) ८

## ६४. ॥ श्रीवीरजिनवराष्टकम् ॥

(उपजाति)

सिद्धार्थवंशोद्भव भूरि शोभं, तिरस्कृतं क्रोधमदातिलोभम् ।
सिंहाङ्कितं कान्ति दधच्छरीरं, भजामि वीरं भुवनैकधीरम् ॥१

मोहान्धकारै र्निविडैर्विमुक्तं, श्लाघ्यै र्यशोभि र्वरदैः संयुक्तम्।
विनाशने कर्मरजः समीरं, भजामि वीरं भुवनैकधीरम् ॥ २

महामुनिं दुःखहरं मुनीन्द्रं गाम्भीर्य-धैर्यादिगुणै गिरीन्द्रम् ।
कारुण्यवृक्षोदयभव्यकीरं, भजामि वीरं भुवनैकधीरम् ॥ ३

तपोधनैः कीर्तिगुणप्रगेयं, देहोल्लसत्सुप्रकटप्रमेयम् ।
संसारदावानलशान्तिनीरं, भजामि वीरं भुवनैकधीरम् ॥ ४

नृवन्दितं निन्दितकर्मजालं, वृन्दारकै र्रचितपुष्पमालम् ।
भवोदधे र्भक्तजनाय तीरं, भजामि वीरं भुवनैकधीरम् ॥ ५

सुरौघसंसेवितपादपद्मं, जगज्जनानां शरणैकसद्मम् ।
लक्ष्मीविलासं भुवि सिन्धुक्षीरं, भजामि वीरं भुवनैकधीरम्॥६

मनस्वीनां मङ्गलदं महेशं, जगद्गुरुं सौख्यकरं जिनेशम् ।
अघौघविध्वंसकृतं गभीरं, भजामि वीरं भुवनैकधीरम् ॥ ७

सर्वार्थसिद्धेः प्रकटप्रदेयं, सङ्घैश्चतुर्भिः सुतरां सुगेयम् ।
भवातपैस्तप्तजने सुनीरं, भजामि वीरं भुवनैकधीरम् ॥ ८

वीराष्टकं कृतं भव्यं, पीत पूर्वावरेण यत् ।
प्रातः स्तुवन् नरः श्रेष्ठ-निश्चलां सम्पदं लभेत् ॥(अनुष्टुप्) ९

## ६५.॥ श्रीवीरजिनाष्टकम् ॥

(तोटक)

त्रिशलासुतसौख्यदवीरजिनं, जनजन्मजरार्णवपारकरम् ।
करुणासमतारससिन्धुवरं, वरवीरविभुं प्रणमामि नरम् ॥ १

मघवौघविपूजितपादयुगं, कनकाचलवन्मनसा ह्यचलम् ।
चलचित्तमतङ्गजवश्यकरं, वरवीरविभुं प्रणमामि नरम् ॥ २

मृदितामकरध्वजमारगणं, गणनायकनाशितकर्मदलम् ।
दलिताऽखिलकोपकृशानुवरं, वरवीरविभुं प्रणमामि नरम् ॥३

मुदितेन्दुविभा सदृशापमलं, मलहीनसुहाटकवद् विमलम् ।
सुभगोत्तमसर्वजगन्नृवरं, वरवीरविभुं प्रणमामि नरम् ॥ ४

परितापकरोरगबोधकरं, समतासहितं ममतारहितम् ।
श्रुतिसंहतकीलककष्टसहं, वरवीरविभुं प्रणमामि नरम् ॥ ५

मुदितामृतवाण्यवशेषजनं जननीजठराजितसद्विनयम् ।
दृढकर्मविपक्षहतिप्रवरं, वरवीरविभुं प्रणमामि नरम् ॥ ६

भुवि यस्य गतं गमनागमनं मकरध्वजमारणवीरभटम् ।
सुरनाथसहाय्यमनीप्सितकं, वरवीरविभुं प्रणमाणि नरम् ॥ ७

वसुमत्यरिकर्मविनासकरं, करसङ्गतमुक्तिवधूवरणम् ।
परिपूर्णसुखात्मनिकेतनगं, वरवीरविभुं प्रणमामि नरम् ॥ ८

## ६६. ॥ श्रीवीरस्य सप्तविंशतिभवोत्कीर्तनस्तवनम् ॥

(शार्दूलविक्रीडित)

पूर्वं त्वं नयसारभूपति १ रभूः सौधर्मवृन्दारक-२
श्च्युत्वा नाम मरीचि ३ रत्र सुमनाः स्वेपञ्चमे ४ कौशिकः ।
५देवः प्राग्दिविद्द पुष्पमित्र७ इत यः सौधर्म्मकल्पे सुरो-
८ऽग्निद्योत ९स्त्रिदशो द्वितीयतविषे १०विप्रोऽग्निभूत्याह्वयः॥१

११गीर्वाणस्तु सनत्कुमारतविषे १२विप्राग्रणीर्नामतो,
भारद्वाजगृही १३चतुर्थतविषे लेखो १४द्विजःस्थावरः ।

१५नाकी पञ्चमके सुरालयवरे १६श्रीविश्वभूतिर्नृपः
१७शुक्रे निर्जरकुञ्जरो १८ऽत्र भरते विष्णुस्त्रिपृष्ठोऽभवः १९॥
सप्तम्यां भुवि नारको २०मृगपति २१स्तुर्यावनौ नारकी,
२२चक्री च प्रियमित्रकः २३सुरवरः शुक्रे २४नृपो नन्दनः २५।
श्रीपुष्पोत्तरके विमानकवरे श्रीप्राणतस्वर्गगे २६
नाकी कीर्तितसप्तविंशतिभवो भूयाः स वीरः ! श्रिये ॥(त्रि.वि.)३

## ६७. ॥ श्रीवीरजिनस्तोत्रम् ॥

(अनुष्टुप्)

त्वया जितान्यदेवर्द्धिर्वर्धमानप्रभावतः ।
त्वयि देवाधिदेवत्वं वर्द्धमान ! प्रभावतः ॥ १

जातलक्ष्मीं तमो हर्तुं, वर्द्धमान ! प्रभो ! दयाम् ।
देहिमद्य विधेहि त्वं वर्द्धमानप्रभोदयाम् ॥ २

वीरो जिनपतिः पातु, तन्वानः काञ्चनश्रियम् ।
बिभ्रन्नमेषु निस्सीमां तन्वा नः काञ्चन श्रियम् ॥ ३

वरिवस्यति यः श्रीमन्महावीरं महोदयम् ।
सोऽश्नुते जितसम्मोहमहावीरं महोदयम् ॥ ४

## ६८. ॥ श्रीमहावीरस्वामिचैत्यवन्दनम् ॥

(उपजाति)

सिद्धार्थपुत्रं त्रिशलोद्भवं च, मुक्तं जरामुत्युविभावसङ्गैः ।
सुसंयमध्यानसुरक्तचित्तं, नमाम्यहं श्रीजिनवर्धमानम् ॥ १

भावारिमातङ्गदलद्विपारिं, सुदर्शनज्ञाननिधानपुञ्जम् ।
लोकत्रयोद्भासनभास्करं च, नमाम्यहं श्रीजिनवर्धमानम् ॥ २

संसारवाराान्निधियानपात्रं, निजात्मभावालयलीनचित्तम् ।
सुदर्शनक्षायकभावयुक्तं, नमाम्यहं श्रीजिनवर्धमानम् ॥ ३

प्ररूपितो द्वन्द्वविधः सुधर्मस्त्रैलोक्यकल्याणविधायकश्च ।
सर्वप्रदेशैर्विमलात्मरूपं, नमाम्यहं श्रीजिनवर्धमानम् ॥ ४

त्वदीयभाषामृतपानयोगै-र्मयार्जितं दर्शनमत्र शुद्धम् ।
यथार्थषड्द्रव्यविकासकं च, नमाम्यहं श्रीजिनवर्धमानम् ॥ ५

तुभ्यं नमः शत्रुनिकन्दनाय, तुभ्यं नमो विश्वविभूषणाय ।
तुभ्यं नमो लौकिकरूपकाय, तुभ्यं नमो विश्वधराधिपाय ॥ ६

## ६९. ॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

(अनुष्टुप्)

ॐ अर्हं ह्रीँ महावीर ! सर्पविषं हर द्रुतम् ।
दुष्टरोगविनाशेन, रक्ष रक्ष महाविभो ! ॥ १

त्वन्नामजाङ्गुलीमन्त्र-जापेन सर्वदेहिनाम् ।
तक्षकादि-महासर्प-विषं नश्यतु तत्क्षणम् ॥ २

ग्रन्थिकज्वरनाशेऽस्तु भूतबाधां विनाशय ।
वातपित्तकफोद्भूतान्, सर्वरोगान् क्षयं कुरु, ॥ ३

जले स्थले वने युद्धे, सभायां विजयं कुरु ।
ॐ अर्हं रत्रौं(ह्रीँ?)महावीर ! वर्धमान ! नमोऽस्तु ते ॥ ४

## ७०. ॥ श्रीवर्द्धमानजिनस्तुतिः ॥

(उपजाति)

श्रीवर्द्धमानं करुणानिधानं, श्रेयोनिदानं कुगतेः पिधानम् ।
शिवैकयानं सुगुणैः प्रधानं, गताभिमानं स्तुतिसावधानम् ॥ १

(स्रग्धरा)

वीरं भावारिवीरं प्रणत भयहरं हेमरोचिःशरीरं,
धीरं कामाग्निनीरं परमपदगतं प्राप्तसंसारतीरम् ।
ज्ञातं सिद्धार्थजातं विबुधबुधनतं भूपसिद्धार्थजातं,
सिद्धं बुद्धं प्रबुद्धा नमत नमत तं सिद्धये बुद्धये च ॥ २

कुण्डे ग्रामेऽभिरामे त्रिभुवनजनता पावके पावके वा,
मोढेरे हस्तिकुण्डी प्रवरतरपुरे वायडे नाणके च ।
नन्दिग्रामे च मुण्डस्थलगजपदयोस्तुङ्गवैभारशैले,
देवं श्रीवर्द्धमानं विपुलगुणगणै र्वर्द्धमानं नतोऽस्मि ॥ ३

## ७१. ॥ श्रीमहावीरजिनसंस्तवनम् ॥

(पञ्चवर्ग-परिहारमयम्)

(उपजाति)

सुरासुरश्रीसुविशाललीलावासं शिवश्रीराविलासहारम् ।
श्रीवीरसार्वं वरवारिवाहविसारिरावं सरसं श्रयेऽहम् ॥ १

स्वैरं यशः श्रीर्विललासविश्वविश्वालये लास्यरसैरशेषैः ।
सुहारिसर्वावयवस्य यस्य, शिवाय वीरः स शिवाश्रयो वः ॥२

यः शंसया सायसुरेश्वरस्यांह्रिलीलयालं शिवशैलशीर्षम् ।
व्यलोल यः शैशववर्यवीर्यः, श्रीवीरवीरोऽसि विसंशयं सः ॥३

संसारविश्वारुहहव्यवाहं, रोषाश्रयाशस्यसुवारिवाहम् ।
सरोरुहास्यं बलिशालिबाहुं, वीरं श्रये सारशिवाशयाहम् ॥ ४

हंसस्य हासं सहसा ररौ यः स्वैर्यविहारैः सरलैः सलीलैः ।
स शर्वरीशांशुयशाः शिवाय, वरीयसे वीर ! इहाऽविलम्बम् ॥५

स एव वस्योऽवसरः शरीरिव्यूहस्य विश्वे वृषराशिशाली ।
नवस्सु यो यायिषु वीरहारि व्याहारबारेषु ययौ सहर्षम् ॥ ६

वृषं शसंसेह स संवयं यो लुलाव यः संशयवैरिवल्लिं ।
स श्रेयसे वः सरलाशयाशास्ववर्वासिशालः सुरसेव्य ईशः ॥७

वीरस्य सार्वस्य वृषं वरीयो वाहं शरीरी य इहारुरोह ।
स हिंस्रसंसाररसं विहाय सरंहसा वीर शिवाशिवोर्वी ॥ ८

# ७२. ॥ श्रीवीरजिनपञ्चकल्याणकस्तवः ॥

(विषमवृत्तम्)

विबुधपतिखगपवरपतिधनदोरगभूतयक्षपतिमहितम् ।
अतुलसुखविमलनिरुपमशिवमचलमनामयं हि सम्प्राप्तम् ॥१

कल्याणैः संस्तोष्यये पञ्चभिरनघं त्रिलोकपरमगुरुम् ।
भव्यजनतुष्टिजननैर्दुरवापैः सन्मतिं भक्त्या ॥ २

आषाढसुसितषष्ठ्यां हस्तोत्तरमध्यमाश्रिते शशिने ।
भव्यजनतुष्टिजननैर्दुरवापैः सन्मतिं भक्त्या ॥ ३

सिद्धार्थनृपतितनयो भारतवास्ये विदेहकुण्डपुरे ।
देव्यां प्रियकारिण्यां सुस्वप्नान् सम्प्रदर्श्य विभुः ॥ ४

चैत्रसितपक्षफाल्गुनि शशाङ्कयोगे दिने त्रयोदश्याम् ।
जज्ञे स्वोच्चस्थेषु ग्रहेषु सौम्येषु शुभलग्ने ॥ ५

हस्ताश्रिते शशाङ्के चैत्रज्योत्स्ने चतुर्दशीदिवसे ।
पूर्वाह्णे रत्नघटैर्विबुधेन्द्राश्चक्रुरभिषेकम् ॥ ६

भुक्त्वा कुमारकाले त्रिंशद्वर्षाण्यनन्तगुणराशिः ।
अमरोपनीतभोगान्सहसाभिनिबोधितोऽन्येद्युः ॥ ७

नानाविधरूपचितां विचित्रकूटोच्छ्रितां मणिविभूषाम् ।
चन्द्रप्रभाख्याशिबिकामारुह्य पुराद्विनिःक्रान्तः ॥ ८

मार्गशिरकृष्णदशमीहस्तोत्तरमध्यमाश्रिते सोमे ।
षष्ठेन त्वपराह्णे भक्तेन जिनः प्रवव्राज ॥ ९

ग्रामपुरखेटकर्बटमडम्बघोषाकरात्प्रविजहार ।
उग्रैस्तपोभिधानैर्द्वादशवर्षाण्यमरपूज्यः ॥ १०

ऋजुकूलायास्तीरे शालद्रुमसंश्रिते शिलापट्टे ।
अपराह्णे षष्ठेनास्थितस्य खलु जृम्भिकाग्रामे ॥ ११

वैशाखसितदशम्यां हस्तोत्तरमध्यमाश्रिते चन्द्रे ।
क्षपकश्रेण्यारूढस्योत्पन्नं केवलज्ञानम् ॥ १२

अथ भगवान् स प्रापद्दिव्यं वैभारपर्वतं रम्यम् ।
चातुर्वर्ण्यसुसङ्घः तत्राभूद् गौतमप्रभृतिः ॥ १३

छत्राशोकौ घोषं सिंहासनदुन्दुभी कुसुमवृष्टिम् ।
वरचामरभामण्डलदिव्यान्यन्यानि चावापत् ॥ १४

दशविधमनगाराणामेकादशधोत्तरं तथा धर्मम् ।
देशयमानो व्यवहरत्त्रिंशद्वर्षाण्यथ जिनेन्द्रः ॥ १५

पद्मवनदीर्घिकाकुलविविधद्रुमखण्डमण्डिते रम्ये ।
पावानगरोद्याने व्युत्सर्गेण स्थितः स मुनिः ॥ १६

कार्तिककृष्णास्यान्ते स्वातावृक्षे निहत्य कर्मरजः ।
अवशेषं सम्प्रापद्व्यजरामरमक्षयं सौख्यम् ॥ १७

परिनिर्वृतं जिनेन्द्रं ज्ञात्वा विबुधा ह्यथाशु चागम्य ।
देवतरुरक्तचन्दनकालागुरुसुरभिगोशीर्षैः ॥ १८

अग्नीन्द्रा जिनदेहं मुकुटानलसुरभिधूपवरमाल्यैः ।
अभ्यर्च्य गणधरानपि गता दिवं खं च वनभवने ॥ १९

इत्येवं भगवति वर्धमानचन्द्रे,
यः स्तोत्रं पठति सुसन्ध्योर्द्वयोर्हि ।
सोऽनन्तरपरमसुखं नृदेवलोके
भुक्त्वान्ते शिवपदमक्षरमाश्रयाति ॥ २०

## ७३. ॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

(द्रुतविलम्बित)

सकल-शक्र-समाज-सुपूजितं,
सकल-संयति-सन्तति-संस्तुतम् ।
विमल-शील-विभूषण-भूषितं,
भजत तं प्रथितं त्रिशला-सुतम् ॥ १

कलित-कानन-भञ्जन-कुञ्जरं,
शिव-सरोरुह - सञ्चयशंवरम् ।
कुगति - पङ्कजिनी - रजनीकरं,
भजत तं प्रथितं त्रिशलासुतम् ॥ २

कुमति-वादि-दिवान्ध-दिवाकरं,
कुटिल-काम-कुरङ्ग-वनेश्वरम् ।
सुखद-शान्त-सुधारस-सागरं,
भजत तं प्रथितं त्रिशला-सुतम् ॥ ३

रुचिर-राज्यसुखं भविनां कृते,
द्रुततरं परिहृत्य च येन सा ।
भगवता यतिता सुतता धृता,
भजत तं प्रथितं त्रिशला-सुतम् ॥ ४

अधम-यज्ञभवं पशु-हिंसने,
निज-सुदेशनया विनिवारितम् ।
क्षितितलेऽत्र दया सुविसारिता,
भजत तं प्रथितं त्रिशला-सुतम् ॥ ५

सरल-सत्य-पथे सुमनोहरे,
विचलिता जनता विनियोजिता ।
खल-दलं सकलं सरलीकृतं,
भजत तं प्रथितं त्रिशला-सुतम् ॥ ६

अहह ! शूद्र-जनानिह भारते,
व्यदलयन् खलु जात्यभिमानिनः ।
विघटिता कुल-जाति-मदान्धता,
भजत तं प्रथितं त्रिशला-सुतम् ॥ ७

विकच-पङ्कज-पत्र-विलोचनं,
सकल-साधक-वृन्द-विनन्दनम् ।
सघन-विघ्न-घनाघन भञ्जनं,
भजत तं प्रथितं त्रिशला-सुतम् ॥ ८

## ७४. ॥ श्रीमहावीरस्वामिगुणस्थानसूचिकाविज्ञप्तिः ॥

(उपजाति)

प्रणम्य सम्यक् चरणारविन्दं श्रीमन्महावीरजिनेश्वरस्य ।
सदाफलस्याश्रितवत्सलस्य दधामि विज्ञप्तिमहं सुभक्त्या ॥ १

(आर्या)

स्वामिन्ननादि कालेऽनादि निगोदेषु सार्धसप्तदश ।
प्राणेऽणुभवान् कुर्वन्ननादिमिथ्यात्ववानभवम् ॥ २

तत्र जननादिदुःखं यदनन्तानन्तपुद्गलावर्तान् ।
अज्ञानवशादसहं त्वमेव जानासि तन्मानम् ॥ ३

सादिनिगोदवनस्पतिकायेऽनन्तानि कालचक्राणि ।
भूजलशिखिवायुषु तु प्रत्येकं तान्यसङ्ख्यानि ॥ ४

उत्कृष्टतनुस्थित्याभ्युत्पत्तिविपत्तिशीततापभवम् ।
स्थावरकर्मविपाकादसुखमिता ज्ञानिना सेहे ॥ ५

प्रत्येकं विकलेषु च वर्षसहस्राणि सम्मितानि विभो ! ।
असहं क्षुत्तृट्शीतातपादिदुःखं महत् सोढुम् ॥ ६

पञ्चेन्द्रियेषु तिर्यक्काये सप्ताष्ट वा विकृष्टभवान् ।
भगवन्नहमन्वभवं दुःखमसङ्ख्यं पराधीनः ॥ ७

कथमपि सप्ताष्टभवान् नृत्वं सामग्र्यभावतो विगुणम् ।
काशकुसुममिव विफलं मिथ्यात्वविमोहितोऽगमयम् ॥ ८

एकद्वित्र्यादिभवान्तरेण देवेषु नारकेषु तथा ।
सुखदुःखविवशमनसा कदापि न त्वन्मतं लेभे ॥ ९

सामग्रीसंयोगे भावेन विनाप्यनन्तशो लिङ्गम् ।
जगृहे मुमुचे च मया सम्यक्त्वलवोऽपि न स्पृष्टः ॥ १०

सप्तप्रकृतिक किञ्चिन्न्यूनान्तरकोटिकोटिकस्थितिकम् ।
दलिकं मुक्त्वा शेषं यथाप्रवृत्तेन करणेन ॥ ११

क्षिप्त्वा गिरिसरिदुपल-न्यायेन गुणिम्नापूर्वकरणेन ।
शुद्धिविशेषेण कदा ग्रन्थिभिदाया विधाताहम् ॥ १२

अन्तर्मुहूर्तवेद्यं दलिकं मुक्त्वा निवृत्तिकरणेन ।
क्व दिने मोहप्रकृतेरन्तरकरणस्य कर्ताहम् ॥ १३

अन्तरकरणाभ्युदये मोहापोहेन देवगुरुत्वेन ।
नवतत्त्वेषु च बुद्धिं सम्यक्त्वमहं कदा प्राप्स्ये ॥ १४

मम यत्र मुहूर्तस्थेप्यनादिमिथ्यात्वकृष्णपाक्षिकता ।
यात्यायाति च शकलितपुद्गलशिवशुक्लपाक्षिकता ॥ १५

अमुनौपशमिकलाभेनौषधकल्पेन मदनकोद्रववत् ।
संशोध्य मोहनीयप्रकृतिं कर्ता त्रिधास्मि कदा ॥ १६

तत्रत्यवश्यो यतः कुतत्त्वधीरनुपशातिका भविनाम् ।
तदहं मिथ्यास्थानं प्रथमं क्षेप्स्ये कदा देव ! ॥ १७

अस्मिन्नुदयाभिमुखे सम्यग्वान्तौ चयः षडावलिका ।
तत्त्वावभास एतत् सास्वादनमादिदेश भवान् ॥ १८

यस्योदये जनानां तत्त्वातत्त्वेषु जायते समता ।
मिश्रं स्थानं तदहं संक्षिपयिष्यामि देव ! कदा ॥ १९

उदिते क्षिप्तेनुदिते शान्ते च विशुद्धमोहपुञ्जे मे ।
क्षायोपशमिकसम्यग् लाभो भवति कदाधीश ! ॥ २०

विजयाद्यच्युतगमने नरभवसहितानि यस्य षष्ठिः ।
इतराण्युत्कृष्टतया प्रमाणमुपजायते परमम् ॥ २१

अविरतगुणं चतुर्थं तदेव देशेन सर्वतो विरतेः ।
विरताविरतं पञ्चममदेशविरतिं स्तुवे षष्ठम् ॥ २२

प्रथमद्वितृतीयानां शान्तौ क्षान्तौ च मे कषायाणाम् ।
एतेषां निर्मलता कदा भवित्री जनाधीश ! ॥ २३

षष्ठं प्रमदवराणां प्रमत्तकं च प्रमद्वराणां तत् ।
स्यादप्रमत्तसञ्ज्ञं मुहूर्तमात्रं च सप्तमकम् ॥ २४

त्रिविधे दर्शनमोहे प्रथमचतुष्के च मे कषायाणाम् ।
क्षीणे क्षायिकलाभो भविष्यति कदा सदा भावी ॥ २५

अनुसमयसङ्ख्यगुणा कर्मक्षपणा तु भवति यत्र यतेः ।
तदपूर्वकरणमष्टमगुणं श्रयिष्यामि नाथ ! कदा ॥ २६

द्विघटीस्थितिरस्य स्यादनिवृत्याख्यं घटीद्वयं नवमम् ।
विशतांयतिनामेकाध्यवसायनिबन्धनं स्तौमि ॥ २७

सञ्ज्वलनलोभपुद्गल-किट्टीसंवेदनात्मकं दशमम् ।
तनुसम्परायसञ्ज्ञं घटिकाद्वयं कदा दास्ये ॥ २८

शान्ते समस्तमोहे घटिकाद्वयवीतरागतारूपम् ।
उपशान्तमोहमेकादशमं विरचामि जिनरचितम् ॥ २९

सकले मोहे क्षीणे द्विघटीप्रक्षीणमोहतारूपम् ।
वन्दे क्षीणविमोहं द्वादशगुणमीशते विमलम् ॥ ३०

घातिचतुष्के क्षीणे लोकालोकावलोकिकेवलतः।
वन्दे सयोगिकेवलिगुणं त्रयोदशमहं तेऽत्र ॥ ३१

योगनिरोधनरूपं पञ्चाक्षरगणनकालपरिमाणम् ।
ध्यायाम्ययोगिकेवलिगुणचतुर्दशमिनं प्रासुम् ॥ ३२

मिथ्या-सास्वाद-मिश्रा-विरति-देश-प्रमत्ता-प्रमत्तादि
द्वैतसूक्ष्मोपशमित-हतमोह-द्वयीयोग्य-योगि ।
हेयोपादेयवेदाधिक-दशगुणसोपानपङ्क्त्या
ध्यारूढे मोक्षसौधे दिशतु मम दृशं श्रीमहावीरदेवः ॥ ३३

इत्थं सर्वसुरासुरेश्वरशिरः कोटीरहीरच्छवि
क्षीरक्षालितपादपद्मयमलस्त्रैलोक्यलोकाननः ।
श्रेयः श्रेणिचतुर्दशाननुगुणस्थानस्तवेन स्तुतः
श्रीवीरः करुणाकरः सकरुणानन्दं शिवं रातु वः ॥ ३४

## ७५. ॥ श्रीमहावीरस्वामिनिर्वाणस्तुतिः ॥

सिद्धार्थभूपालकुलावतंसं गत्या समानीकृतराजहंसम् ।
विश्वत्रयी पावननाममन्त्रं स्वयं प्रबुद्धं श्रयतां स्वतन्त्रम् ॥ १

प्रोत्फुल्लपाथोजसनामनेत्रं कन्दर्पदृप्तप्रतिमल्लजैत्रम् ।
भक्ताऽर्थसङ्कल्पनकल्पवृक्षं श्रये शरण्यं शरणस्पृहालो ! ॥ २

निष्कोपनिष्कोपमकायकान्ते ! तेजःपराभूतसहस्रकान्ते ! ।
त्वं ग्राह्यनामाऽसि सदा निशान्ते नीलं मनस्ते सततं प्रशान्ते ॥३

श्रेयोलतापल्लवनाऽम्बुवाहं पवित्रयद्वागमृतप्रवाहम् ।
श्रीत्रैशलेयं प्रणयप्रकर्षा–न्नमामि काम्यार्थसुरद्रुकल्पम् ॥ ४

तीर्थाऽधिराजश्चरमः स्तुतो मया
षड्द्रव्ययाथार्थ्यनिरूपि केवलः ।
दीपालिकापर्वणि जातनिर्वृत्तिः
करोतु कल्याणशतानि सन्ततम् ॥ ५

पू.आ. श्री अभयदेवसूरिविरचितम्

## ७६. ॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

जइज्जा समणो भयवं महावीरे जिणुत्तमे ।
लोगनाथे सयंबुद्धे लोगंतिअविबोहिए ॥ १

वच्छरं दिण्णदाणोहे संपूरियजणासए ।
नाणत्तयसमाउत्ते पुत्ते सिद्धत्थराइणो ॥ २

चिच्चा रज्जं च रट्ठं च पुरं अंतेउरं तहा ।
निक्खमित्ता अगाराओ पव्वइए अणगारियं ॥ ३

परीसहाण नो भीए भेरवाण खमाखमे ।
पंचहा समिए गुत्ते बंभयारी अकिंचणे ॥ ४

निम्ममे निरहंकारे अकोहे माणवज्जिए ।
अमाए लोभनिम्मुक्के पसंते छिन्नबंधणे ॥ ५

पुक्खरं वा अलेवे अ संखो इव निरंजणे ।
जीवे वा अप्पडिग्घाए गयणं व निरासए ॥ ६

वाउव्व अपडिबद्धे कुम्मो वा गुत्तइंदिए ।
विप्पमुक्के विहंगु व्व खग्गिसिंगव्व एगगे ॥ ७

भारंडे वाऽपमत्ते य वसहे वा जायथामए ।
कुंजरो इव सोंडीरे सिंहो वा दुद्धरिस्सहे ॥ ८

सागरो इव गंभीरे चंदो वा सोमलेसए ।
सुरो वा दित्ततेयल्ले हेमं वा जायरूवहे ॥ ९

सव्वंसहे धरित्ति व्व सायरिंदु व्व सच्छहे ।
सुट्ठु हुअहुआस व्व जलमाणे य तेयसा ॥ १०

वासी चंदणकप्पे य समाणे लेट्ठुकंचणे ।
समे पूयावमाणेसु समे मुक्खे भवे तहा ॥ ११

नाणेणं दंसणेणं च चरित्तेणमणुत्तरे ।
आलएणं विहारेणं मद्दवेणऽज्जवेण य ॥ १२

लाघवेणं च खंतीए गुत्ती मुत्ती अणुत्तरे ।
संवरेण तवेणं च संजमेणमणुत्तरे ॥ १३

अणेगगुणसयाइण्णे धम्मसुक्काण झायए ।
घाइक्खएण संजाए अणंतवरकेवली ॥ १४

वीयराए य निग्गंथे सव्वन्नू सव्वदंसणे ।
देविंददाणविंदेहिं निव्वत्तियमहामहे ॥ १५

सव्वभासाणुगाए य भासाए सव्वसंसए ।
जुगवं सव्वजीवाणं छिन्निओ भिन्नगोयरे ॥ १६

हिए सुहे अ निस्सेसकारए पाव्वपाणिणं ।
महव्वयाणि पंचेव पण्णवित्ता सभावणे ॥ १७

संसारसायरे बुड्डजंतुसंताणतारए ।
जाणव्व देसियं तित्थं संपत्ते पंचमिं गइं ॥ १८

सेस व्व अयले निच्चे अरुवे अयरामरे ।
कम्मप्पवंचनिम्मुक्के जयवीरे जए जिणे ॥ १९

से जिणे वद्धमाणे अ महावीरे महायसे ।
असंखदुक्खखिण्णाणं अम्हाणं देउ निव्वुइं ॥ २०

इय परमपम्मोआ संथुओ वीरनाहो
परमपसमदाणा देउ तुल्लत्तणं मे ।
असमसुहदुहेसुं सग्गसिद्धी भवेसुं
कणयकयवरेसुं सत्तुमित्तेसु वा वि ॥ २१

पयडी वसइ पहाणं सीसेहिं जिणेसराण सुगुरुणं ।
वीरजिणथयं एवं पढउ कयं अभयसूरिहिं ॥ २२

पू.आ.श्री मुनिसुन्दरसूरिविरचितः

## ७७. ॥ श्रीवीरजिनस्तवः ॥

(गाहा)

जय सिरिजिणवर ! तिहुअणजणमणवंछिअसुहत्थकप्पतरू ।
सिरिवद्धमाणसामिअ ! होस पहू मम तुमं निच्चं ॥ १

भविआण थुणिअचलणो,सामित्तं देसि तिहुअणस्सावि ।
कप्पतरुस्स वंछिअ-दाणो एसो तुह सहावो ॥ २

सयलाओ हुंति रिद्धी, भद्दकरा गहनिमित्त-सउणसरा ।
वड्ढंति नाणदंसण-चरणा तुह पयपसाएण ॥ ३

दंसणनाणचरित्ते, दाउं जह गोयमाइगणवइणो ।
सिवसुहलच्छीसहिआ, विहिआ तुह नाह ! कुणसु ममं ॥ ४

इअ सुरनरनाहमहा-मुणिसुंदर-संथवारिहो वीरो ।
सामी कुणसु पसायं, नियपयसुहदाणओ अइरा ॥ ५

पू.आ.श्री हरिभद्रसूरिरचिता

## ७८. ॥ श्री महावीरजिनेन्द्रस्तुतिः ॥

वीरं दमिंदं जगजीवणाहं,
दित्तं सुणिच्चं सुहसंपवाहं ।
इतग्गिजालावलिवारिवाहं,
णमामि वज्जच्चिअ तित्थणाहं ॥ (उपजाति) १

संसारसायरवणे वरजाणतुल्ला,
दुट्ठट्ठकम्ममहणे किर संति मल्ला ।
देविंदपुज्जपवरा सयला जिणंदा,
मिच्छत्तधंतहरणे जगति जिणंदा ॥ (वसन्ततिलका) २

णिग्गंथाणं चरणचरणं जीवहिंसाविणासं
चित्ताणंदं जिणवरमयं तत्तबुद्धिपयासं ।
चित्तत्थं वा कुमयदलणे सत्तभंगीगभीरं,
सुत्तं वंदे मयणविरहं तस्सणाहं वि वीरं ॥ (मन्दाक्रान्ता) ३

पू. आ. श्री जिनवल्लभसूरिविरचितम्

## ७९. ॥ श्रीवीरजिनचरितम् ॥

जय भववणनिक्कंदण ! सिद्धत्थनरिंदनंदणजिणिंद ! ।
दुक्खियजणकरुणायर ! रयणायरवरगुणमुणीण ! ॥ १

विणयनयदेवदाणव–माणवपहुपयडपरममाहप्पं ।
तिजयपहुत्ते जुत्तं, इय जिणवर देव ! तुह चेव ॥ २

दसमसुरलोगओ तुम–मासाढवलक्खपक्खछट्ठीए ।
ओइण्णो तिण्णाणो, देवाणंदोदरे तत्थ ॥ ३

बासीइं दिवसे वसिय, असियअसोयतेरसिनिसाए ।
हरिणेगमेसिदेसिय, तिसलागब्भम्मि संकंते ॥ ४

ससिकरपरिपंथी तुह जसुव्व सव्वत्थ इत्थ-वित्थरओ ।
उज्जोओ तुह जम्मे, चित्ते सियतेरसिनिसद्धे ॥ ५

तो झत्ति दिसाकुमरी-छप्पण्णं सुरवई य चउसट्ठी ।
कयभुवणचमुक्कारं, करिंसु ते जम्मसक्कारं ॥ ६

तीसं वरिसे वसिउं, गुरुवरोहेण चेव गिहिवासे ।
कसिणदसमीएँ तमकासि मग्गसिरमासिपव्वज्जं ॥ ७

अहह !! सयलं न पावा, विहि तेह पण्णवणमणुमविदुरंतं ।
जं मिरिय भव तदज्जिय, दुक्कअवसेस लेसवसा ॥ ८

सुरथुइगुणो वि तित्थेसरो वि तिहुयणअरुल्लमल्लो वि ।
गोवाईहि वि बहुहा, कयत्थिओ तिजयपहुत्तंसि ॥ ९

थी-गो-बंभण-भूणंतगा वि केवि पुण दढपहाराई ।
बहुपावा वि पसिद्धा सिद्धा किर तम्मि चेव भवो ॥ १०

मासद्धसद्धबारसवरिस वसहित्तु विविहउवसग्गे ।
तं पत्तो नाणवरं, सियाय दसमीएँ वइसाहो ॥ ११

सब्भूवत्थुपयासय ! सासयविलसंतकेवलालोय ! ।
सुरनरमुणिवयवंदिय ! आणंदियभव्वजियलोय ! ॥ १२

विविह जिणाण जिणेसर, जुगवं पि वयणकिरणेहिं ।
हिययगुहागूढं पि हु, मोहतमो हंतु मं हरसि ॥ १३

जय कुनयमयपणासय ! सासणपायडियवत्थुपरमत्थ ! ।
भवअवडपडंतअणंतजंतुतुत्तारणसमत्थ ! ॥ १४

कत्तियमासअमावस-निसावसाणम्मि नागकरणम्मि ।
जिणवल्लहं सिवपयं, संपत्त पसीय तिजयनय ! ॥ १५

पू. आ. श्री जिनवल्लभसूरिविरचितम्

## ८०. ॥ श्रीमहावीरस्वामिचरितम् ॥

दुरियरयसमीरं मोहपंकोहनीरं,
पणमिय जिणवीरं निज्जियाणंगवीरं ।
भवभडपडिकूलं तस्स मुक्खाणुकूलं,
चरियमिह समूलं किंचि कित्तेमि थूलं ॥ (मालिनी) १

(गाहा)

किर गामचिंतगभवे, सम्मत्तं लहिय रहिय सोहम्मे ।
चविउं भविउं मिरिई, लइउं चइउं च चरणभरं ॥ २

उस्सुत्तलेसदेसण, कयसागरकोडकोडिभवभमणो ।
तह पढमवासुदेवो, भविय तिविट्ठू जिणुद्दिट्ठो ॥ ३

संसरिय भवे जाओ, अवरविदेहम्मि मूयनयरीए ।
धारणि-धणंजय-सुओ, पियमित्तो नाम चक्कहरो ॥ ४

तुडियंगाऊ पालिय, पव्वज्जं वासकोडिमुववन्नो ।
महसुक्के परमाऊ, सव्वट्ठे वरविमाणम्मि ॥ ५

तो जंबूदीवभरहे, भद्दाजियसत्तुरायअंगरुहो ।
छत्तग्गाराएँ पुरीए, अहेसि तं नंदणो राया ॥ ६

चउवीस वासलक्खे, वसियगिहे, सुगुरुपुट्टिलसमीवे ।
निक्खमिय वासलक्खं, खविय सया मासखमणेहिं ॥ ७

असयं सेविय वीसं, ठाणे अज्जणिय तित्थयरनामं ।
वीसयराऊ जाओ, पाणयपुप्फुत्तरे देवो ॥ ८

छम्मासवसेसाऊ, पुण्णखए मोहमिति इयरेउ ।
आसण्णपुण्णपुंजा, तित्थयरसुरा उ दिप्पंति ॥ ९

माहणकुंडग्गामे, अवयरिओ सिय असाढछट्ठीए ।
विप्पोसहदत्तगिहे, देवाणंदाइ उदरम्मि ॥ १०

अह बासीइदिणंते, चउदससुमिणेहिं इंतजंतेहिं ।
हत्थुत्तरकयकल्लाणापणगअच्छरियचरिय तओ ॥ ११

जणनायनायखत्तिय-पसिद्धसिद्धत्थपत्थिवपियाए ।
चेडगनिव भगिणीए, तिसलादेवीएँ कुच्छीए ॥ १२

सक्कभणिएण हरिणेगमेसिणा गब्भविणिमयं काउं ।
आसोयकसिणतेरसि-निसाए तं नाह ! साहरिओ ॥ १३

खत्तियकुंडग्गामे, जाओ चित्तसियतेरसिनिसद्धे ।
कासवगुत्ते कणगाभ !, कण्णरासीइ सीहंको ॥ १४

जेण-चिंतामणि तुमए, अवइण्णे रयणजणधणकणेहिं ।
वड्ढित्ता नायकुलंति वड्ढमाणुत्ति तोऽसि फुडं ॥ १५

तं जम्ममज्जणखणम्मि सक्ककुवियप्पसंकमुक्खणिउं ।
जेण महंतमवि गिरिमीरित्थ तओ महावीरो ॥ १६

पियरमरणेवि तं जिट्ठ भाऊवयणेण ठासि वासदुगं ।
गिहिवासिच्चिय निरवज्जवित्तिणा निच्छय मुणिव्व ॥ १७

सत्तकरदेह गेहम्मि अच्छिउं तीस वच्छरे कुमरो ।
लोगंतियतारविओ, संवच्छरमिच्छियं दाउं ॥ १८

सुरनरवइकयबहुविह-जलण्हवणो सुरविलेवणविलित्तो ।
रुइरालंकारधरो, चउदेवनिकायसमणुगओ ॥ १९

चंदप्पहसिवियाए, मग्गसिरे कसिणदसमिअवरण्हे ।
पढमवए पव्वइओ, छट्ठेणं नायसंडवणे ॥ २०

कुम्मारगामबाहिं, वयपढमनिसाइ एइ किर सक्को ।
वारइ गोवं वागरइ, निरुवसग्गं करे भंते ! ॥ २१

तमणिच्छिय तुह निच्छिय-मइणो विहरंत कुल्लयग्गामे ।
बहुलभवणे बीयदिणे पारणयं पायसेणासि ॥ २२

सुरकयविलेवणाइवि, साहियचउमाससमासि ते दुहयं ।
भमराइकयत्थणतरुणपत्थणत्थीजणत्थणओ ॥ २३

पडिकूलसूलपाणिं, चंडक्कियचंडकोसियमहिं च ।
अगणिय नियतणुपीडं, पडिबोहियवं तुमं भयवं ! ॥ २४

एगरयणीइ वीसं, छहिं मासेहिं विविहउवसग्गे ।
तुह करिय हरियसुरसग्ग-संगमो संगमो जाओ ॥ २५

कण्णेसु कडसलागा-पवेसगे अभिनिवेसगे गोवे ।
खरगे य तदुद्धरगे, तुह तुल्ला चेव मणवित्ती ॥ २६

छचउतिदुगेगमासे एगनव दुछक्कबारस अकासी ।
अड्ड दिवड्ड ड्डाइय-मासे बावत्तरी दो दो ॥ २७

दु-चउ-दसदिणा पडिमा, भद्द-महाभद्द-सव्वओभद्दा ।
कासि अच्छिण्णा तह, बारसेगराई तिदेवसिया ॥ २८

पंचदिणूणछमासिय-खमणं कोसंबिए तुममकासि ।
दुण्णि सए गुणतीसे, अकासि तं छट्ठखमणाणं ॥ २९

दिवसूणद्धुट्ठसया, पारणया पढमवयदिणं चेगं ।
इय तेरसपक्खाहिय, बारसवरिसावसाणे ते ॥ ३०

जंभियबहि उजुवालिय, तीसविसाहसियदसमिपहरतिगे ।
छट्ठेणुक्कडुयट्ठियस्स, केवलं आसि सालतले ॥ ३१

सुरकयओसरणे ठाउमीसि कप्पुत्तिकाउ धम्मकहं ।
धुवमच्छरियं जाणिय, वरचरणअभव्वियं परिसं ॥ ३२

बहु तियसकोडिसहिओ, निसि बारसजोयणेहिं पावपुरिं ।
गंतुं महसेणवणे, चउविहतित्थं पयट्टित्था ॥ ३३

साहुसहस्सा चउदस, छत्तीसं साहुणी सहस्साणि ।
सेगूणट्ठिसहस्सं, लक्खं सड्ढा, दुगुण सड्ढी ॥ ३४

चउदसपुव्वी वाई, मणपज्जविणो य तिचउपंचसया ।
सत्तसया केवलिणो, विउव्विणो तत्तिया तुज्झ ॥ ३५

पंचजमधम्मदेसग, इक्कारस गणहरा नव गणा ते ।
तेरस ओहिजिणसया, अट्ठसयाणुत्तरगईणं ॥ ३६

पंचंतरायहासाइ–छक्कमिच्छत्तमविरइमनाणं ।
अट्ठारस दोसा रागदोस निद्दा य मयणो य ॥ ३७

इय नट्ठट्ठारसदोसदाह चउतीस अइसयसणाह ।
पणतीसबुद्धवयणाइसेस अच्छाह जयनाह ! ॥ ३८

नत्थि भवियव्वनासो, जं गोसालो तुमंपि तिजयपहुं ।
अक्कोसीय हहा !! तुह, पुरो महेसी दहेसी य ॥ ३९

जत्थ निवसंति संतो, खणंपि तं किर कुणंति सुकयत्थं ।
इय नूणमुसभदत्तं, देवाणंदं च नेसि सिवं ॥ ४०

सेणियनिव-सिद्धाइयदेवी-मायंगजक्खकयसेव ! ।
नवतत्तसत्तभंगिं, पयडसि देसूण तीस समा ॥ ४१

मज्झिमपावाए हत्थिवालभूवालसुंकसालाए ।
पज्जंकठिओ पासाओ, वासदुसय गए सड्ढे ॥ ४२

कत्तियअमावसाए, गोसे छट्ठेण साइनक्खत्ते ।
एगुच्चिय बावत्तरि-वरिसाऊ तं सिवं पत्तो ॥ ४३

एवं वीरजिणे दिणेसर ! तुमं मोहंधविद्धंसणं,
भव्वम्भोरुहबोहसोहजणयं दोसायरुच्छेयणं ।
थोउं जं कुसलाणुबंधि कुसलं पत्तोऽम्हि किंची तओ,
जाइज्जा जिणवल्लहो मह सया पायप्पणामो तुह ॥(शा.वि.)४४

पू.आ.श्री जिनवल्लभसूरिविरचिता

## ८१. ॥ श्रीमहावीरस्वामि-विज्ञप्तिका ॥

सुरनरवइकयवंदण !, भवदुहसंतत्तचंदण ! जिणिंद ! ।
वीर ! तुह चलणजुयलं, थुणामि भत्तीइ भावेण ॥ १

हीणमईवि पवत्तो, नाह ! अहं गुणसमुद्द ! तं थोउं ।
जो कोइ थुणइ रंको, राइं ता किं न पावेइ ॥ २

तइं नाहे गुणनिलए, अमंदआणंदपरमपयपत्ती ।
भरहे पंचमकाले, कम्मवसा अम्ह उप्पत्ती ॥ ३

कहमवि बहुसुकएणं, पत्ता तुह नाह ! धम्मसामग्गी ।
मुणिधम्मो गिहिधम्मो, सुणिउं संविग्गपक्खो वि ॥ ४

धण्णा ते मुणिवसहा, पव्वज्जं जे धरंति निरवज्जं ।
अम्हाण नत्थि सत्ती, मुणिधम्मं जेण पालेमो ॥ ५

वित्ती न होइ सुद्धा, गिहिधम्मं कह करेमि जिणनाह ! ।
सड्ढाणं पढमगुणे, अक्खुद्दो जेण भणियं च ॥ ६

सामि ! तुमं चिय देवो, गुरुणो जे तुज्झ सुद्धमग्गम्मि ।
धम्मो तुह पण्णत्तो, होउ थिरो तुह पसाएणं ॥ ७

कुसुराणं परिहारो, कुगुरूणं सव्वहा तहा मज्झ ।
मण-वाया-काएणं, कुधम्मीणं च परिहारो ॥ ८

अण्णं न सरामि मणे, अण्णं वायाइ नेय भासेमो ।
अण्णं न हु काएणं, पूएमि विणा तुमं नाह ! ॥ ९

तुह पयभत्तीएँ जसो, तुह पयभत्तीए रिद्धिवित्थारं ।
तुह पयभत्तीएँ विणा, न हु लब्भइ किंपि रमणिज्जं ॥ १०

जं लब्भइ इंदत्तं, जं लब्भइ इत्थ चक्कवट्टित्तं ।
जं लब्भइ सिवसुक्खं, तं तुह भत्तीय माहप्पं ॥ ११

तुह आणारत्तेणं, सिरिजिणवल्लहमुणिंददत्तेणं ।
विण्णत्तो य महायस !, वंछियफलदायगो होही ॥ १२

पू.आ.श्री धर्मघोषसूरिविरचितम्

## ८२. ॥ श्रीवीरजिन२७भवस्तोत्रम् ॥

तिसल्लासिद्धत्थसुअं सीहंकं सत्तहत्थ कणयनिहं ।
भवसत्तावीसकहणेणं वद्धमाणं थुणामि जिणं ॥ १

नयसारो सुग्गामे पढमे बीए भवे पहु ! सुहम्मे ।
तइए मरिइ तिदंडी विणिआइ चउत्थए बंभे ॥ २

कुल्लागि कोसिअदिओ पंचमि संसारचउर छट्ठभवे ।
थूणाइ पूसमित्तो सत्तमि सोहम्मि अट्ठमए ॥ ३

नवमे अग्गिज्जोओ चेइअगामम्मि दसमि ईसाणे ।
इगदसमि अग्गिभूई मंदिरि बारसमि सणकुमरो ॥ ४

तेरसमे सेअबिआ भारद्दाओ महिंद चउदसमे ।
रायगिहि थावरदिओ पनरसमे सोलसे बंभे ॥ ५

रायगिहि विस्सभूई सत्तरसि अट्ठारसे महासुक्को ।
गुणवीसे पोअणपुरि तिविट्ठु वीसे तमतमाए ॥ ६

पहु ! इगवीसे सीहो पंकाइ दुवीसमम्मि तेवीसे ।
मूआपुरि पिअमित्तो चक्की सोहम्मि चउवीसे ॥ ७

पणवीसे छत्तग्गाइ नंदणो पाणयम्मि छव्वीसे ।
खत्तिअकुंडग्गामे सत्तावीसे महावीरो ॥ ८

मगसिरवइदसंमि वयं कत्तिअमावसि सिवं सिआसाढे ।
छट्ठि चुइ विसाहदसमी नाणु भवो चित्ततेरसिए ॥ ९

इअ सिरिवीरजिणिंदो थुणिओ भत्तिब्भरनमिरदेविंदो ।
वरधम्मकित्तिविद्धिं विज्जाणं देउ मह सिद्धिं ॥ १०

पू.आ.श्री गुणचन्द्रसूरिविरचित-
श्रीमहावीरचरियग्रन्थप्रारम्भे

## ८३. ॥ श्रीमहावीरस्वामिस्तुतिः ॥

(आर्या)

पयडियसमत्थपरमत्थवित्थरं भव्वचक्ककयसोक्खं ।
विप्फुरइ जस्स रविमंडलं व नाणं निहयदोसं ॥ १

जस्स य सोहइ पणमंतसक्कसंकंतनयणकमलवणं ।
कमविमलसरं तललीणमीणमयरं नहंसुजलं ॥ २

संगमयपणइणीहिं कडक्खविक्खेवखोभदक्खाहिं ।
जस्स मणागंपि मणो न चालियं नियपइण्णाओ ॥ ३

नरतिरियदेवविहिओवसग्गरिउवग्गविजयजायजसो ।
ओहामियऽण्णवीरो सो जयइ जिणो महावीरो ॥ (च.क.) ४

पू.आ. श्री पादलिप्तसूरिविरचितः
स्वर्णसिद्धिगर्भितः

## ८४. ॥ श्रीमहावीरजिनस्तवः ॥

जयई नवनलिणकुवलय-वियसियसयवत्तपत्तलदलच्छो ।
वीरो गइंदमयगल-सुललिअगइ विक्कमो भयवं ॥ १

अज्जवि वहई सुतीत्थं,
अखंडियं जस्स भरहवासंमि ।
सो वद्धमाणसामी, तेलुक्कदिवायरो जयउ ॥ २

गाहाजुअलेण जिणं, मयमोहविवज्जियं जियकसायं ।
थोसामि तिसंझागं, तं निस्संगं महावीरं ॥ ३

सुकुमालधीरसोमा, रत्तकिसन्नपंडुरा सिरिनिकेया ।
सीयंकुसगहभीरू, जलथलनहमंडणा तिन्नि ॥ ४

न चयंति वीर ! लीलां, हाउं जे सुरहिमत्तपडिपुण्णा ।
पंकयगइंदचंदा, लोयणचक्कमियमुहाणं ॥ (युग्मम्) ५

एवं वीरजिणिंदो, अच्छरगणसंघसंथुओ भयवं ।
पालित्तयमयमहिओ, दिसउ खयं सव्वदुरियाणं ॥ ६

सिरिजसोभद्दसूरिविरयियं

## ८५. ॥ सिरिवीरजिणथोत्तं ॥

तिहुयणसिरिकुलनिलयं पयासियासेसवत्थुपरमत्थं ।
सिरिसमवसरणं कित्तूण विहिणा थोसामि वीरजिणं ॥ १

वाउ मेहा कमसो जोयणभू-सोहि सुरहिजलवुट्ठिं ।
मणिरयणमयं भूमिं कुणंति पणकुसुमवुट्ठि वणा ॥ २

पायारतियं कमसो कुणंति वररुप्प-कणय-रयणमयं ।
कंचण-वसु-मणिकविसीसा-सोहियं भुवण-जोइ - सुरा ॥३

गाऊयमेगं छस्सय धणुह परिच्छ(च्छि)न्नमंतरं तेसिं ।
अट्ठंगुलिक्करयणी तित्तीसं धणुहबाहल्लं ॥ ४

पंचसयधणुच्चत्तं चउदार-विराइयाण वप्पाणं ।
सव्वप्पमाणमेयं नियनिय-हत्थे ण य जिणाणं ॥ ५

सोवाण दससहस्स भूमीओ गंतु पढम पायारे ।
पन्नासधणुहपयरो पुणो वि सोवाण पण सहस्सा ॥ ६

तत्थ वि य बीयवप्पो पुव्वत्तिविहियतयंतरे नेयं(ओ) ।
तत्तो तइए एवं वीस सहस्साण सोवाणा ॥ ७

दस-पंच-पंचसहसा सव्वे हत्थुच्च-हत्थविच्छिन्ना ।
बाहिर-मज्झऽब्भितर-वप्पाण कमेण सोवाणा ॥ ८

तं मज्झे मणिपीढं भूमीओ सड्ढकोसदुन्नि कोसुच्चं ।
दो धणुसयविच्छिन्नं चउदारं जिणतणुसमुच्चं ॥ ९

सीहासणाइचउरो मणिपडिच्छन्नाइ तेसि चउरूवो ।
पुव्वमुहो ठाइ सयं छत्तत्तयभूसिओ भयवं ॥ १०

इगवीसधणुं असोगो इक्कारसधणुह तदुवरिं सालो ।
पडिबिंबत्तयपमुहं किच्चं ति कुणंति वितरिया ॥ ११

परिसा अग्गेयाइसु मुणिवर वेमाणिणीय-समणीया ।
भुवण-वण-जोइ देवी देवो वेमाणिय-नरत्थी ॥ १२

जोयणसहस्सदंडो धम्मज्झय-कुडभि-केउसंकिन्नो ।
दो जक्ख चामरधराजिणपुरओ धम्मचक्कं तु ॥ १३

ऊसियधयमणितोरण-अडमंगलपुन्नकलसदामाइं ।
पंचाली छत्ताली पइदारं धूवघडियाइं ॥ १४

हेम-सिय-रत्त-सामलवन्ना-ऽमरद(व)णय-जोइस-भवणाई ।
पइदारं वसु(चउ)वप्पे पुव्वाइसु ठंति पडिहारा ॥ १५

जय-विजयाऽजिय - अवराजिय गोरा-रत्त कणय-नीलाभा ।
देवी पुव्वकमेणं सत्थधरा ठंति कणयमए ॥ १६

जडमउडमंडिय तहा तुंबरखट्टंग परिस सिरिमाली ।
बहिवप्पदारदेसे पासेसु य ठंति पडिहारा ॥ १७

बहिवप्पे जाणाई बीए सत्तू वि मित्तभावगया ।
तिरिया मणिमयछंदो ईसाणे रयणवप्पबहिं ॥ १८

बहिवप्पदारदेसे दो दो वावीय हुंति वट्टम्मि ।
चउरंससमोसरणे इण इग वावी य कूणेसु ॥ १९

जच्छेइ सुरमहिड्डी पुव्वमजायं तं जच्छ (त्थ) ओसरणं ।
तत्थ हवइ अरिहाणं सययं पुणपाडिहेराइं ॥ २०

लेसेण समवसरणस्स सरूवकहणेण संथुओ वीरो ।
तिहुयणविप्फुरिय जसो-भद्दपयं दिसउ पणयाणं ॥ २१

॥ इति श्रीसमवसरणस्तोत्रम् ॥

पू.आ. श्री उदयसिंहसूरिविरचिता
श्रीधर्मविधिप्रकरणटीका-अन्तर्गत-
पञ्चवर्गरहित-

## ८६. ॥ श्रीमहावीरस्वामिस्तुतिः ॥

साहियसुहोवएसो, असेसलोइयसुरेसु सविसेसो ।
ससहरसीयललेसो, वीरो असुहं हरउ एसो ॥ १

असरिसविवेयसस्सो, वयओसहिविहियसिववहूवस्सो ।
उवइसियसुयरहस्सो, विलसिरअइसयसयसहस्सो ॥ २

विहियाहियसंहारो, लीलासोसियअसारसंसारो ।
हयविसयविसवियारो, सेवयसयसूयसहयारो ॥ ३

अवहीरियवरोहो असरिसवररूवउल्लसियसोहो ।
वियलियसव्वविरोहो, विलासविहवाइसु अलोहो ॥ ४

असिवरुरुसिंहसावो, लोयालोयावालोइयसहावो ।
अलवियअलियालावो, हारियरोसाइ-उवयावो ॥ ५

अवहयरइवइवीरो, ससुरासुरवार-सेविय-सरीरो ।
संसयवसुहासीरो सुहहेऊ होउ सिरिवीरो ॥ ६

पू. श्रीसमयसुन्दरोपाध्यायविरचितम्
अल्पबहुत्वविचारगर्भितम्

## ८७. ॥ श्रीमहावीरस्वामिस्तवनम् ॥

जेण परूवियमेयं दिसाणुवाएण अप्पबहुठाणं ।
जीवाण बायराण य थुणामि तं वद्धमाणजिणं ॥ १

सामन्नेणं जीवा आउ-वण-विगल-तिरियपंचिंदी ।
पच्छिम-थोवा-अहिया पुव्वदिसिं दाहिणुत्तरयो ॥ २

मणुया सिद्धा तेऊ सव्वत्थोवा य दाहिणुत्तरयो ।
पुव्विं संखा पच्छिम अहिया कहिया तुमे नाह ! ॥ ३

वाऊ थोवा पुव्विं तत्तो अहिया य पच्छिमुत्तरयो ।
दाहिण ११ नारय थोवा पुव्वुत्तरपच्छिमासु समा ॥ ४

दाहिण असंख १२ पुढवी दाहिण थोवा कमेण अहियाओ ।
उत्तरपुव्वावरदिसि तुज्झ नमो जेण निद्दिट्ठा १३ ॥ ५

भवणवइ पुव्वपच्छिम थोवा तुल्ला य उत्तर असंखा ।
दाहिण तओ असंखा १४ विंतर थोवा य पुव्वदिसिं ॥ ६

पच्छिम उत्तर दाहिण अहिया १५ थोवा य जोइसा तुल्ला ।
पुव्वावरदिसि दाहिण उत्तर अहिया कमा भणिया १६ ॥ ७

पढमचउकप्पदेवा सव्वत्थोवा य पुव्वपच्छिमओ ।
उत्तरअसंख दाहिण अहिया तुह मयविऊ बिंति ॥ ८

बंभाइकप्पचउगे पुव्वुत्तरपच्छिमासु थोवसमा ।
दाहिण संखा तत्तो उवरिमदेवा य सम सव्वे १७ ॥ ९

थोवा पुग्गल उड्ढं अहिय अहे तह असंख तुल्ला य ।
उत्तरपुरत्थिमेणं दाहिणपच्चत्थिमेण तओ ॥ १०

दाहिणपुरत्थिमेणं उत्तरपच्चत्थिमेण अहिय समा ।
पुव्विं असंख अहिया पच्छिम तह दाहिणुत्तरयो ॥ ११

अप्पबहुत्तसरूवं इय दिट्ठं केवलेण नाह ! तुमं ।
अह तह कुणसु पसायं अहमवि पासेमि जह सक्खं ॥ १२

इय चउदिसासु भमिओ तुह आणा वज्जिओ य वीर ! अहं ।
गणिसमयसुंदरेहिं थुणिओ संपइ सिवं देसु ॥ १३

पण्डितराज पू.पं.श्रीधर्मशेखरगणिविरचितम्

## ८८. ॥ चतुर्मुखश्रीमहावीरस्वामिस्तवनम् ॥

सिरिमंदिरसुंदरकायजाय, मयसंनय संनयरायजाय ।
भयभंजण भवदवनीरवाह, जय चउमुहगुरुमहावीरनाह ॥ १

तुह सेवगु मुहजियसोम सोम, हुइ कोमल कोमलरोमतोम ।
दुहनासण सासणतायसाय, सिरिभायणु गय गयमायताय ॥२

जय सज्जणरंजण कोहलोह-दुहवज्जिय निज्जियमोहजोह ।
सिवकामिणिकंठसुहारसार, कलकंचणरुइतणु तार तार ॥ ३

चिरमावयमहियलसीर धीर, जणलंभिय भवनववी(ती)र वीर।
विभासुर-भासुर-चंद-वंद, नर-किन्नर-निज्जर-वंद नंद ॥४

मुणिपं(पुं)गव कयगुरुतोस पोस-
मणवंछियमुज्झियरोसदोस ।
मह पूरय चूरय लक्ख लक्ख,
छहजीवह निम्मियसुख(क्ख)-दुख(सुक्ख ?) ॥ ५

जय जिणवर जियरइकंत कंत, गुणसंमणिरोहण संत दंत ।
जमसंजमतमदुमनाग नाग, सुहसंपयपय हयरागनाग ॥ ६

कर(रु) मह लहु मद्दियकम्ममम्म,
सिववासय सासयरम्मसम्म ।
भवतारग पारग रोगसोग-हर छिंडियनेहललोगभोग ॥ ७

सम्मंडिय खंडियसाम काम-परिहरिय मणोहरधामराम ।
जय संजय नय गयतावराव,
जियघणवण(वणघण?)सम समपावदाव ॥ ८

जगभूसण दूसणरित्ततत्त, मयसंमयमय नयसत्तपत्त ।
दिससंमय संमयसित्त मित्त-सम माणसवरतरगुत्त गुत्त ॥ ९

गुरुतमतम महमहिपालजाल, जइवंदिय हयदुहवालमाल ।
हर भीसणभवभयभंगरंग, कलकेवलकमलासंग चंग ॥ १०

इय चउम(मु)हवीरं सुरगिरिधीरं थुणइ जु पइदिण भत्तिनरु ।
सो जणमणरंजण दुहतरुभंजण भासुरसुंदर होइ सुर ॥ ११

महोपाध्याय-श्रीमद् धर्मसागरगणिप्रवरप्रणीतम्

# ८९. ॥ सिरिमहावीर-जिणथोत्तं ॥

(तोटक)

पणमित्तु पवित्तजिणक्कमणं, पणुवामि वमाविअपावसमं ।
सुगवव्वयणाणुमयं न उणं, परमत्थविऊकविवन्निउणं ॥ १

जिणवीरपयंबुअजामलयं, लयवल्लिजलं जलहंकयलं ।
जलरूद्दलकोमलमुम्मलहं, नमहंबरदीवपयावलहं ॥ २

मुणिणायगवायगविंदथुअं, थुइसत्थमुहेण सुहेण सुहं ।
णमहंतरभावपहावभरं-भरया सुरया सिरिवीरपयं ॥ ३

दुहदोहमणोहवरोहकरं, करुणारसभासुरमासुरमं ।
रमणीरयणीरयमारणयं, णयणाइवयं सुणयंजणयं ॥ ४

जणरंजणदेसणदाणवरं, णवरंगसुरंगणगीअगुणं ।
सुगुणंकिअकायकलं कमलं, कमलालयलीलबलागचलं ॥ ५

जयईअल-निम्मलसीलजसं, रसिआमररंजणवाणिरसं ।
जयमासमयासमजम्मवरं, सिरिवीरजिणं जिअपंचसरं ॥ ६

अचलंतरझाणयणाणधरं, मधुरंरणमंगणसंगहरं ।
वररम्ममह वरथुत्तपहं, सुपहं पणए विणएणऽनहं ॥ (च.क.)७

महिआमहिआऽदर बादरया-मदहेउसुहेउपओगजुआ ।
जगमालयसालजमालभिआ, विभया वरवम्मसमा समिणा ॥८

दिवसाहिवईजसनासयरा, सुहमाइपयत्थपयासयरा ।
सवणंजलिपाणसुहाऽणसुहा, विबुहावलिकाबलिकाऽनलिका९

कलिकालवलग्गिजलुग्गमिया, विमलक्खरमक्खरिआखलिआ।
खलमालगलागलगुम्मलया, समिला समिलालनबालकला ॥१०

मुणिमाणणमंडणमाणगमा, गदिदा जिण ! जेण तुहेण गिरा ।
स तुहं महु मोहतमोहरणं
जणइज्ज समज्जिअ-पुण्णमिणं ॥ (च.क.) ११

भुवि भावुकलावुकलंकदलं, दलितालिअनीलकलाकलिलं ।
सयलं सरइं दुलसंदुमुहं, दुहदुद्दुहइं नइवेगजलं ॥ १२

जलहि व्व गहीरमहीरचयं, कणगाचलनिच्चलचित्तचिअं ।
वरकेसरिदुद्धरिसं हरिसं, हरिसंचिअसच्चिअसच्चरणं ॥ १३

रणरञ्जिअनिज्जरमज्जवअं, जुइनिज्जिअदुज्जयवज्जवयं ।
मुणिमाणसमंबुरुहालिमलं, धवलंबुरमंबुअलीलधरं ॥ १४

धरणीधवसेविअपायजुगं, जगवल्लहमुल्लहवल्लवणं ।
पवणंजणपावरए रयणं, भुवणंगधरेसुमरोसवणं ॥ १५

धणिअं धवलीकयवीसदिसं, सजसाऽमररस्सरसेणमिसं ।
सुविसंजणसंशयकासनलं,
समुवेमि तुमंम्मि जिणं शरणं ॥ (प.कु.)१६

पुरिसुत्तममुत्तमसंतमसं, समसंततिमंतमतीतमदं ।
मदनातिगनायगमायधरं, घरवासमुदारमदारमहं ॥ १७

वरकिंकरभावगयामरवं, रविरायतिरक्किअकज्जरवं ।
मतमुत्तिवहूबहुमानपइं,
कवयामि कवीकविअं भविअं ॥ (यु.) १८

भविअंतररायतमोतरणी, परउक्करपुक्करसीहरणी ।
मरणीइपराकरणी रमणी-मणरीणमुणीजणउद्धरणी ॥ १९

धरणीअलनिम्मलकित्तिभरोऽभयदाणवरो वरवीरजिणो ।
कुण उत्तममुत्तिरमारमणं, ममणंतविऊ करुणासरणं ॥ २०

सरणादवि दूरिअसम्मसमा, परमोपरमोऽहमकामरमा ।
गरिमानवमानवहीजलही,
ववही पणिहीमहणाइमही ॥ (त्रिभि.) २१

कदलीदलकोमलकायलया, सुरसुंदरिरूववई महिला ।
न मणा मणखुब्भणसुप्पयणा,
जमुविच्च खमाऽखिलुवायमुणा ॥ २२

तमहंपि महामि महीणमहं, कलहानलजालजमालसहं ।
मयणप्पफुरंत फणाहिसिहं-हसपाणपरानलजालणहं ॥ २३

सुरपायवदाउवपायरयं, परमाणहमाणहमाणपयं ।
भवकूवरडंतपडंतजणं पडि रज्जुपहज्जुतिजालधणं ॥ २४

धणदप्पहयीकयकंचणुह-पमुह(भिइ)स्सपहायचयज्जसुहं ।
सुररायसिरोवरिचूण्णुवम-क्कमतामरसप्पसरंतरयं॥ (च.क.) २५

अमरुस्सिअछत्ततिछायकला-कलिताऽमरचामरसज्जमला ।
पभुआ पविभाइ जिणस्सयला,
पुहवीअलिमालिमलाविमला ॥ २६

परिसा हरिसाउलिआमलयाऽऽ-वलिआमिलिआविरलासरला।
कमलाविमलालयमालमला,
तिसलापसवस्स विभायचला ॥ २७

तिजयस्सरणं विह वप्पतिगं, तव भादि विभाभिदमब्भुदयं ।
मणिकंचणरायय़राजिमयं, परभत्तिभरामरनिम्मविअं ॥ २८

एवं थुओ जिणवरो वरवीरवीरो,
वीराभिहो सुहमुहो सुहवल्लिनीरो ।
सम्मंकुरो सिवपुरीपयदं अमुद्दं,
सद्धम्मसायरजसो दिसऊ सुभद्दं ॥ (वसन्ततिलका) २९

पू.मु.श्री धनेश्वरविजयकृतः
सुरसुन्दरीचरिअ-ग्रन्थप्रारम्भे

## १०. ॥ श्रीमहावीरस्वामिस्तवः ॥

(आर्या)

जम्मणसमयाणंतरसुमेरुसिहराभिसेयसमयम्मि ।
सक्कंदणकयकुवियप्पनासणे कयपयत्तस्स ॥ १

रागाइवइरिसेणव्व जस्स दट्ठुं अणन्नसामत्थं ।
थरहरिया अच्चत्थं ससिलोच्चयसायरा वसुहा ॥ २

निम्मलकमनहनियरो पडिबिंबियपणयतिहुअणो जस्स ।
उव्वहइ जायगव्वो केवलनाणस्स समसीसिं ॥ ३

जस्स य पणाममेत्ता निम्मलकमणक्खपडियपडिबिम्बा ।
एक्कारसगुणमुवलब्भ अप्पयं हरिसिया तियसा ॥ ४

तं वंदे जिणयंदं देविंदनरिंदविंदवंदिययं ।
सिद्धत्थनरिंदसुअं चरिमं चरिमं गइं पत्तं ॥ (पं.कु.) ५

महाकविश्रीधनपालविरचिता

# ११. ॥ श्रीवीरजिनस्तुतिः ॥

(आर्या)

निम्मलनहे वि अणहे जिणाण चलणुप्पले पणमिऊणं ।
वीरमविरुद्धवयणं थुणामि सविरुद्धवयणमहं ॥ १

खविअकसायचउक्को वि नोकसायक्खयं कह करेसि ? ।
कह नट्ठनामगुत्तो जयगुरु ! जयपायडो होसि ॥ २

कह नायकुलुप्पन्नो वि नाह ! सुरसं पयं न पत्थेसि ? ।
उव्वहसि मोहनिद्दारओ वि कह सासयं बोहं ? ॥ ३

अरिहसि न मुत्तिअग्घं कह तं गयरायमत्थयमणी वि ? ।
कह पहु ! पहूअरयणासओ वि रयणत्तयं वहसि ? ॥ ४

कह गयकलहो वि भवोअहिम्मि पोओसि समणसीहाणं ? ।
एणारी वि महायस ! कह देसि सुहं सुहत्थीणं ? ॥ ५

परिणयवयं जरावज्जियं पि संतावयं पि नयणसुहं ।
कह सत्तहत्थमाणं पि वहसि नवहत्थमप्पाणं ? ॥ ६

गयगारवं पि गुरुअं नयणाण महूसवं पि सिसिरमहं ।
तं बिंति खीणमोहं पि कह णु पढमं गुणट्ठाणं ? ॥ ७

वरधम्मधरो वि अमग्गणासणो गुणनिही वि गयगव्वो ।
कह निक्कारणमित्तो वि होसि भुवणस्स अवयंसो ? ॥ ८

पावकसणं पि चित्तं सारं पि धरेसि कह जसं सेअं ? ।
जिण ! सिअवायक्खायं पि सव्वहा सामलच्छायं ॥ ९

कयकिच्चं पि अकिच्चं रयतममुक्कं पि न रयतममुक्कं ।
थिरपसमं पि जणं कह अप्पसमं कुणसि कयसेवं ? ॥ १०

संतमसंतं न करेसि निप्फलं न य विहेसि सलहंतं ।
निच्चं सकज्जलग्गो न होसि कह तं जगपईवो ? ॥ ११

केवलनाणुव्वहणो वि दुव्वहं कह चरित्तमुव्वहसि ? ।
सच्चारित्तो वि कहं निच्चारित्ते गुणे धरसि ? ॥ १२

कह तं समारुहंतो सोहम्मसणंकुमारभावम्मि ।
ईसाणलंतआरणअच्चुअसीलो जए होसि ? ॥ १३

निव्वाणगओ वि जगप्पईव ! भुवणाइं कह पयासेसि ? ।
सयलभुवणप्पयासो वि अप्पयासो कहं होसि ? ॥ १४

सासायणाण जंतूणं सामि ! दिंतो अणंतसंसारं ।
आसाइअधम्माणं अइरा कह देसि सिद्धिसुहं ? ॥ १५

समणाण बीअभूओ वि सत्तमो संजयाण कह णु तुमं ? ।
कह नाह ! सत्तजिट्ठो वि नट्ठमो होसि भुवणम्मि ? ॥ १६

कह पयडियवीसासं पि वहसि रूवं पयासिअदसासं ।
जिण ! नयणामयभूअं पि कारणं दंसणवरस्स ? ॥ १७

अविरामं पि जइमयं अवरिट्ठं तिहुअणस्स वि वरिट्ठं ।
कह निच्छिअं पि मुणिवइ ! अणिच्छिअं देसि सुहनिवहं ॥१८

सामपउत्तिपसत्तो कहं सि वेअत्तईक्कसत्तू वि ।
कह णु विसंको वि पयावइ त्ति पयडं वहसि सद्दं ? ॥ १९

कह मंसलुद्धरयणिअरपरिगयं पुंडरीअरिंछोलिं ।
वारिअअसइपरिग्गह ! परिग्गहे कुणसि चलणाणं ? ॥ २०

गयविसयगामतत्ती कहं सि नेआ वि अक्खवडलस्स ।
इंदिअपहू वि कह पहू ! नोइंदिअनिग्गहं कुणसि ? ॥ २१

कह सासयविण्णाणं निव्विण्णाणं भवम्मि जीवाणं ।
सिवसुक्खमकल्लाणं कल्लाणं जिण ! पणामेसि ? ॥ २२

नाह ! परिणाममहुरं विसन्नवीसामठामभूअं पि ।
कह पन्नवेसि कन्नामयं पि मुणिसंमयं धम्मं ? ॥ २३

सच्छंदयं समुव्वह सव्वं परमप्पयं व पिच्छंतो ।
जं पुण जिअसयलक्खो वि अप्पसत्तो सि तमजुत्तं ॥ २४

अमयरसोहालिद्धा अमच्छरिद्धा असारसरहंगा ।
कह निच्चमसंखोहा जलयरवसही वि तुह वाणी ? ॥ २५

कह कीरउ पडिओसो असमोसरणागयाण जंतूणं ।
सुरसेविएण तुह जिणवरिंद ! पायारविंदेण ॥ २६

समणयणवायसोहाविहूसियं विसमदिट्ठिवायं पि ।
दसवेयालियपयडं पि पयडियाणंतमग्गणयं ॥ २७

निज्जुत्ति जुत्तिगुरुअं जयगुरु ! मइरामयं पि मोहहरं ।
सारंगसंगयं गयमयं पि कह सासणं तुम्ह ? (यु.) ॥ २८

हयपच्चूहाण नमो तुह निच्चफुरंतनहमणिगणाणं ।
संतावयाण जणपत्थणिज्जछायाण पायाणं ॥ २९

इअ सयलसिरिनिबंधण ! पालय ! पच्चल ! तिलोअलोअस्स।
भव मज्झ सया मज्झत्थ ! गोअरे संथुइगिराणं ॥ ३०

## १२. ॥ श्रीमहावीरस्वामिस्तवः ॥

(गयकलहं)

गयकलहं गयकलहं गयकलहं कुनयभंजणे वीरं ।
न वसुरयं नवसु रयं नवसुरयंतरणमभिवंदे ॥ १

दिअरायं दिअरायं दिअरायं वालमउलणे पहु तं ।
नित्तासं नित्तासं नित्तासंबुअसुभगमीले ॥ २

अणवरयं अणवरयं अणवरयं पिहुजणं विवाहेइ ।
अमयहरं अमयहरं अमयहरं नाह ! तुह वयणं ॥ ३

अच्चाए अच्चाए अच्चाएणं तुमं उवासीणो (पवट्टंतो) ।
कल्लाणी कल्लाणी कल्लाणीओ हवउ निवई ॥ ४

सप्पणयं सप्पणयं सप्पणयंगीकयन्नगिहवासा ।
सक्कइणो सक्कइणो सक्कइणो तं थुणंति जई ॥ ५

सुपवयणं सुपवयणं सुपवयणं मंदधम्मिणं चइउं ।
निच्चरणा निच्चरणा निच्चरणा तुह भमंति भवे ॥ ६

सहसऽक्खा सहसक्खा सह सक्खा संथुणंति असुरेहिं ।
गोविंदा गोविंदा गोविंदाखित्तचित्ताणं ॥ ७

ओसरणं ओ सरणं ओसरणं अस्सिरीइ तुह सहइ ।
रयणमओ रयणमओ रयणमओ जत्थ पायारो ॥ ८

सिरिसयणे सिरिसयणे सिरियसणे तुह हरी किरइ जम्मे ।
समहुवयं समहुवयं समहुवयं सं कुसुमपयरं ॥ ९

परमोहं परमोहं परमोहं भवनईइ तं दिंतो ।
सत्ताणं सत्ताणं सत्ताणं जिणवइ करेसु ॥ १०

## १३. ॥ श्रीवीरजिनस्तोत्रम् ॥

सिरिवद्धमाण सिरिवद्धमाण सिरिवद्धमाण जिणचंद ।
परमाणव परमाणव परमाणवणंसि वेदिज्जा ॥ १

सुहसायर सुहसायर सुहसायर भवसमूहनिम्महण ! ।
जयणायग जयणायग जयनायगइं निवारिज्जा ॥ २

रयणायर रयणायर रयणायर नाणदंसणसिरीणं ।
सुरमोहण सुरमोहण सुरमोहणयं पयं कुज्जा ॥ ३

सरणागय सरणागय सराणागय वज्जपंजरपइट्ठ ।
कमलासण कमलासण कमलासण सरिसमहहुज्जा ॥ ४

सव्वविजय सव्वविजय सव्वविजय थुणियगरिट्ठपहो ।
महसययं महसययं महसययं सिवपयं नयसु ॥ ५

## १४. ॥ श्रीवीरजिनस्तवः ॥

नमिऊण जिणं जगजीव-बंधवं भविय-कुमुय-रयणियरं ।
वीरं गिरिंदधीरं थुणामि पयडत्थनामेहिं ॥ १

अरुह अरिहंत अरहंत देव जिण वीर (जिणवर) परमकारुणिय ।
सव्वन्नु सव्वदंसण, पारय तिकालविऊ नाह ॥ २

जय वीयराय केवलि तिहुयणगुरु सव्व तिहुयणवरिट्ठ ।
भयवं तित्थयर त्ति य सक्केहिं नमंसिय जिणिंद ॥ ३

सिरिवद्धमाण-हरिहरकमलासणपमुह-नामधेएहिं ।
अन्नत्थ-गुणजुएहिं जडमइवि सुयाणुसारेण ॥ ४

भवबीयंकुरभूयं कम्मं डहिऊण झाणजलणेण ।
न रुहसि भववणगहणे तेण तुमं नाह अरुहोसि ॥ ५

घोरुवसग्ग–परीसह–कसाय करणाणि पाणिणं अरिणो ।
सयलाण नाह ! ते हणसि जेण तेणारिहंतोऽसि ॥ ६

वंदण थुणण नमंसण पूयण सक्करण सिद्धिगमणंमि ।
अरिहोऽसि जेण वरपहु ! तेण तुमं होसि अरहंतो ॥ ७

अमर–नर–असुर–वर पहु–गणाण पूयाए जेण अरिहोऽसि ।
धीर (सिद्धारमण) मणुन्मुक्को (?) तेण तुमं देव ! अरहंतो ॥८

रहगदिसेससंगह–निदरिसणमंतो गिरिगुहमणाणं ।
तं ते नत्थि दुयंपि हु (?) जिणिंद ! तेणारिहंतोऽसि ॥ ९

रहमग्गं तो अन्नपि मरणमवणीय जेण वरनाणा ।
संपन्न–निय–सरूवो देव ! तुमं तेण अरहंतो ॥ १०

न रहसि सद्दाइ–मणोहरेसु अमणोहरेसु तं जेण ।
समधारं जियमणकरणजोग तेणारहंतोऽसि ॥ ११

अरिहा जोगा पूयाईयाण देविंदणुत्तरसुराई ।
ताणंपि य अंतो सीमाकोडी तं तेणऽरहंतो ॥ १२

सिद्धिवहुसंग–कीलापरोऽसि विज्जइ समो मोहरिउवग्गेणं ।
सुहपुन्न–परिणइ–परिगय तं तेण देवुत्ति ॥ १३

रागाइवेरि निक्कितणेण दुहउ वि वयसमाहाणा ।
जय सत्तुक्करिसगुणाइएहिं तेणं जिणो देव ॥ १४

दुट्ठट्ठकम्मगंट्ठिप्पवियारणलद्धलद्धि–संससद्द ।
तव सिरिवरगणकेलिय–सोहंतं तेण वीरोसि ॥ १५

पढमवयगहणदिवसे संकंदण विणयकरण-गयतण्हा ।
जाओसि तेण वरमुणि अह तेण तुमं महावीरो ॥ १६

सचराचर जंतुपुहुत्त भत्त थुइ सत्तसत्तुमित्तेसु ।
करुणरसरंजियमणो तेण तुमं परमकारुणिउ ॥ १७

जेसु य भविस्स भवंति भाव-सब्भावभावणपरेण ।
नाणेण जेण जाणसि भन्नसि तं तेण सव्वन्नू ॥ १८

ते कसिण-भुवण-भवणो य रिद्धिया निय-निय रूवेण ।
सामन्नउवलोयसि तेण तुमं सव्व-दरिसित्ति ॥ १९

पारं कम्मस्स भवस्स वा वि सुयजलहिणो व नेयस्स ।
सव्वस्स उ जेणं भन्नसि तं पारगो तेणं ॥ २०

पच्चुप्पन्न-अणागयतीयद्धा-वत्तिणो जे पयत्था ।
करयलकलियामलयं व मुणसि तिक्कालविऊ तेण ॥ २१

नाहो विनाहनाहाण भीमभवगहण-मज्झवडियाण ।
उवएसदाणाउ मग्गनयणउ होसि तं जेण ॥ २२

रागोऽई सुभेयरवत्थुसु जंतूण चित्तविणिवेसो ! ।
सो रागो दोसो उण तव्विवरीओ मूणेयव्वो ॥ २३

सो कमलासण-हरिहर-दिणयरपमुहाण माणदलणेण ।
लद्धेक्करसो पत्तो जिण तओ मूले नउ तुमए ॥ २४

जं मलण-दलण-विहलण-म(कव)
लणवि समत्थो जो य जीवोवि ।
करचरण-नयण-कररुह-अहरदलं वसइ अणुजं च ॥ २५

दोसो वि उ डिलंकुंतलभू-पम्हल-नयण-तारियमिसेण ।
गुरुनिक्करणं सूयइ तं मन्ने गुणकरे लऊणो ॥ २६

जह वि बहु रूवधारी वसंति ते देव तुह सरीरंमि ।
तक्कय-विगार-रहिओ तहवि तुमं वीयरागोत्ति ॥ २७

जं सव्वदव्वपज्जवपत्ते य पत्तेयमणंत परिणइ ।
सरूवं भगवं मुणइ तिकालसंठियं केवलं तमिह ॥ २८

ता ते अप्पहयसत्तिपसर-मणवरय-मविगलं अत्थि ।
मुणिणो वि मुणियपयत्थो तेण तुमं केवलिं बिंति ॥ २९

पंचेंदिसन्निणो जे तिऊयण सद्देण तेत्थ णज्जं ति (गिज्झंति) ।
तेसि सधम्म-निउयणेण तं तिहुयणगुरुत्ति ॥ ३०

पत्तेयर-सुहुमेयर-जिएसु गुरुदुह-विलप्पमाणेसु ।
सव्वेसु वि हियकारी तेसु तेसु तुमं तेण सव्वोसि ॥ ३१

बल विरिय-सत्त सोहग्ग-रूवविन्नाण-नाणपवरोऽसि ।
उत्तम - पय-कयवासो तेण तुमं तिहुयण-वरिट्ठो ॥ ३२

पडिपुन्न-रूव-धण धन्न-कंति-उज्जम-जसाण भयसन्ना ।
ते अत्थि अवियला तुम्ह नाह ! तेणाऽसि भयवं तो ॥ ३३

इह-परलोयाईयं भयंति वावन्नयंति सत्तविहं ।
तेण च्चिय परिचत्तो जिणेस ! तं तेण भयवंतो ॥ ३४

तित्थं चउविहसंघो पढमो च्चिय गणहरोऽहवा तित्थं ।
तत्तित्थ करणसीलो तंसि तुमं तेण तित्थयरो ॥ ३५

एवं गुणगणसक्कस्स कुणइ सक्कोवि किमिह अच्छरियं ।
अभिवंदणं जिणेसर ता सक्कभिवंदिय नमो ते ॥ ३६

मणपज्जवोहि–उवसंत–खीण–मोहा–जिणत्ति भन्नंति ।
ताणं चिय तं इंदो परमिस्सरिया जिणिंदुत्ति ॥ ३७

सिरिसिद्धत्थ–नरेसर–गिहंमि धणकणय देस– ।
कोसेहिं वड्ढेसि तं जिणेसर ! तेण तुमं वद्धमाणोसि ॥ ३८

हरसि खमं कमलालय–करयलगय–संखचक्क–सारंगो ।
दाणवरिसुत्ति जिणवर ! तेण तुमं भन्नसे विण्हू ॥ ३९

हरसि रयं जंतूणं बज्झं अब्भितरं नरवट्टंगं (तं) ।
नयनीलकंडकलिउ हरो त्ति तं भणसे तह वि ॥ ४०

कमलासणोवि जेण दाणाई चउह–धम्म–चउवयणो ।
हंसगमणो यं गमणो तेण तुमं भन्नसे बंभो ॥ ४१

बुद्धं अवगयमेगट्ठियं ति जीवाइतत्त–मवसेसं ।
वरविमल–केवलाउ तेण तुमं भन्नसे बुद्धो ॥ ४२

इय नामावलि – संथुय सिरिवीरजिणिंद मंदपुन्नस्स ।
वियर करुणाइ जिणवर सिवपयमणहत्थिरं वीरं ॥ ४३

## ९५. ॥ श्रीमहावीरस्वामिस्तोत्रम् ॥

(आर्या)

नमिऊण संखसत्थियचक्कं कुसकमलं पतिदुल्ललियं ।
भवियाण भवविणासं कमजुयलं वद्धमानस्स ॥ १

तस्स य पणईयणवच्छलस्स दालिद्दुक्खदलणस्स ।
वीरस्स मोक्खपहदायगस्स विन्नत्तियं काहं ॥ २

भयवं अणाइसंसारसागरे भीसणे भमंतेण ।
वयणंपि न तुम्ह सुयं अच्छउ ता दंसणं नाह ! ॥ ३

जइ पुण कहंपि जयगुरू अन्नभवे सामि वंदिओ हुंतो ।
ता हं दुहसयपउरे संसारे नेय हिंडंतो ॥ ४

नारयतिरिनरामरभवेसु दुक्खाइं सामि विसहंतो ।
भमिओ अहं अणाहो तुह दंसणविरहिओ नाह ! ॥ ५

अन्नाणमोहमूढो सामिय तुह सासणं अयाणंतो ।
छज्जीवकायमज्झे निहओ नियकम्मदोसेणं ॥ ६

चुलसीइजोणिलक्खेसु नाह ! दुक्खाइं जाइं सहियाइं ।
ताइं तुमंचिय, जाणइ, को अन्नो साहिउं तरई ॥ ७

पयडो सि तुमं जयगुरू तुममेवय सयलतिहुयणाभोओ ।
मोहंधेण न दिट्ठो उल्लुएणं दिणयरो व्व जहा ॥ ८

कह कह वि दंसणावरणकम्म उवसमखएण जइ नाह ! ।
दिट्ठो अदिट्ठपुव्वो भवसयमहणो तुमं देव ! ॥ ९

ता सुकयत्तो सामिय अज्ज महानिव्वुइं अहं पत्तो ।
जं सयलसुक्खजणओ दिट्ठो तं कप्परुक्खो व्व ॥ १०

